न केवलं प्रकृतिपुरुषावेवनित्यौ किंतर्हि देशतोऽपरिच्छिन्नं यद्वेदाकाशादिवस्तु तदपि नित्यमित्याह । अविनाशीति । वेदादेः स्वाभाविकनाशाभावेऽपि केनचिच्छापादिना हेतुना विनाशःस्यादित्यत आह । विनाशमिति । नकेवलमविनाशः किंतु ह्रासोपि नास्तीत्युक्तं । अव्ययस्येति । नासत इत्यादेरपराव्याख्या । ननु पापमेवाश्रयेदस्मानित्यादिना बंधुहननादि परलोकदुःखहेतुतयोक्तमतःशोक इत्यतआह । नासतइति । सदसच्छब्दौ सत्कर्मासत्कर्मवाचकौ । सद्भावेसाधुभावेच सदित्येतत्प्रयुज्यते । प्रशस्ते कर्मणि तथा सच्छब्दः पार्थ युज्यते इति वक्ष्यमाणत्वात् । भावाभावशब्दौ सुखदुःखवाचिनौ । सद्भाववाचिनः शब्दाः सर्वेतु सुखवाचकाः । अभाववाचिनः शब्दाः सर्वे ते दुःखवाचका इतिवचनात् । यथाचासत्कर्मणः सकाशात्सुखं नास्ति तथा सत्कर्मणः सकाशाद्दुःखं नास्तीति विद्वद्भिर्विनिश्चितं । इदंतु नारायणद्विट्तदनुबंधिनिग्रहरूपत्वात् सत्कर्मेतिभावः ॥ १७ ॥

केवळ परमात्मा तसचि लक्ष्मी किंवा जीव हींच मात्र नित्य असा अर्थ नाहीं. आणखी सर्व देशांत किंवा कालांत व्याप्त असून नित्य अशा आकाश किंवा वेदादि वस्तु आहेत. ज्यांचा स्वभावतः नाश नसून शापादि कारणानेसुद्धां नाश होत नाहीं. एवढेंच नव्हें तर किंचित् ऱ्हासही होत नाहीं. अथवा अर्जुनास श्रीकृष्णानें आपल्या शत्रूंचा वध माझी पूजारूप सत्कर्म जाणून करावा असें सांगितलें यावरून पूजा ही कनिष्ठानें श्रेष्ठाची करावी असें झालें. (जीवापेक्षां परमात्म्याला श्रेष्ठत्व काय याविषयीं सांगतात.) सर्व देशांत तसेंच भविष्यवर्तमानकालांत किंवा सत्व, रज, तम हेच मुख्य असलेले दुर्गुणरहित करून सच्चिदानंदादि सद्गुणांनीं तीन प्रकारची व्याप्ति आहे ती संपूर्णपणें विष्ण्वाख्य परब्रह्म नारायणाचीच होय. यद्यपि जीवांस नित्यत्व मात्र असलें तरी

संपूर्णपणानें विनाशराहित्य नाहीं. तो विनाश, अनित्यत्व, देहहानि, दुःखप्राप्ति, आणि असंपूर्णता अशा रूपानें चार प्रकारचा आहे. त्यांतील एकही नाश श्रीहरीचेठायीं नाहीं. त्याच्याशिवाय सर्वांस वरील चार नाशांपैकीं कांहीं नाश असल्याशिवाय राहात नाहींत. यावरूनच तो ईश्वर सर्व जीवसमुदायापेक्षां परमश्रेष्ठ असें जाणणाऱ्याचा नाश कोणापासूनही होत नाहीं, हेंच काय तें जीवापेक्षां ईश्वराचें परमश्रेष्ठत्व होय. ॥ १७ ॥

अंतवंत इमे देहा नित्यस्योक्ताः शरीरिणः
अनाशिनोऽप्रमेयस्य तस्माद्युध्यस्व भारत ॥ १८ ॥

ननु जीवानामीश्वरप्रतिबिंबत्वस्य रूपंरूपंप्रतिरूपोबभूवेत्यादि प्रमाणसिद्धत्वात्प्रतिबिंबस्योपाधिनाशे नाशनियमात् देहानांचविनाशित्वात्कथं तदुपाधिकानामात्मनां नित्यत्वमुच्यते नित्यत्वेवोपाधिभूतदेहानामपि केषांचिन्नित्यत्वं स्यादित्यत आह । अंतवंतइति । ये देहा अनित्याः न तेषामुपाधित्वं यस्यचोपाधित्वं नासावनित्यइतिभावः । तदिदमुक्तं इमइति । तथाचोक्तं । जीवोपाधिर्द्विधाप्रोक्तः स्वरूपं बाह्य एवच । बाह्योपाधिर्लयंयाति मुक्तावन्यस्यतु स्थितिः । सर्वोपाधिविनाशेहि प्रतिबिंबः कथं भवेत् । कथंचात्मविनाशाय प्रयत्नः सेत्स्यति क्वचिदिति । तथा । उपाधेश्चैव नित्यत्वान्नैव जीवो विनश्यति । स्वरूपत्वादुपाधेश्च न भिन्नोपाधिकल्पनेति । नित्यस्य देहस्यापि । अंतवंत इत्युच्यमाने ईश्वरदेहस्याप्यंतवत्वं प्रसज्येतेत्यतस्तद्व्यावृत्त्यर्थं शरीरिण इतिविशेषणं । शरीरिशब्दस्य जीवे प्रसिद्धत्वात् । ननुपाधिनाशेन नाशाभावेप्युपाधिबिंबसंनिधिनाशान्निमित्तात्प्रतिबिंबस्यात्मनो नाशो भविष्यति । नचासिद्धिःशंक्यापरिच्छिन्नस्यैव प्रतिबिंबनाशसंभवेन संनिधिनाशध्रौव्यादित्यतउक्तं । अनाशिन इति । तत्र हेतुरप्रमेयस्येति । भेदप्रमितौ समानाधिकरणस्य सारूप्यगमकत्वादप्रमेयेश्वरसरूपत्वं गम्यते । ततो बिंबभूतस्येश्वरस्य सर्वगतत्वात्कथमुपाधिसंनिधिनाशः । नच सर्वगतस्य प्रतिबिंबासंभवः । तदधीनसारूप्यस्य प्रतिबिंबत्वादितिभावः । अतो जीवानां नित्यत्वेनाशो-

च्यत्वात्तद्भयात्स्वधर्मं मात्याक्षीरित्याह । तस्मादिति । एवं युद्धाकरणे कारणं नास्तीत्युक्तं । इदानीं भगवत्पूजात्वेन युद्धं कर्तव्यमिति वक्तुं भगवतो जीवेभ्योतिशयाभावात् किं तत्पूजयेति शंकां परिहरति । अविनाशीति । देशतः कालतश्चैव गुणतश्च त्रिधाततिः । सा समस्ता हरेरेव नह्यन्ये पूर्णसद्गुणा इतिश्रुतेः सर्वप्रकारेण ततं यद्विष्णवाख्यं ब्रह्म तदविनाशि विध्दीति । यद्यपि नित्यत्वं जीवस्याप्यस्ति तथापि सर्वप्रकारेणाविनाशित्वं विष्णोरेवेति तु शब्दः । तदुक्तं । अनित्यत्वं देहहानिर्दुःखप्राप्तिरपूर्णता । नाशश्चतुर्विधः प्रोक्तस्तदभावो हरेः सदा । तदन्येषांतु भावानां नाशाः केचिद्भवंतिहीति । विनाशमित्यादिपूर्ववद्व्याख्येयं । अस्येति विष्णोः परामर्शः । अस्तु हरेः सर्वप्रकारेणाविनाशित्वं तथापि कथं तस्य जीवादतिशय इत्यतआह । अंतवंत इति । इमे देहा इतिविशेषणान्मुक्तदेहस्यापि नित्याचिदानंदरूपत्वमनुज्ञायते । किमुतेश्वरस्य । चिदानंदशरीरेण सर्वे मुक्ता यथा हरिः । भुंजते कामतो भोगांस्तदंतर्बहिरेवचेत्यादिकंच तत्र प्रमाणं । अत ईश्वरः सर्वप्रकारेणाविनाशी । शरीरिणां नित्यत्वमात्रमेवास्ति । नतु सर्वप्रकारेणाविनाशित्वमनिच्छयादेहहान्यादिसद्भावात् । अतोस्ति जीवादीश्वरस्यातिशय इतिभावः । ततः किमित्यत आह । अनाशिन इति । तस्मादीश्वरस्य सर्वप्रकारेणाविनाशित्वेन स्वातंत्र्यात् दुःखनिवृत्तेः सुखस्यचप्राप्तेः तत्प्रसादाधीनत्वादनाशिनः सर्वथानाशरहितस्याप्रमेयस्य देशतः कालतो गुणतश्च परिपूर्णस्य विष्णोः पूजार्थं युध्यस्वेति । अथवा अविनाशित्वित्यनेन भगवतः स्वातंत्र्यसमर्थनेन तत्पूजायाः सत्कर्मत्वं समर्थितं । अंतवंत इति जीवानामनित्यदेहवत्वेनास्वातंत्र्योक्त्या हंतुमसामर्थ्यं समर्थितमिति द्रष्टव्यम् ॥ १८ ॥

शिवाय जीव हा बिंबरूपी ईश्वराचें प्रतिबिंब आहे हें सर्व श्रुतिस्मृत्यादिकांवरून प्रसिद्धच आहे, तर जसें पुरुषाचें आरशांतील प्रतिबिंब उपाधिभूत आरशाचा नाश झाल्यानें नाश पावतें, तसें जीवांच्या प्रतिबिंबाला कारणीभूत जो देह तो अनित्य असून नाश पावत असल्यानें देहाच्या नाशानें जीवहि नष्ट होणें योग्य असून देह मात्र नाश पावतो व जीव नष्ट होत नाहीं हें कसें? प्रतिबिं-

बभूत जीव नित्य असल्यास उपाधिभूत देहहि नित्य ह्मणणें भाग आहे. अशी अर्जुनाच्या मनांतील शंका **श्रीकृष्ण** परिहार करितात. देहधारण करणाऱ्या जीवांना दोन तऱ्हेचे देह असतात. ते असे कीं, एक प्राकृत (जडदेह) आणि दुसरा स्वरूपभूत (ज्ञानदेह). त्यांत जडदेहाचा नाश झाला तरी बिंबरूप परमात्म्याचे प्रतिबिंब जीव होण्यास कारणीभूत जो जीवाचा चिद्रूप देह तो नित्य असल्यानें प्रतिबिंबाचा नाश होण्याचें कारण नाहीं. पुनः अशी शंका येते कीं, चिद्रूप देहाला नाश नसल्यानें जीवाला नाश नसला तरी बिंबरूपी परमात्म्याचें सान्निध्य नसल्यानें किंवा बिंबरूपी परमात्म्याचा नाश झाल्यानें प्रतिबिंबरूप जीवाचा नाश कां होऊं नये? अशी शंका येईल. परंतु सर्वत्र व्याप्त अशा बिंबरूपी परमात्म्याचें सान्निध्य जीवाच्या चिद्रूपास कधींही जात नाहीं व नित्य ईश्वराचा नाश नसल्यामुळें प्रतिबिंबरूप जीवाचाही नाश होत नाहीं. हे भरतकुलोत्पन्ना **अर्जुना**, या सर्व कारणांनीं जीवाचें नित्यत्व सिद्ध झाल्यानें त्याचा नाश होईल अशा हेतूनें तूं युद्धाविषयीं पराङ्मुख होऊं नको तर युद्धाकरितां सिद्ध हो. ॥ १८ ॥

य एनं वेत्ति हंतारं यश्चैनं मन्यते हतम् ॥
उभौ तौ न विजानीतो नायं हन्ति न हन्यते ॥१९॥

ननु यदि जीवानां नित्यत्वमीश्वरस्य च स्वतंत्रत्वं तर्ह्ययमस्य-हंता अयमनेन हतः इति प्रतिपत्तिः कीदृशीत्याशंक्य भ्रांतिरित्याह । य एनमिति । य एनं जीवं स्वातंत्र्येण हंतारं पश्यति । तथैनं जीव-मीश्वरं वा चेतनस्यहंतारं पश्यति । यश्चैनं जीवं हतं मन्यते तावुभौ न विजानीतः । अज्ञानिनौ । यतश्चित्प्रतिबिंबोऽतः स्वातंत्र्याभावान्नायं-जीवो हंति नित्यत्वान्नहन्यते च । एतज्ज्ञानादेव जीवानां प्रायश्चित्ता-दिभागित्वमिति ॥ १९ ॥

(जीवाचे ठिकाणीं नित्यत्व व ईश्वराचे ठिकाणीं स्वातंत्र्य असल्यानें हा जीव दुसऱ्याचा संहार करितो, असें ह्मणण्यास कारण काय याविषयीं कृष्ण सांगतात.) आपण त्या जीवाला स्वातंत्र्यानें मारूं असें ह्मणणारे मनुष्य अज्ञानी असें समजलें पाहिजे. जीव संहार करून घेतो असें समजणें

ही भ्रांतीच आहे. कारण जीव नित्य ठरल्यानें व अस्वतंत्र असल्यामुळें दुसऱ्याचा संहार करण्यास किंवा दुसऱ्याकडून संहार करून घेण्यास शक्य नाहीं. जीव संहार करितो अथवा संहार करून घेतो हे ह्मणणें भ्रांतीचें आहे. याबद्दल श्रुतिसंमतीहि आहे. ॥ १९ ॥

न जायते म्रियते वा कदाचि-
न्नायं भूत्वाभविता वा न भूयः ॥
अजो नित्यः शाश्वतोऽयं पुराणो
न हन्यते हन्यमाने शरीरे ॥ २० ॥

उक्तार्थे प्रमाणत्वेन मंत्रवर्णमुदाहरति । न जायते इति । नञा- द्वितीयस्य म्रियतइत्यनेनसंबंधः । अयं संसारी स्वरूपेण न जायते न म्रियतेच । ज्ञानीच देहेनापि न जायते न म्रियते च । अभिमाना- भावेन देहसंबंधाभावात् ननु जीवो न जायतेचेत्तर्हि यथेश्वरस्य ज्ञानं वृद्धिऱ्हासादिवर्जितं भूत्वैव कयाचिदचिंत्यया शक्त्या पुनर्भूत- मिति व्यवहारालंबनं तदैक्षतेत्यादिश्रुतेः । देशतः कालतो योसावव- स्थातः स्वतोऽन्यतः । अविलुप्तावबोधात्मा स युज्येताजयाकथमिति भागवतस्मृतेश्च । तथा जीवेऽपि जननव्यवहारे निमित्तं इत्यतआह । अयमिति । कुतो न जायते न म्रियते कुतो नेश्वरज्ञानसाम्याभाव इत्यतआह । अजइति । अजादिलक्षणेश्वरसरूपत्वादित्यर्थः । अजो नित्य इत्याभ्यां बिंबोत्पत्तिनाशनिमित्तौ शाश्वतः सदैकरूप इत्यनेनो- पाधिबिंबसंनिधिजनननाशनिमित्तौ च जन्मनाशौ नस्तः । प्रतिबिंबत्वा- देव बिंबसर्वसाम्याभाव इत्युक्तं भवति । तर्हि जननव्यवहारे किंनि- मित्तमित्याशंक्य देहांतरप्राप्तिर्निमित्तमित्याह । पुराण इति । पुराणि देहानणति गच्छतीति पुराणः एवं तर्ह्युपाधिभूतदेहनाशाद्दर्पणनाशा- त्प्रतिबिंबनाशवदात्मनाशः स्यादित्यतआह । न हन्यतइति । अथवा अयं ना परमपुरुषः स्वरूपेण न जायते न म्रियते देहं न जहाति । वाशब्दात् पूर्वनञोऽनुकर्षः । भूत्वा विद्यमान एव भूयः पुनर्देहसंबंध-

रूपेणापि न भविता देहनाशाभावे स्वरूपनाशाभावः कैमुत्येनैव सिद्ध इति नोक्तः देहवियोगस्यैव मरणत्वेन प्रसिद्धेर्घटादिनाशे मरणव्यवहाराभावान्न म्रियते इत्युक्त्या स्वरूपानाश उच्यते । अयं जीवोप्यजो नित्यश्चेत्कथं तर्हि ईश्वराद्विशेष इत्यत उक्तं । शाश्वत इत्यादि । शाश्वतो न कदाचिदस्वातंत्र्यादिकं जीवरूपं जहाति । उक्तंच । अल्पशक्तिरसार्वज्ञं पारतंत्र्यमपूर्णता । उपजीवकत्वंजीवत्वमीशत्वं तद्विपर्ययः । स्वाभाविकं तयोरेतन्नान्यथा स्यात्कथंचन । वदंति शाश्वतावेतावतएव महाजना इति । पुराण्यणतीति पुराणः । एतावांस्तुगुण इत्याह । नहन्यत इति । शरीरे हन्यमाने । स्वयं न हन्यत इत्येतावान् नतु स्वातंत्र्यादिपरमात्मधर्मवानिति ॥ २० ॥

पहा कीं, जननमरणरूप संसारांत पुनः पुनः येणाऱ्या प्राण्यांच्या चिद्रूप शरीरांस उत्पत्ति किंवा नाश नाहीं. तसें ब्रह्मज्ञानी अशा सिद्ध पुरुषांस प्राकृत देहाभिमान नसल्यानें त्या देहाची उत्पत्ति अगर नाश झाला तरी त्यापासून होणाऱ्या सुखदुःखानुभवसंबंधानें ते असंग असतात. (खरोखर जीवाला उत्पत्ति किंवा विनाश जर नसता तर जसें देशतः, कालतः, स्वतः, अथवा परतःज्याच्या अमित सत्‌ज्ञानाला लोप नाहीं अशा विज्ञानमूर्ति श्रीहरीच्या ज्ञानाला ‘ **अभूत्वाभवन** ’ (होत नसतां होणें) अशा तऱ्हेच्या विचित्र शक्तींनीं उत्पत्ति ‘ तदैक्षत ’ इत्यादि श्रुति वगैरेंत सांगितली आहे, तशी जीवालाहि उत्पत्ति विनाश नसून तो जीव झाला किंवा मेला असा व्यवहार घडण्याला विशेष कारण आहे काय ? अशा शंकेच्या निवृत्त्यर्थ, ती परमात्मज्ञानाची ‘ अभूत्वाभवन’ शक्ति जीवास नाहीं असें (नायंभूत्वाभविता) या वाक्यशेषानें सांगितलें आहे.) असें आहे तर तो जीवगण कोणत्या कारणानें उत्पत्तिविनाशशून्य आहे आणि त्याला परमात्म्यासारखी विचित्र शक्ति कां नाहीं ? याचें उत्तर असें आहे कीं, बिंबभूत परमात्म्याला उत्पत्तिविनाश नसल्यानें प्रतिबिंबभूत जीवगणालाहि उत्पत्तिविनाश नाहीं. तसेंच बिंबरूप परमात्मा सर्वदा एक प्रकारें व्याप्त असल्यानें, प्रतिबिंबोत्पत्तीस कारणीभूत अशा आरशाप्रमाणें असलेलें जीवाचिद्रूपाचें सामीप्य सर्वकाल असल्यावरून प्रतिबिंबभूत जीवगणाचा नाश कदापि होत नाहीं. जीवसमुदायास उत्पत्ति व नाश

आहे असा लौकिक व्यवहार घडण्यास कारण जीवांशीं होणारा जडदेहाचा संबंध किंवा वियोग हा होय. यावरून जडदेहाहून जीवचिद्रूप देह अन्य असल्यानें जडदेहाचा नाश झाला तरी जीव चिद्रूपाचा नाश संभवत नाहीं. श्रीहरीला प्राकृत देहसंबंधवियोगरूप जननमरणें केव्हांहि होत नसल्यानें स्वरूप-नाश होत नाहीं हें निराळें सांगावयास नको. असें आहे तर रामकृष्णादि अभिन्नांशरूप अवतार कसे झाले अशी शंका कोणासहि येणार. याविषयीं श्रुतिस्मृत्यादिकांत असा उघड अभिप्राय दिसतो कीं, त्या त्या अवताररूपानें स्वतः परमात्मा तत्तत्तारतम्यानुसार भक्तजनांस दृग्विषय मात्र झाले. त्यावरून शुक्रशोणितसंबंधजनित गर्भवास व देहधारणादि दुःखें त्या ईश्वरास कदापि नाहींत. याशिवाय अशेषगुणपरिपूर्ण, सर्वज्ञ, स्वातंत्र्यादिगुणमंडित अशा परमा-त्म्याला अल्पज्ञत्व, दुःखित्व, अस्वातंत्र्य, अल्पशक्तित्व, उपजीवकत्वसंबंधानें तदधीनत्वादिगुणविशिष्ट जीवगणासारखा, प्राकृतशरीरप्राप्तिवियोग हीं त्या सच्चिदानंदकंदमूर्ति श्रीनारायणाचे ठिकाणीं कोण सांगेल. ती परमात्म्याची विचित्र शक्ति यावज्जीवगणाला न येण्यास हेंच कारण मुख्य होय. ॥ २० ॥

वेदाविनाशिनं नित्यं य एनमजमव्ययम् ॥
कथं स पुरुषः पार्थ कं घातयति हन्ति कम् ॥ २१ ॥

जीवस्यानित्यत्वादिकं मन्यमानो न ज्ञानीत्युक्तं । इदानीं ज्ञानी तु नैवं मन्यत इत्याह । वेदेति । अविनाशिनं नैमित्तिकनाशरहितं । नित्यं स्वाभाविकनाशरहितं । अथवा । अविनाशिनं दोषयोगरहितं । दोषयुक्तपुरुषादिषु नष्टशब्दप्रयोगात् । यथा भीष्मादिचेतनानां नित्य-त्वान्न त्वया हननं घातनं वा क्रियते तद्वत्तेषामदोषयोगित्वान्न त्वया दोषयोगः क्रियते कार्यतेच । नित्यं सदाभाविनं । अजमुत्पत्तिवर्जितं अव्ययं स्वरूपविकारशून्यं एनं जीवमेवं यो वेद तथाऽविनाशिनं शरीरापायादिवर्जितं । नित्यं स्वरूपतः एनमजादिरूपं स्वतंत्रं विष्णुं यो वेद स कथं घातयति हंति वा जीवानां नित्यत्वादस्वतंत्रत्वादेनं घातयामि हन्मिचेतिभावं न करोतीत्यर्थः ॥ २१ ॥

जीवांस परमनित्यत्व किंवा स्वातंत्र्य, अप्राकृत देह किंवा देहवियोग

नाहीं असें समजणारा ज्ञानी नव्हे असें सांगून ज्ञानी तसें जाणत नाहीं याब-द्दल सांगतातः— हे अर्जुना, हा जीव बिंबनाशराहित्यनिमित्तानें निरंतर उत्पत्तिरहित (स्वरूपविकार नसलेला) आणि हा परमात्मा देहानें आणि स्वरूपानें नित्य असून नाशरहित आहे. याप्रमाणें स्वतंत्र असणाऱ्या परमात्म्यास जो जाणतो, तसाच जीव नित्य परतंत्र आहे, असें जो जाणेल तोच ज्ञानी ह्मणून समजावा. असा ज्ञानी पुरुष आपण दुसऱ्यास मारीन अगर दुसऱ्या-कडून मारला जाईन असें समजणार नाहीं. ॥ २१ ॥

वासांसि जीर्णानि यथा विहाय
नवानि गृण्हाति नरोऽपराणि ॥
तथा शरीराणि विहाय जीर्णा-
न्यन्यानि संयाति नवानि देही ॥ २२ ॥

जीवो नित्यस्य देहवियोगौच कौमारादिवदित्युक्तं तत्र कौमा-रादिदेहानामनतिभिन्नत्वान्न ते न देहात्मनोर्विवेकः विनाशित्वा-विनाशित्वलक्षणः स्फुटो अनुभवारूढो भवतीति देहात्मविवेकानुभवं दृष्टांतेनोपपादयति । वासांसीति । अथवा वाससो जरावत्स्वशरीरे जरादावस्वातंत्र्यदर्शनात् सर्वत्रास्वातंत्र्यं जीवस्य ज्ञातव्यमित्यने-नोच्यते ॥ २२ ॥

जीव चित्स्वरूपानें नित्य आहे. त्यास देहप्राप्ति किंवा देहवियोग बाल्य किंवा यौवनादि अवस्थेप्रमाणें आहे ह्मणून सांगितलें. तरी बाल्यदेह किंवा यौवनदेह अत्यंत निराळे नसल्यानें जीव हा देहापासून निराळा स्पष्ट दिसत नाहीं. त्यामुळें वरील कौमारादि दृष्टांतानें जीवास चिद्रूपानें नित्यत्व, प्राकृत-देहास नाशलक्षणरूप अनित्यत्व हीं स्पष्ट दिसत नाहींत. ह्मणून त्याविषयीं स्पष्ट दृष्टांत सांगतातः— जसें चिद्रूपी जीवाच्या प्राकृत देहाला कौमाराद्यवस्था जीवानें अनिच्छित असल्या तरी, भगवदिच्छेनें होत आहेत. त्याप्रमाणें अस्वतंत्र जीवाला त्या परमेश्वराच्याच इच्छेनें प्राकृत देहसंयोग किंवा वियोग घडून येतात. मनुष्य जसा जुनीं वस्त्रें टाकून नवीं वस्त्रें परिधान करितो,

त्याप्रमाणें जीव हा जीर्ण झालेलें शरीर टाकून नूतन शरीर धारण करितो. वस्त्रास जसा नाश आहे तसा शरीरासहि नाश आहे. यावरून जीव अस्वतंत्र आहे हें सिद्ध होतें. ॥ २२ ॥

नैनं छिन्दन्ति शस्त्राणि नैनं दहति पावकः ।
न चैनं क्लेदयंत्यापो न शोषयति मारुतः ॥ २३ ॥
अच्छेद्योऽयमदाह्योऽयमक्लेद्योऽशोष्य एव च ।
नित्यः सर्वगतः स्थाणुरचलोऽयं सनातनः ॥ २४ ॥

ननु दक्षस्य शिरछेदो न स्वतो जातो नापि वीरभद्रस्याबुधेन निमित्तेन किंतु यज्ञे पशुभावनाख्येन निमित्तविशेषेण तथा स्वतः प्रायो निमित्तैश्चाविनाशिनोपि केनचिन्निमित्तविशेषेण नाशः स्यादित्यतो विशिष्टनिमित्तानि निषेधति । नैनमिति ॥ २३ ॥ लट्प्रयोगेन वर्तमानस्यैव छेदादेर्निषेधात् इदानीं दृश्यमानत्वादात्मनः प्राग्विनाशाभावेप्युत्तरत्रशस्त्रादिना विनाशः स्यादित्यतोहार्थिककृत्प्रत्ययप्रयोगेन छेदादियोग्यतैवात्मनो नास्तीत्याह । अच्छेद्यइति । प्रवृत्तेशस्त्रसंपातइतिवचनात् प्रसक्तौसत्यामपि वर्तमानस्य छेदादेरदर्शनाच्छेदाद्ययोग्यत्वमात्मनो युक्तमिति पूर्वश्लोकेन दर्शयति । ननु वर्तमानछेदाद्यदर्शनमात्मनः छेदाद्ययोग्यतायां न निश्चायकं पूर्वं कदाप्यदृष्टस्यापि पश्चाद्दर्शनात् । नच संभावनामात्रेण निश्चय इत्यतो नित्यसर्वगतत्वादिविशेषणेश्वरसरूपत्वं निश्चायकं प्रतिबिंबे बिंबधर्मसमानधर्माणां अविरुद्धानां संभवादित्याह । नित्यइति । पुनरुक्तिप्रसंगात्सामर्थ्याद्भिन्नपदोपात्तमपि नित्यत्वं सर्वगतत्वविशेषणं नित्यं सर्वेषु शस्त्रपावकादिषु स्थितः सर्वगतः । स्थाणुः नैमित्तिकविकाररहितः । अनाद्यनंतशक्तित्वादचलत्वादिबिंबधर्मसाकल्याभावेप्यविरुद्धधर्मांतरस्वीकाराय पुनःपुनः प्रतिबिंबोक्तिः । तस्मादीश्वरप्रतिबिंबत्वान्नित्यत्वेनात्मानं विदित्वा नानुशोचितुमर्हसि । अथवा ईश्वरदेहस्यापि छेदाद्यभावः स्वदेहस्य साक्षादेव दर्शयितुं शक्यत इति वर्तमानापदेशः । सद्देहःसुखगंधश्च ज्ञानभाः सत्पराक्रमः । ज्ञानज्ञानः सुखसुखः सविष्णुः

परमोक्षर इति च श्रुतिः। अछेद्यत्वादिकं जीवस्यापि सममित्याह। अच्छेद्योयमिति। नन्वछेद्यत्वादिसाम्येन जीवस्यापि स्वातंत्र्यं स्यादित्यत आह। नित्यइति। नित्यं सर्वगते विष्णौ स्थितोणुश्चेति तथा विष्णवधीन इत्यर्थः। विष्णवधीनत्वस्य कदाचिन्नाशे पुनरपि साम्यमित्यत आह। अचलइति। हेतुतोपि तत्स्थत्वान्नचलतीत्यर्थः। जीवस्यास्वातंत्र्ये हेत्वंतरमाह। सनातनइति। नादेन शब्देन सह वर्ततइति सनादः सनादएव सनातनः। विधिनिषेधशास्त्रबद्धइतियावत्। उक्तंच। नित्यं सर्वगते विष्णावणुर्जीवो व्यवस्थितः। नचास्यतदधीनत्वं हेतुतोपि विचाल्यते। निषेधविधिपात्रत्वात्सनातन इतिस्मृत इति च ॥२४॥

तसेंच चिद्रूपी नित्य जीवाला बहुतकरून स्वतः नाश होण्याचें कारण नसलें तरी, ज्याप्रमाणें " पूर्वी दक्षप्रजापतीचा शिरच्छेद होण्यास स्वतः दक्ष अगर वीरभद्राचें जडभूत आयुध कारण नसलें तरी रुद्रास हविर्भाग नसलेल्या यज्ञांत वधयोग्य पशू कारण होय, अशा विशेष निमित्तानें दक्षाचा वध वीरभद्रानें केला आहे;" त्याप्रमाणें कोण त्याहि विशेष कारणानें चिद्रूपीजीवाचा वध कां होऊं नये अशाबद्दल सांगतातः—या चिद्रूपीजीवाला शस्त्रें कापीत नाहींत, अग्नि जाळीत नाहीं, उदक भिजवीत नाहीं आणि वायु सुकवीत नाहीं. ॥ २३ ॥ या जीवास वर्तमानकाळीं नाश नसला तरी पुढें नाश होईल अशी शंका येईल ह्मणून तिचें निवारण करितात. किंवा परमात्म्याचा सच्चिदानंदात्मक देह जीवांच्या प्राकृत देहाप्रमाणें नष्ट होतो कीं काय अशी अज्ञजनांस शंका येईल ह्मणून सद्देह, सुखगंध, ज्ञानप्रकाश, सत्पराक्रम अशा अक्षररूपी विश्वनियंत्या ईश्वराच्या देहाचा नाश कालत्रयींहि होत नाहीं अशा हेतूनें सांगतातः-जीव कापला जाणार नाहीं, जाळला जाणार नाहीं, मऊ केला जाणार नाहीं, आणि सुकविला जाणार नाहीं. सर्वदा सर्व वस्तूंमध्यें असणारा परमात्मा कोणासहि पूर्णपणें ज्ञानविषय नसला तरी त्याचा प्रतिबिंबभूत असा जीव ज्ञानीजनास दिसला तरी तो जीव सर्वव्यापी ईश्वराचें प्रतिबिंबच होय. यावरून जीव हा छेदरहित परमात्म्याचा प्रतिबिंब असल्यानें हा जीव छेदादि करण्यास अयोग्य आहे असें समजून तूं दुःख करण्याचें सोडून दे. ॥ २४ ॥

अव्यक्तोऽयमचिन्त्योऽयमविकार्योऽयमुच्यते ।
तस्मादेवं विदित्वैनं नानुशोचितुमर्हसि ॥ २५ ॥

नन्वणोर्जीवस्याधारः परमात्मा सर्वगतश्चेत्किमिति तथा न दृश्यत इत्यत आह । अव्यक्त इति । कथमेतद्युज्यते अचिंत्यशक्तित्वात् नच सा शक्तिः कदाचिदन्यथा भवति अविकार्यत्वात् । यानियान्यस्य रूपाणि तानि सर्वाण्येवंभूतानीति दर्शयितुमेनमयमित्यादिपृथग्वचनं । तदुक्तं । प्रादुर्भावादिरूपेषु मूलरूपेषु सर्वशः । न विशेषोस्ति सामर्थ्ये गुणेष्वपि कदाचनेति । जीवेतु सर्वजीवेष्वनुगमार्थं पृथग्वचनं । एवमव्यक्ताचिंत्यादिरूपेण ज्ञातः परमेश्वरः सर्वदुःखनाशं करोतीति नानुशोचितुमर्हसि ॥ २५ ॥

अणुपरिमाणयुक्त जीवास आधारभूत असणारा असा परमात्मा सर्व व्याप्त आहे तर तो परमात्मा दृष्टिगोचर कां होत नाहीं याविषयीं सांगतात:— हे अर्जुना, परमात्मा दृष्टिगोचर नसून, लोकांस चिंतन करण्यास अशक्य आहे व विकाररहितहि आहे, हें स्पष्ट आहे. व अशा प्रकारचें ईश्वराचें ज्ञान असून व त्या ईश्वरापासूनच सर्व दुःखांचा नाश होणार असें माहीत असल्या-मुळें तुझ्यासारख्यानें शोक करणें योग्य नव्हे. जीव नित्य आहे तरी तो देहसंबंधरूप जन्म पावत असल्यानें व देहवियोगरूप मरण पावत असल्यानें तन्निमित्त दुःख माझ्या बांधवांस होईल असें समजून तूं शोक करीत असल्यास ती शंका निवारणार्थ सांगतो. ॥ २५ ॥

अथ चैनं नित्यजातं नित्यं वा मन्यसे मृतम् ॥
तथापि त्वं महाबाहो नैवं शोचितुमर्हसि ॥ २६ ॥

अस्त्वेवमात्मनो नित्यत्वं तथापि देहसंयोगवियोगात्मकजनिमृती-स्तएव तन्निमित्तंच दुःखं मदीयानां भविष्यतीति मे शोक इत्यत आह। अथचेति । नित्यं सनातनं प्रोक्तं नित्यं नियतमेवचेत्यभिधानात् । अत्र नित्यशब्देन नियतं गृह्यते । जातस्यहि ध्रुव इति प्रकाशनात् ।

यदि यावन्मोक्षं जीवस्य जन्ममरणे नियते इति स्वयमेव मन्यसे तथापि तावन्मात्रेणापि ज्ञानेन शोचितुं नार्हसि ॥ २६ ॥

हे अर्जुना, जीव हा नित्य असून प्राकृतदेहसंबंधानें जनन पावतो, तसेंच तो जीवदेह वियोगरूप मरण पावतो, असें तूं जाणतोस ना? व असें जाणत असशील तर त्या जीवांना नियमानें होणाऱ्या जननमरणाविषयीं शोक करणें तुला योग्य नाहीं. ॥ २६ ॥

जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च ।
तस्मादपरिहार्येऽर्थे न त्वं शोचितुमर्हसि ॥ २७ ॥

कुतोऽशोक इत्यतो नियतत्वादित्याह । जातस्येति ॥ २७ ॥

हे अर्जुना, ज्या जीवाला प्राकृतदेहसंबंधरूप जनन आहे, त्याला तद्वियोगरूप मरणहि निश्चित आहेच. कोणत्याहि प्रयत्नानें जर तें चुकवितां येत नाहीं तर त्याविषयीं दुःख करण्यास तूं कसा योग्य होसील बरें? ॥ २७ ॥

अव्यक्तादीनि भूतानि व्यक्तमध्यानि भारत ।
अव्यक्तनिधनान्येव तत्र का परिदेवना ॥ २८ ॥

एतदेव जन्ममरणस्वरूपनिरूपणेन स्पष्टयति । अव्यक्तादीनीति । अव्यक्तं प्रधानमादिरुत्पत्तेः पूर्वं रूपं येषां तानि अव्यक्तादीनि । भूतानि शरीराणि । व्यक्तमभिव्यक्तं मध्यं जन्ममरणांतरालस्थितिलक्षणं येषां तानि । अव्यक्ते निधनं लयो येषां तानीमान्येवंभूतान्येव तत्र तेषु का परिदेवना । कःशोकनिमित्तः प्रलापः । अथवा अव्यक्तमदर्शनमादिः प्रादुर्भावावधिर्येषां व्यक्तं दर्शनं मध्यस्थितिर्येषां तानीत्यादि व्याख्येयं । तदुक्तं । अदर्शनादिहायातः पुनश्चादर्शनं गतः । त्वंचाहंचापि राजेंद्रततः किमनुशोचसीति ॥ २८ ॥

जनन किंवा मरण ह्मणजे काय हें स्पष्ट समजल्यास शोक करण्याचें कारण राहणार नाहीं. याकरितां जननमरणाचीं लक्षणें सांगतों—हे अर्जुना, हे सर्व प्राणी प्रकृतिजन्यदेहसंबंधानें जन्म पावणारे, तसेंच त्या देहवियोगानें मरण पावणारे आहेत. शिवाय मध्यंतरीं संसारांत उत्पन्न होणारीं सुखदुःखेंहि देहसंबंधानेंच होतात. मग अशाविषयीं शोक कशाला? ॥ २८ ॥

आश्चर्यवत्पश्यति कश्चिदेन-
माश्चर्यवद्वदति तथैव चान्यः ।
आश्चर्यवच्चैनमन्यः शृणोति
श्रुत्वाऽप्येनं वेद न चैव कश्चित् ॥ २९ ॥

देहयोगवियोगयोर्नित्यत्वादात्मनश्चेश्वरप्रतिबिंबत्वात् सर्वथा नाशाभावान्नशोकःकार्यइत्युपसंहर्तुमैश्वरं सामर्थ्यं पुनर्दर्शयति । आश्चर्यवदिति । एनं जीवं यःकश्चित्पश्यति सःआश्चर्यवत् दुर्लभ इत्यर्थः एवमाश्चर्यवद्वदतीत्यादि योज्यं । सर्वेषामप्यात्मदर्शनादिमत्वात्कथमस्य दर्शनादिमान्दुर्लभ इत्यत उक्तम् । श्रुत्वेति । उक्ताद्दृष्ट्वा चेत्यपि ग्राह्यं । तथाच सर्वेषां सामान्यतो दर्शनादौ सत्यपि सम्यग्ज्ञानाभावात्तद्दर्शनादिमान्दुर्लभ इति भावः ॥ २९ ॥

जीवास प्राकृत देहाचा योग व वियोग हे नियमानें आहेतच. परंतु जीव हा परम नित्य ईश्वराचा प्रतिबिंब असल्यानें त्यास कदापि नाश नाहीं. यास्तव शोक करूं नये असें बोलून बिंबभूत ईश्वरीय सामर्थ्य सांगण्याविषयीं प्रथमतः तत्प्रतिबिंबभूत जीवगणाचें सामर्थ्य वर्णन करितात. या जीवास पाहणारा किंवा वर्णन करणारा आणि याचे गुण श्रवण करणारा दुर्लभ जाणावा. यद्यपि श्रवणादि केलें तरी ज्याचें स्वरूपज्ञान साकल्यानें कोणासही होत नाहीं, ज्या आनंदरूपी परमात्म्याचा प्रतिबिंबभूत जीव झाल्यानेंच ह्या तऱ्हेचे चमत्कार त्या जीवाचे अंगीं आहेत ते काय वर्णावे ? ज्या परमात्म्याची अपरिमित शक्ति, जो सर्व जीवांना आश्चर्यवंत किंवा सुज्ञानी करण्यास कारणीभूत, तोच परमात्मा असदृश, आश्चर्यवंत किंवा परमनित्य ज्ञानी होय. याविरुद्ध जाणणें हें नित्य दुःखानुभवास योग्य अशा असुरसमुदायावांचून इतरांस होणार नाहीं.

देही नित्यमवध्योऽयं देहे सर्वस्य भारत ।
तस्मात्सर्वाणि भूतानि न त्वं शोचितुमर्हसि ॥३०॥

यदेतज्जीवनित्यत्वमुक्तं तदपीश्वराधीनं यत्प्रतिबिंबदर्शनादिमान्दुर्लभः किं तत्सामर्थ्यं वर्णनीयमिति ईश्वरसामर्थ्यं दर्शितम् । इदानीमुपसंहरति । देहीति । अथवा अथचैनमित्यादिना जीवस्यास्वातंत्र्यमुपपादयितुं जननियमवत्वमुच्यते । तस्मान्न जीवआश्चर्यभूतः किंतर्हि भगवानेवेत्याह । आश्चर्यवदिति । आश्चर्यमेव संतमेनमाश्चर्यवत्पश्यति । नपुनरनाश्चर्यं । गगनं गगनाकारं सागरं सागरोपम इत्यादिवत् । उक्तंच । आश्चर्यो भगवान् विष्णुर्यस्मान्नैतादृशः क्वचित् । तस्मात्तद्गोचरं ज्ञानं तद्गोचरवदेवत्विति । अनाश्चर्यवदसुरादयः पश्यंतीति कश्चिदिति विशेषणम् । न स्वसामर्थ्यायत्तमित्याह । देहीति । देही नित्यमवध्यः यतोयमीश्वरः सर्वस्य जीवस्य सूक्ष्मे स्थूलेच देहे रक्षकत्वेनावस्थितः । तदुक्तं भागवते । द्रव्यं कर्मच कालश्च स्वभावो जीव एवच । यदनुग्रहतः सन्ति न संति यदुपेक्षयेति ॥ ३० ॥

यापूर्वी जीवास चिद्रूपानें जें नित्यत्व सांगितलें आहे तें परमनित्य ईश्वराधीन आहे असें सांगतातः—या स्थूल, सूक्ष्म देहांत अभिमानसंबंधानें असलेला जीव हा वध करण्यास अशक्य आहे. कारण त्या जीवाच्या रक्षणाविषयीं परमात्मा असंग राहून आपल्या अभिन्न अंशानें अनेक रूपें घेऊन त्या त्या ठिकाणीं त्या जीवाचें रक्षण करितो. जर त्या ईश्वराकडून उपेक्षा होईल तर द्रव्य, कर्म, काळ, स्वभाव, जीव हे कधींहि असूं शकणार नाहींत. याकरितां तुला या अशा जीवाबद्दल शोक करणें योग्य नव्हे. ॥ ३० ॥

स्वधर्ममपि चावेक्ष्य न विकंपितुमर्हसि ।
धर्म्याद्धि युद्धाच्छ्रेयोऽन्यत्क्षत्रियस्य न विद्यते ॥ ३१ ॥

न केवलमात्मनो नित्यत्वादशोकः किंतर्हि इत्यत आह । स्वधर्ममिति । धर्मादनपेतात् न्यायप्रवृत्ताद्युध्दादन्यच्छ्रेयः क्षत्रियस्य नास्ति । ३१ ।

शिवाय जीव नित्य आहे ह्या एकाच कारणावरून शोक करूं नये एवढेंच नाहीं तर शोक न करण्यास दुसरेंही कारण आहे. याविषयीं सांगतातः— हे अर्जुना, तूं क्षत्रियकुलोत्पन्न असल्यामुळें स्वधर्मास उचित अशा शत्रुसंहारा-

विषयीं भिऊन थरथरां कापणें तुला योग्य नव्हे. क्षत्रियांस धर्मसाधनभूत युद्धावांचून श्रेयस्कर व श्रेष्ठ असें दुसरें साधन नाहीं. ॥ ३१ ॥

यदृच्छया चोपपन्नं स्वर्गद्वारमपावृतम् ।
सुखिनः क्षत्रियाः पार्थ लभंते युद्धमीदृशम् ॥ ३२ ॥

किंच स्वयमेव महति श्रेयसि प्राप्ते विलंबोनुचित इत्याह । यदृच्छयेति । अयत्नोपपन्नमिदं निरतिशयसुखोपायभूतमपगताविघ्नावरणमीदृशं युद्धं सुखिनः पुण्यवंतः क्षत्रिया लभंते ॥ ३२ ॥

अनायासानें प्राप्त झालेलें युद्धरूप श्रेय संपादण्याविषयीं उपेक्षा करणें योग्य नव्हे याविषयीं सांगतातः—अर्जुना, अनायासें भगवदिच्छेनें प्राप्त झालेला वीरस्वर्गरूप, अनुपम सुखाला कारणीभूत, प्रतिबिंबरहित केवळ स्वर्गद्वारसमान अशा तऱ्हेचा असणारा युद्धप्रसंग स्वर्गसुख भोगण्यासाठीं क्षत्रियासच प्राप्त होतो. ॥ ३२ ॥

अथ चेत्त्वमिमं धर्म्यं संग्रामं न करिष्यसि ।
ततः स्वधर्मं कीर्तिं च हित्वा पापमवाप्स्यसि ॥ ३३ ॥

युद्धाकरणे दोषमाह । अथचेदिति ॥ ३३ ॥

क्षत्रिय असून युद्ध करीत नसल्यास उलट तो दोषीहि होतो अशा हेतूनें बोलतातः—क्षत्रियास पुण्यसाधनभूत असें हें युद्ध न करशील तर वडिलोपार्जित विमल कीर्तीला मुकून उलट पाप पावशील. ॥ ३३ ॥

अकीर्तिं चापि भूतानि कथयिष्यंति तेऽव्ययाम् ।
संभावितस्य चाकीर्तिर्मरणादतिरिच्यते ॥ ३४ ॥

न केवलं धर्मादिहानिः पापावाप्तिश्च किंतर्हीत्यत आह । अकीर्तिंचेति । अव्ययां शाश्वतीम् । ततः किमित्यत आह । संभावितस्येति । बहुमतस्य अधिका भवति ॥ ३४ ॥

कारण क्षत्रियोचित युद्ध न केल्यानें केवळ धर्मादि हानि किंवा पापप्राप्ति होते इतकेंच नव्हे तर दुर्धर अशी अपकीर्ति प्राप्त होईल. ती अशी

कीं, लोक सर्व जगभर तुझी अपकीर्ति गातील. प्रतिष्ठित मनुष्यास अपकीर्ति ही मरणापेक्षांहि दुःखकारक आहे. ॥ ३५ ॥

भयाद्रणादुपरतं मंस्यंते त्वां महारथाः ।
येषां च त्वं बहुमतो भूत्वा यास्यसि लाघवम् ॥३५॥

बंधुस्नेहात्कारुण्याच्च युद्धान्निवृत्तस्य शूरस्याकीर्तिः कथमागमिष्यतीत्यत आह । भयादिति । येषां पूर्वं बहुगुणत्वेन संमतोभूः तएव संग्रामात्वां भयान्निवृत्तं मन्येरन् । ततश्च पूर्वं बहुमतो भूत्वा लाघवं यास्यसि ॥ ३५ ॥

बंधुस्नेहनिमित्तानें मी युद्धापासून निवृत्त झाल्यास मला ती अपकीर्ति कशी लागेल, अशा शंकेच्या निवृत्त्यर्थ ह्मणतातः—शत्रुपक्षीय सर्व महारथिक तूं या रणांगणांतून भिऊनच पळालास असें ह्मणतील, आणि जे तुला आजपर्यंत बहुमान देत होते तेच तुला अगदीं तुच्छ मानतील. ३५

अवाच्यवादांश्च बहून्वदिष्यंति तवाहिताः ।
निन्दन्तस्तव सामर्थ्यं ततो दुःखतरं नु किम् ॥ ३६॥

किंच । अवाच्यवादान् वचनानर्हानहिताः शत्रवो वदिष्यंति ॥३६॥

एवढेंच नव्हे तर अयशस्कर अशीं पुष्कळ प्रकारचीं दुर्वचनेंहि श्रवण करण्याचें तुला भाग पडून महत्तर दुःख प्राप्त होईल. तें असें—तुझे शत्रू जे दुर्योधनादिक ते तुझ्या सामर्थ्याची निंदा करून, बोलण्यास अयोग्य अशींहि वचनें बोलतील. यापेक्षां अधिक दुःख तें कोणतें ? ॥ ३६ ॥

हतो वा प्राप्स्यसि स्वर्गं जित्वा वा भोक्ष्यसे महीम् ।
तस्मादुत्तिष्ठ कौन्तेय युद्धाय कृतनिश्चयः ॥ ३७ ॥

यच्चोक्तं जयश्च संदिग्ध इति तत्र पक्षद्वयेपि न हानिरित्याह । हतइति । जित्वा महीं स्वर्गंच भोक्ष्यसे । ये युध्यंते प्रधनेषु इति ऋग्वेदे ॥ ३७ ॥

'या युद्धांत माझा जय होईल किंवा पराजय होईल याबद्दल मला

संशयच आहे' असें जें अर्जुन पूर्वी बोलला होता त्याबद्दल ह्मणतातः— शत्रूंनीं तुला युद्धांत मारलें तर तुला वीरस्वर्गसुख मिळेल. तूं त्यांस जिंकिलेंस तर तुला इहलोकांत राज्यसुखानुभव मिळून अंतीं स्वर्गसुखहि मिळेल. याकरितां हे कुंतीपुत्रा, युद्ध करण्याचा निश्चय करून युद्धास उभा रहा. ॥ ३७ ॥

सुखदुःखे समे कृत्वा लाभालाभौ जयाजयौ ।
ततो युद्धाय युज्यस्व नैवं पापमवाप्स्यसि ॥ ३८ ॥

मुमुक्षोर्युध्दानुष्ठानप्रकारमाह । सुखदुःखे इति । द्वंद्वसहिष्णुः सन् युध्दाय यतस्व । एवंसति पापं पापफलं संसारदुःखं नावाप्स्यसि ॥ ३८ ॥

भगवदर्पणबुद्धीनें युद्ध करून क्षत्रियांनीं मुक्त होण्याचा प्रकार सांगतातः— सुखदुःख, लाभालाभ, जयापजय इत्यादि द्वंद्वजनित फलाविषयीं निरिच्छ राहून तूं युद्ध करण्यास सिद्ध हो. ह्मणजे पापफलरूप संसारदुःख तुला प्राप्त होणार नाहीं. ॥ ३८ ॥

एषा तेऽभिहिता सांख्ये बुद्धिर्योगे त्विमां शृणु ।
बुद्ध्या युक्तो यया पार्थ कर्मबंधं प्रहास्यसि ॥ ३९ ॥

उपदिष्टज्ञानयोगोपसंहारपूर्वकं तदुपायं फलवत्कर्मसमाधियोगं वक्तुं प्रतिजानीते । एषेति । सम्यक् ख्यातिर्ज्ञानं सांख्यं युज्यतेऽनेनेतियोगस्तदुपायः । सम्यक्तत्वदृशिः सांख्यं योगस्तत्साधनं स्मृतमित्यभिधानात् । अथवा परमसांख्ययोगशास्त्रे गृह्येते नेतरे वेदबाह्ये तयोर्हेयत्वात् । सांख्यस्य निरीश्वरत्वात् । अत्रच ईश्वरस्य उक्तत्वात् । सांख्ययोगैश्च विहितहिंसायाअप्यनर्थहेतुत्वांगीकारात् । अत्रच कर्मबंधं प्रहास्यसीति मोक्षार्थत्वेनैव युद्धविधानात् । तदुक्तम् । उक्तंच परमं सांख्यं कपिलाख्येन विष्णुना । सेश्वरं वैदिकं साक्षाद्धेयमन्यदवैदिकमिति । बुद्ध्यते नयेति बुद्धिः । आत्मतत्वज्ञानविषये यथा बोधो भवति तथैवैषा वागभिहिता । योगे त्विमां वक्ष्यमाणां शृणु । यया बुद्ध्या युक्तोऽनभिसंधितफलेश्वरार्पितधर्मानुष्ठानादंतः करणशुद्धिः परमात्मसाक्षात्कारेण कर्मबंधं संसारं प्रकर्षेण हास्यसि त्यक्ष्यसीति ।३९।

येथपर्यंत उपदेशिलेल्या ज्ञानयोगाची समाप्ति करून तदुपायरूप फल असलेला कर्मसमाधियोग सांगण्यास प्रारंभ करितात:—परमात्मतत्वज्ञानाचे ठिकाणीं जशी तुझी बुद्धी जडेल तसा तुला हा कालपर्यंत उपदेश केला. आतां त्या परमात्मज्ञानाला उपयोगीं अशी कर्मविषयक बुद्धि सांगतों. ज्या बुद्धीनें निष्कामपूर्वक आपण केलेलें सत्कर्म परमात्म्याला अर्पण केलें असतां अंत:करणशुद्धि होऊन त्यानंतर होणाऱ्या ज्ञानानें परमात्मसाक्षात्कारद्वारा तूं कर्मबंधनरूप संसारदु:खापासून दूर होशील. येथें सांख्य किंवा योग शब्दानें श्रीनारायणाचा अवतार कपिलमहामुनिप्रणीत यथार्थज्ञानसाधनरूप सांख्यशास्त्र किंवा तत्साधनभूत योगशास्त्र हेंच घ्यावें. निरीश्वरवादिप्रणीत सांख्य किंवा योगशास्त्र घेऊं नये. कारण तें निरीश्वर असून वेदोक्त जी यज्ञांतील पशुहिंसा तीहि त्यांत अनर्थकारक सांगितली आहे. येथें वरील सांख्य किंवा भगवज्ज्ञानयोग याचे ज्ञानानें कर्मबंधनरूप संसारापासून मुक्त होऊन, नित्यसुखात्मक व मुक्तिरूप जो परलोक तो ईश्वरप्रसादानें प्राप्त होतो, असें श्रीकृष्णानें सांगितल्यावरून ईश्वर किंवा परलोक नाहीं असें सांगणारीं सांख्ययोगशास्त्रें उपयोगी नाहींत ॥ ३९ ॥

नेहाभिक्रमनाशोऽस्ति प्रत्यवायो न विद्यते ।
स्वल्पमप्यस्य धर्मस्य त्रायते महतो भयात् ॥ ४० ॥

तदेवोपपादयति । नेहेति । इह निष्कामविष्ण्वर्पणार्थे वैष्णवकर्मयोगेभिक्रमस्योपक्रमस्य नाशो निष्फलत्वं नास्ति । उपक्रांतस्य विच्छेदे तदन्य धर्माकरणेवा प्रत्यवायो न गम्यते । अस्य वैष्णवधर्मस्य स्वल्पांशोपि संसाराद्रक्षति ॥ उक्तंच । प्रारंभमात्रमिच्छावा विष्णुधर्मे न निष्फला । नचान्यधर्माकरणाद्दोषवान् विष्णुधर्मकृत् । स्वोचितेनैव धर्मेण विष्णुपूजामृते क्वचित् । नाप्रवृत्तिः प्रवृत्तिर्वा यत्रधर्मः स वैष्णवः ४०

मागें सांगितलेल्या ज्ञानसाधनीभूत कर्मयोगाचें वैशिष्ट्यपूर्वक फल सांगतात. हे अर्जुना, श्रीविष्णुप्रीत्यर्थ कृतनिष्काम वैष्णव धर्मरूप ह्या कर्मयोगाचा प्रारंभ करून मध्येंच नष्ट झाला तरी कृतधर्म निष्फळ होत नसून सफल होतो. तोच धर्म प्रारंभ करून विच्छिन्न झाला असतां व एखादा अन्य धर्म न केला तरी

दोष नाहीं. व ह्या श्रीमत्परमात्मप्रिय अशा वैष्णव धर्माचा लेशमात्र अंगांत असला तरी तो या प्राण्याला महत्तर व दुस्तर अशा संसारगव्हरभयापासून रक्षण करितो. या दुर्भग जीवाकडून परमपूज्य वैष्णव धर्माचें आचरण संपूर्णपणे झालें नसलें तरी आपल्या आचरणाच्या इच्छामात्रानेंच स्वप्रिय परमात्म्याकडून लोकमनोभिष्ट सिद्ध करणारा तो जीव असदृश व परमपूज्य होतो ॥ ४० ॥

व्यवसायात्मिका बुद्धिरेकेह कुरुनंदन ।
बहुशाखा ह्यनंताश्च बुद्धयोऽव्यवसायिनाम् ॥ ४१ ॥

योगेत्विमां बुद्धिं श्रुण्वित्यनेन विष्णुनिष्ठाभावे श्रवणमात्रस्य वैयर्थ्याच्छ्रुत्वा तत्र निष्ठां कुर्वित्यभिप्रेतम् तत्र बह्व्योहि बुद्धयो मतभेदात्तत्कथमेकत्रनिष्ठां करोमीत्यत आह । व्यवसायात्मिकेति । प्रमाण निर्णीतार्थविषया विष्णुपरायणा बुद्धिरेकैव । अव्यवसायिनां प्रमाणैर्निर्णेतुमशक्तानां बुद्धयो बहुशाखा ह्यनंताश्च । अतः प्रामाणिकेर्थे विश्वासो युज्यते । अप्रामाणिके सत्यपि विप्रतिपत्तिः किमपि न करोतीति भावः ॥ ४१ ॥

एतावता सांख्य किंवा योगशास्त्र सांगून त्यांतील वैष्णव धर्माचरण श्रद्धापूर्वक कर असें ह्मणण्याचा अभिप्राय दाखविला तर त्या त्या मतभेदानें वेदांचे अर्थही अनेक प्रकारचे होत असल्यानें यांतच कशी निष्ठा ठेवावी अशी शंका येईल तर त्याची निवृत्ति सांगतातः—हे कुरुकुलोत्पन्न अर्जुना, वेद-वेदांग शास्त्रांचे ठायीं प्रमाणानिश्चित वैष्णव धर्म विष्णुपरायण बुद्धिनिश्चयात्मक असून एकच होय. सच्छास्त्राधार मुळींच नसून केवळ स्वकपोलकल्पित अशा त्या त्या मताप्रमाणें अनिश्चितार्थ, परस्परविरुद्ध व भिन्नाभिन्न भावाला पोहोंचलेले मतभेद अनेक असतात. तूं श्रद्धापूर्वक व निश्चयात्मक बुद्धीनें वैष्णवधर्मनिष्ठ झालास तर तुला ते मतिभेद काय करूं शकणार आहेत ? ॥ ४१ ॥

यामिमां पुष्पितां वाचं प्रवदंत्यविपश्चितः ।
वेदवादरताः पार्थ नान्यदस्तीति वादिनः ॥ ४२ ॥

नन्ववैदिकमतानामप्रामाणिकत्वात् माभूतेषु विश्वासः वैदिकेषु निष्ठा

कथं स्यात् यतो वैदिका अपि केचित्कर्माणि स्वर्गादिफलान्येवाहुरित्यत आह । यामिमामिति । यां प्रवदंति तयेत्यन्वयः वेदवादरताः वेदैर्यन्मुखतउच्यते कर्मादिकं तत्रैव रताः । वादो विवादः संप्रोक्तो वादो वचनमेवच । वेदोक्त विष्णुमाहात्म्ये विवादात्पठनादपि । अथवा निरर्थकात्पाठाद्वेदवादी स उच्यते । वेदवादरतो नस्यान्नपाषंडी न हैतुकीत्यादिलक्षणाः । अन्यद्विष्णुसामीप्यादिरूपं मोक्षाख्यं फलं फलप्रदं विष्णवाख्यं ब्रह्मच नास्तीति वादिनः ॥ ४२ ॥

पूर्वीप्रमाणें वेदाविरुद्ध मताविषयीं उपेक्षाबुद्धि स्विकारिली तरी वेदांतच कित्येक ठिकाणीं कर्ममार्ग श्रेष्ठ आहे असें सांगितल्यावरून ज्ञानच श्रेष्ठ कसें याबद्दल सांगतात–वेदांचा चांगल्या विचारानें मुख्यार्थ न समजतां भलताच अर्थ समजून सामीप्यादि मोक्ष किंवा मोक्ष देणारा परमात्माहि नाहीं असें बडबडणारे कर्मफलवादी स्वर्गप्राप्ति हाच काय तो पुरुषार्थ अशीं वचनें पुष्पाप्रमाणें फुलवून बोलतात. परंतु ते वेदार्थतत्व समजणारे नव्हेत असें समजावें. ४२

कामात्मानः स्वर्गपरा जन्मकर्मफलप्रदाम् ।
क्रियाविशेषबहुलां भोगैश्वर्यगतिं प्रति ॥ ४३ ॥

कामात्मानो भोगचित्ताः स्वर्गपराः स्वर्गएव परः पुरुषार्थ इति मन्यमानाः न विपश्चितः पुष्पितां मोक्षफलमपेक्ष्य स्वर्गादिपुष्पयुक्तां जन्मादिबहुसंसारफलप्रदां संततकर्मविशेषबहुलां यामिमां वाचं वेदात्मिकां भोगैश्वर्यगतिं तत्प्राप्तिंप्रति वदंति भोगैश्वर्यप्राप्त्यर्था एव वेदा इति वदंतीत्यर्थः ॥ ४३ ॥

पूर्वीं सांगितल्याप्रमाणें परमात्म्याविषयीं यथार्थ ज्ञान नसून, कर्मांचे ठायीं आसक्तचित्त होऊन, अनित्य अशा स्वर्गसुखाची इच्छा करणाऱ्यास वेद हे स्वर्गसाधन–प्रतिपादक आहेत असे भासतात. याविषयीं सांगतातः–विषयदूषित अंतःकरणामुळें स्वर्गसुखालाच परमपुरुषार्थ मानणारे अज्ञ लोक वेदार्थाचा लेशहि जाणत नसून वेदांत विस्तारानें वर्णिलेले जे क्रियाविशेष ते जन्ममरणरूप अशा संसारफलाला कारणीभूत व भोगैश्वर्यप्राप्तीला प्रतिपादक आहेत असें ह्मणतात. तर त्याविषयीं तूं विश्वास ठेवूं नको. ॥ ४३ ॥

भोगैश्वर्यप्रसक्तानां तयापहृतचेतसाम् ।
व्यवसायात्मिकाबुद्धिः समाधौ न विधीयते ॥४४॥

तया वाचाप्यपहृतचित्तानां भोगैश्वर्ययोरासक्तानां सम्यक् प्रमाणनिर्णीता बुद्धिः समाधौ समाध्यर्थे न विधीयते । सम्यक् निर्णीतार्थानांहीश्वरे मोक्षसाधनं मनः समाधानं सम्यग्भवति नान्येषामित्यर्थः । अथवा अव्यवसायिबुद्धयो बहुविधा इत्युक्तम् । ताश्च कथं केषां भवंतीत्यत आह । यामिति । यां वाचं प्रवदंति तयापहृतचेतसां मोहितज्ञानानां बुद्धिर्व्यवसायात्मकत्वेन समाधौ न विधीयते । समाधिः समाधानं समास्थितिरिति ॥ ४४ ॥

तर त्यालाहि वैष्णवधर्मपर व निश्चयात्मक अशी बुद्धि कां होत नाहीं याविषयीं सांगतातः—केवळ नित्यानित्यवस्तुविवेकज्ञानशून्य होऊन, अनुभवास रमणीय वाटणाऱ्या स्रक्चंदनवनितादि विषयसुखांत आसक्त होऊन, विषासमान असणाऱ्या विषयसुखांतच ज्याचें चित्त गुंगलें आहे अशा पुरुषास, परमसुखाचें साधन व भगवत्प्रसाद उत्पन्न करणारी अशी विष्णुप्रिय व वैष्णवरूप निश्चयात्मक बुद्धि कदापि होत नाहीं. ॥ ४४ ॥

त्रैगुण्यविषया वेदा निस्त्रैगुण्यो भवार्जुन ।
निर्द्वंद्वो नित्यसत्वस्थो निर्योगक्षेम आत्मवान् ४५

प्रतिज्ञातां योगबुद्धिमाह । त्रैगुण्यविषया वेदा इत्यादिना । वेदाः परोक्षार्थत्वादापाततस्त्रिगुणसंबंधिस्वर्गादिप्रतिपादकाइव प्रतीयंते । वादोविषयकृत्वंच मुखतो वचनं स्मृतमित्यभिधानात् । अतो निस्त्रैगुण्यो भव । प्रातीतिकार्थे भ्रांतिं मा कार्षीरिति व्याख्येयम् । नतु वेदपक्षो निषिध्यते । सर्वे वेदा यत्पदमामनंति इत्यादिना वेदानां सर्वात्मना विष्णुपरत्वोक्तेः । वेदप्रणिहितोधर्मो ह्यधर्मस्तद्विपर्यय इत्यादिना भागवते वेदाविहिताविहितस्य धर्माधर्मत्वोक्तेश्च । अथवा त्रैगुण्याख्यं विषं यापयंत्यपगमयंतीति त्रैगुण्यविषया वेदा अतस्तानाश्रित्य निस्त्रैगुण्यो भवेति । तदुक्तं । आश्रित्य वेदांस्तु पुमांस्त्रैगुण्य-

विषहारिणः। निस्त्रैगुण्यो भवेन्नित्यं वासुदेवैकसंश्रयइति। निर्द्वंद्वो द्वंद्वसहिष्णुः भवेति सर्वत्रान्वयः। सत्वं विष्णुः। भावभवित्रोरभेदात्। सत्वं साधुगुणाद्विष्णुरात्मासंततिहेतुत इत्युक्तेः। नित्यं सत्वे स्थितः सततं विष्णुस्मरणवान्। अलब्धस्य लाभो योगः लब्धस्य रक्षणं क्षेमः। तौ देहनिर्वाहाविरोधेन नेच्छतीति निर्योगक्षेमः। आत्मवान् परमात्मा मम स्वामीति ज्ञानवान्। तेनैक्यज्ञानं निवारयति ॥ ४५ ॥

मागें सांगितलेली कर्मबुद्धि सविस्तर वर्णितात. हे **अर्जुना**, वेदहि आपाततः (विषयासक्तचित्तानें पाहिलें असतां) सत्वरजतमोगुणात्मक, अनित्य व स्वर्गादिसुख हाच पुरुषार्थ आहे असें सांगणारे आहेत, असें दिसतें. परंतु त्यांत विचारपूर्वक पाहिलें असतां सर्व प्रकारें ते वेद भगवद्गुणप्रतिपादकच आहेत. याकरितां तूं अविचारानें रमणीय अशा विषयाला लुब्ध होऊन वेद हेच मुख्यत्वानें कर्माचें प्रतिपादन करणारे आहेत असें समजूं नको. असें आहे तर वेद खोटें बोलतात असें होईल. तर तसें नसून त्यांविषयीं अज्ञान, लोकांस असा भास होतो. वेदांतील वेदार्थाचें मर्म जाणणारे दीर्घदर्शी लोक वेद हा सर्व प्रकारें विष्णुप्रतिपादकच आहे असें समजतात. याकरितां आपण सर्वकाळ साधुगुणयुक्त अशा परमात्म्याचे आधीन आहों, असें तूं समज व अदृष्टवशात् प्राप्त झालेलीं तत्कालीन सुखदुःखादि द्वंद्वें सहन कर आणि अलब्धलाभरूप योग आणि लब्धरक्षणरूप क्षेम या दोहोंच्या खटपटींत पडूं नकोस. एकंदरींत तूं असें समज कीं, आत्मवान् ह्मणजे माझा स्वामी परमश्रेष्ठ असा परमात्माच होय. अज्ञजनाप्रमाणें स्वातंत्र्यादि अनेक गुणानीं पूर्ण अशा परमात्म्याचें केवळ दुःखाचाच उपभोग घेण्यास योग्य अशा जीवाशीं तूं कदापि ऐक्य मानूं नको. ॥ ४५ ॥

यावानर्थ उदपाने सर्वतः संप्लुतोदके ।
तावान्सर्वेषु वेदेषु ब्राम्हणस्य विजानतः ॥ ४६ ॥

ननु यथा सकामानां समाध्यभावेन ज्ञानाभावान्मोक्षो न भवति। तथा निष्कामानां ज्ञानिनां स्वर्गफलं न भवतीति साम्यमेवेत्यत आह। यावानिति। यथातथा शब्दावध्याहार्यौ यावांस्तावा-

नित्येतयोरावृत्तिः। यथा यावानर्थः प्रयोजनमुदपाने कूपे भवति तावान्सर्वतः संप्लुतोदके भवत्येव तथा सर्वेषु वेदेषु काम्यकर्मिणां यत्फलं तद्विजानतो ज्ञानिनो ब्राह्मणस्य फलेंतर्भवति। ब्रह्म अणतीति ब्राह्मणः। अपरोक्षज्ञानी सहि ब्रह्म गच्छति। अपरोक्ष ज्ञानसाधनं दर्शयति। विजानत इति। अथवा त्रैगुण्यनिवृत्यर्थं वेदाश्रयणं कार्यमित्यत्र हेतुमाह। यावानिति। सर्वतः संप्लुतं व्याप्तमुदकं यस्मिन् प्रलये स सर्वतः संप्लुतोदकः प्रकृतिर्बुदरूपेण सर्वमावृत्य तिष्ठति। प्रलयेतोलयंप्राहुः सर्वतः संप्लुतोदकमितिवचनात्। तस्मिन्प्रलयेप्युद्रिक्तत्वात्। पालकवर्जितत्वात्। कालाद्यखिलचेष्टकत्वात्। उदपानो विष्णुः उद्रेकात्पातृराहित्यादनत्वाच्चाखिलस्य च। प्रलयेप्युदपानोसौ भगवान्हरिरीश्वरइतिवचनात्। तस्मिन्प्रलये यावत्फलं तावत्सर्ववेदेषु विशेषज्ञानी यः तस्यैव भवतीत्यर्थः। उक्तंच। यावत्प्रयोजनं विष्णोः सकाशात्साधकस्यतु। धर्ममोक्षादिकं तावत्सर्ववेदविदो भवेत्। वेदार्थनिर्णयो यस्माद्विष्णोर्ज्ञानं प्रकीर्तितम्। ज्ञानात्प्रसन्नश्चहरिर्यतोऽखिलफलप्रद इति ॥ ४६ ॥

ज्याप्रमाणें विषयासक्त मनुष्याला सर्व वेद भगवत्पर आहेत अशी निश्चयात्मक बुद्धि नसल्यानें त्यास परम पुरुषार्थरूप सालोक्य सामीप्यादि मुक्तींचें सुख मिळत नाहीं; त्याप्रमाणें निश्चयात्मक बुद्धीनें युक्त अशा परमात्मज्ञानी जनास वेद हा स्वर्गास साधन जो यज्ञ त्याचें प्रतिपादन करणारा आहे, असें न वाटल्यानें त्या परमात्मज्ञान्यासही स्वर्गफल मिळणार नाहीं अशी शंका येईल ह्मणून भगवान् ह्मणतातः—लहानशा विहिरीच्यायोगानें लोकांचीं जेवढीं स्नानपानादि प्रयोजनें होतात तेवढीं प्रयोजनें सर्व बाजूनीं संपूर्ण विमल जल असलेल्या अगाध महानदीपासून होत नाहींत असें नाहीं. फार काय! होतात असें ह्मटल्यास चालेल. ज्याप्रमाणें कामी लोकांनीं इच्छिलेले असे स्वर्गादि फलरूप अनेक अर्थ वेदांपासून त्या लोकांस प्राप्त होतात, त्याप्रमाणें सर्व वेदांत परमात्म्याचें प्रतिपादन आहे असें जाणणाऱ्या ब्रह्मज्ञान्यासही फलप्राप्ति होते. ह्मणजे वेदांपासून ज्ञानप्राप्ति होण्याचे उपाय समजतात व त्या वेदांपासून मुज्ञास होणारें जें ज्ञान तेंच परोक्षज्ञान व यापासूनच अपरोक्षज्ञान

होतें. ह्मणजे बिंबरूपी परमात्म्याला पाहण्यास समर्थ असें ज्ञान उत्पन्न होतें. व त्याच्या प्रसादानें प्राप्त होणाऱ्या परम मुक्तिसुखांत स्वर्गादि सुखें अंतर्भूत होतात. ह्मणून निष्काम भक्तियोगानें अपरोक्षीकृत गुणगणांचा सागर व करुणासिंधु अशा श्रीहरीपासून प्राप्त झालेला महानदीच्या स्वच्छ उदकाप्रमाणें असणाऱ्या मुक्तिसुखाचा अनुभव घेणारा ज्ञानी विहिरींतील उदकाप्रमाणें अल्पस्वल्प अशा स्वर्गादिसुखाच्या अनुभवाची इच्छा करीत नाहीं. अथवा त्रिगुणात्मक अशा या भवबंधापासून मुक्त होण्याकरितां वेदार्थज्ञान अवश्य संपादन करावें अशाबद्दल सांगतात. प्रळयकाळीं लक्ष्मीरूप स्वच्छ उदकाचे ठिकाणीं सर्वव्याप्तरूपानें असणारा जो काळादि प्रेरक व ज्याला अन्य नियामक नाहीं असा भवभंजनाविषयीं समर्थ व बिंबभूत असा जो **श्रीभगवान्** याच्या कृपापूरित अवलोकनरूप प्रसादमात्रानें प्रतिबिंबभूत जीवगणास ज्याप्रमाणें संसारावृत्तिरहित असें परममुक्तीचें सुख प्राप्त होतें त्याचप्रमाणें सर्व वेदांत भगवत्तत्व प्रतिपादन केलें आहे असें समजलें तर परमसुख प्राप्त होतें. ॥ ४६ ॥

कर्मण्येवाधिकारस्ते मा फलेषु कदाचन ।
मा कर्मफलहेतुर्भूर्मा ते सङ्गोऽस्त्वकर्मणि ॥ ४७ ॥

यामिमामिति कामात्मनां निंदा कृता सा नोपपद्यते । स्वर्गकामो यजेतेत्यादौ स्वर्गादिकामं प्रत्येव यागादेर्विहितत्वादित्यत आह । कर्मणीति ॥ ते इत्युपलक्षणार्थं तव ज्ञानिनोपि कर्मण्येवाधिकारो नतु फलेषु । फलकामनायां मोक्षविलंबप्रसंगात् किमुतान्येषां फलश्रुतिस्तु रोचनार्थमितिभावः । अतो मा कर्मफलहेतुर्भूः । कर्मफलं तत्कृतौहेतुर्यस्य स मा भूः । तर्हि क्लेशरूपं कर्म न करोमीत्यत आह ॥ त इति ॥ कर्मणोऽकरणे स्नेहो मास्तु अन्यफलाभावेपि मत्प्रसादाख्याफलभावादिति भावः । अथवात्मवानित्यैक्यभावनं न कर्तव्यमित्युक्तं तद्धेत्वभिधानेनोपपादयति ॥ कर्मणीति ॥ कर्माधिकारिणस्त्वदादयो जीवाः फलंतुमदायत्तमितिभावः । अतः कर्मफलस्य हेतुरीश्वरस्त्वं माभूः । नेश्वरोहमिति भावं कुरु ॥ ४७ ॥

स्वर्गप्राप्तीची इच्छा धरून यज्ञादि कर्मे करणें हें निंदास्पद आहे तर (स्वर्गकामो यजेत) इत्यादि श्रुतींत प्रतिपादन केलेलीं यज्ञादि कर्मे निंद्य कशीं होतील या शंकेबद्दल सांगतातः—तुझ्यासारख्या ज्ञान्याला सुद्धां कर्म करण्याचा मात्र अधिकार असून फलेच्छा करण्याचा अधिकार नाहीं. कारण त्या कर्माचें फल जें स्वर्गादि सुख तें भोगीत असतां पुनः पुनः त्याच संस्कारानें अनेक तऱ्हेचीं कर्मे करून त्यांच्या फळाचा उपभोग घेण्यांत गुंतल्यास तुझ्यासारख्या ज्ञान्यासहि मोक्षप्राप्तीस विलंब होईल असें असतां अज्ञजनांनीं कर्मफळाच्या भोगांत रत होऊं नये हें काय सांगावें. वेदामध्यें जीं स्वर्गादि फलें ऐकूं येतात त्यांचा हेतु इतकाच कीं, अज्ञ जनांस त्या फलांच्या इच्छेनें वेदांबद्दल निष्ठा उत्पन्न व्हावी व क्रमानें त्यांनां ब्रह्मज्ञान प्राप्त व्हावें एवढ्याकरितां तें योग्यहि आहे. जसें आई आपल्या बाळानें परिणामीं सुखावह असें औषध घ्यावें ह्मणून प्रथमतः गूळ दाखवून नंतर औषध पाजिते तसें संसाररोगग्रस्त जनांचें सर्व दुःख निरसन व्हावें ह्मणून ब्रह्मज्ञानरूप औषध पाजविण्याच्या हेतूनें वेदांत स्वर्गसुखाचें वर्णन केलें आहे. यावरून तूं तसें कर्म करूं नको असें नव्हे. कारण तें कर्म दुःखकारक आहे तरी अवश्य केलेंच पाहिजे. कारण निष्काम अशीं यज्ञादि कर्मे करण्यानें अंतःकरण शुद्ध होतें, अंतःकरणाच्या शुद्धीनें बिंबरूपी परमात्म्याचें ज्ञान होतें, व त्याच्या प्रसादानें मोक्षहि मिळतो. अथवा मागें जीवेशाचें ऐक्य मानूं नको असें जें सांगितलें आहे त्याचें कारण असें आहे कीं, तुझ्यासारखे सर्व जीव कर्म करण्यास मात्र अधिकारी. फल देणें हें माझें कर्तव्य होय. याकरितां तूं कर्मफल देणारा ईश्वर आपणच असें समजूं नको. तें ऐक्याचें ज्ञान केवल अकर्म होय. ह्मणजे नित्यदुःखात्मक अंधतमरूप अशा नरकास साधनभूत होय. याकरितां त्या तऱ्हेच्या ऐक्यज्ञानाचे ठिकाणीं तूं कदापि आसक्ति ठेवूं नको. दाता व प्रतिगृहिता या उभयतांत दात्यालाच उघड श्रेष्ठत्व आहे. तर अशेष कर्मफलदाता व अगणित सद्गुणराशि अशा माझ्या प्रसादानें परम दुःखकारक अशा संसारापासून मुक्त होऊं इच्छिणारे असे जीव व मी हें एकच असें ह्मणणें समंजसपणाचें कसें होईल? ॥ ४७ ॥

योगस्थः कुरु कर्माणि सङ्गं त्यक्त्वा धनंजय ।
सिध्द्यसिध्द्योः समो भूत्वा समत्वं योग उच्यते ।४८।

कर्माकरणे स्नेहो मास्त्वित्युक्तं स्पष्टयन्नाह । योगस्थइति । उपायस्थः ज्ञानसाधनमनुतिष्ठन् । संगं फलस्नेहं त्यक्त्वा तत एव सिध्यसिध्योः समो भूत्वा कर्माणि कुरु । कोसौ योग इत्यत आह । समत्वमिति । संगत्यागविशिष्टं समत्वमेव योग इत्यर्थः ॥ ४८ ॥

कर्म न करितां राहण्याविषयीं आलोचना करूं नको असें सांगितलें त्याविषयीं स्पष्टीकरण करितातः—हे **अर्जुना,** उपायानें ज्ञानसाधनीभूत असें कर्मानुष्ठान करून त्याच्या फलाविषयीं आसक्ति ठेवूं नको. कर्मफलरूप सिद्धि किंवा असिद्धि या दोन्ही सारख्या मानाव्या. कारण कर्मफलाची सिद्धि हेंच स्वर्गादि सुख होय. तें अनित्य असून दुःखमय असल्यानें दैववशात् सहज प्राप्त होणाऱ्या जीवसुखापेक्षां त्या स्वर्गसुखांत विशेष मोठेपणा नाहीं. वरील सिद्धि किंवा असिद्धी सारख्या मानणें यांसच योग असें ह्मणतात.

दूरेण ह्यवरं कर्म बुद्धियोगाद्धनंजय ।
बुद्धौ शरणमन्विच्छ कृपणाः फलहेतवः ॥ ४९ ॥

इतश्च योगाय युज्यस्वेत्याह । दूरेणेति । बुद्धियोगाज्ज्ञानलक्षणादुपायात् दूरेणातीवावरं कर्म । अतो बुद्धौ शरणं ज्ञानोपायानुष्ठानलक्षणम् । ज्ञाने स्थितिमन्विच्छ । कथं कर्म ज्ञानादतीवावरामित्यत आह । कृपणा इति । फलं कर्मकृतौ हेतुर्येषां ते फल हेतवः कृपणादीना इत्यर्थः । यद्वा ज्ञानस्योत्तमावस्थायामीश्वरैक्यभावनं न युक्तमित्याह बुद्धाविति । बुद्धौ जातायामपि विष्णुमेव शरणमन्विच्छ फलहेतवः ईश्वरोहमितिमन्यमानाः कृपणाःशोच्याः तदुक्तम् । अज्ञानां ज्ञानिनांचैव मुक्तानां शरणं हरिः । तंयेस्वैक्येन मन्यंते सर्वभिन्नं गुणोछ्र्यात् । कृपणास्ते तमस्यंधे निपतंति न संशयः । नतेषामुत्थितिः क्वापि नित्यातिशयदुःखिनामिति ॥ ४९ ॥

हे **धनंजया,** ज्ञानोपायापेक्षां काम्यकर्म अत्यंत नीच आहे. याकरितां तें कर्म ज्ञानप्राप्तीला साधन आहे असें तूं समज. जे लोक ज्ञानापेक्षां कर्म

कनिष्ठ आहे असें जाणत नाहींत व फलाच्या इच्छेनें काम्यकर्म करितात ते दीन होतात. अथवा उत्तम ज्ञानावस्था प्राप्त झाली ह्मणजे जीव ईश्वराशीं ऐक्यता पावतात असें विरोधि स्वकपोलकल्पित मत मनांत धरूं नको अशाबद्दल सांगतात. कर्माहून अतिश्रेष्ठ व भवबंधमोचनास कारणीभूत असें ब्रह्मज्ञान प्राप्त झालें तरी सर्व दुःखरूप संसारापासून ज्या परमात्म्याच्या प्रसादानें ज्ञानानंदपूर्ण असा जीव होतो तो परमात्मा श्रीहरी सर्व जीवसमुदायापासून भिन्न असून विलक्षण सामर्थ्यवान् आहे असें तूं समज. आपणच ईश्वर असें समजून सर्व कर्मफलास आपणच कारण असें मानणारे हे नित्य दुःखयुक्त अंधतम नामक पुनरुत्थितिरहित नरकांत पडतात. याकरितां ते अति शोचनीय होत. ॥ ४९ ॥

बुद्धियुक्तो जहातीह उभे सुकृतदुष्कृते ।
तस्माद्योगाय युज्यस्व योगः कर्मसु कौशलम् ॥५०॥

काम्यकर्मिणां कृपणत्वेपि कथं कर्म दूरेणावरमित्यपेक्षायां कर्मफलाद्विलक्षणं ज्ञानफलमाह । बुद्धि युक्त इति । ज्ञानस्य महाफलत्वात् । योगाय ज्ञानोपायाय युज्यस्व प्रयतस्व । योगं स्तौति । अथवा अस्तु योगे प्रयत्नः । किं फल स्नेहरहितकर्मणेत्याशंक्य यथावत् विष्णुं ज्ञात्वा तदर्थत्वेन कर्मकरणमित्येतत्कौशलमेव योग इत्याह । योग इति५०

काम्यकर्मयोगानें जर मनुष्यें अति दीन झालीं तर कर्म हें ज्ञानाहून अति नीच कसें याबद्दल सांगतातः—बिंबरूपी परमात्म्यास स्वतः पाहणारा असा अपरोक्ष ज्ञानी हा सुकृत अथवा दुष्कृत अशीं दोन्हीहि कर्में टाकितो. सुकृतत्याग ह्मणजे मनुष्याच्या जन्मादिकांस साधनीभूत अशीं मुक्तिविरोधी जीं पुण्यें त्यांचा त्याग होय; दुष्कृतत्याग ह्मणजे सर्व दुष्कृतांचा त्यागच होय. ज्ञान हें श्रेष्ठ फल असल्यानें त्याच्या उपायाविषयींच आसक्ति धर. तो उपाय ह्मणजे सर्वोत्तम जो विष्णु तज्ज्ञानपूर्वक व तदर्पणबुद्धीनें कर्म करणें हा होय. यालाच योग असें ह्मणतात. आणि या योगापासूनच तें वरील ज्ञान उत्पन्न होतें. ॥ ५० ॥

कर्मजं बुद्धियुक्ता हि फलं त्यक्त्वा मनीषिणः ।
जन्मबंधविनिर्मुक्ताः पदं गछन्त्यनामयम् ॥ ५१ ॥

ज्ञानसाधनं कर्मज्ञानफलं च मोक्षं विवृणोति । कर्मजं फलं त्यक्त्वा अकामनयेश्वरे समर्प्य बुद्धियुक्ता सम्यग्भगवत्ज्ञानिनो मनीषिणः अपरोक्षज्ञानिनो भूत्वा जन्मबंधादतितरां निर्मुक्ता अनामयं निर्दुःखं पदं गच्छंति । सयोगंकर्मज्ञानसाधनं ज्ञानं मोक्षसाधन मितिभावः ॥ ५१ ॥

निष्काम कर्मानें शुद्धांतःकरण मनुष्याला ब्रह्मज्ञान उत्पन्न होऊन त्यापासून जीवाला मुक्ति मिळते अशाबद्दल सांगतातः—ब्रह्मापरोक्षज्ञान असलेले लोक सर्व सत्कर्में ईश्वरार्पणबुद्धीनें करून त्यायोगानें जननमरणरूप भवबंधापासून मुक्त होऊन ते दुःखरहित, परमश्रेष्ठ व पुनरावृत्तिवार्जित अशा विष्णुलोकाला जातात. भगवदर्पणरूप उपायानें सत्कर्म होतें, त्यापासून ब्रह्मज्ञान, ब्रह्मज्ञानापासून मोक्ष मिळणें हाच काय तो मुख्य तात्पर्यार्थ. ॥ ५१ ॥

यदा ते मोहकलिलं बुद्धिर्व्यतितरिष्यति ।
तदा गन्तासि निर्वेदं श्रोतव्यस्य श्रुतस्य च ॥ ५२ ॥

कियत्पर्यंतं मुमुक्षुणा निष्कामतयेश्वरप्रीत्यर्थं कर्माण्यवश्यं कर्तव्यानीत्यतआह । यदेति । यदा ते बुद्धिरंतःकरणं मोहकालिलमन्यथाज्ञानलक्षणं दोषं व्यतितरिष्यति परित्यक्ष्यति । तदा महभ्द्यः श्रुतस्य श्रोतव्यस्यच वेदादेर्नितरां लाभं गंतासि प्राप्स्यसीत्यर्थः तदुक्तं । बुद्धिमोहो यदा नस्यादन्यथा ज्ञानलक्षणः । श्रोतव्यश्रुतसाफल्यं तदा प्राप्नोति मानव इति ॥ ५२ ॥

मुमुक्षूनें किती काळपर्यंत ईश्वरार्पणबुद्धीनें कर्म करावें याविषयीं सांगतातः—हे अर्जुना, ज्यावेळीं तुझी बुद्धि अन्यथा ज्ञानरूप दोषाला टाकील त्या वेळीं विद्वज्जनापासून श्रुत (ऐकलेलें) अथवा श्रोतव्य (ऐकावयाचें) अशा वेदादि शास्त्रांचें साफल्य होईल; ह्मणजे तों वेळपर्यंत ईश्वरार्पण बुद्धीनें कर्म केल्यावांचून शुद्धांतःकरण होऊन ब्रह्मज्ञान होत नाहीं हाच तात्पर्यार्थ ॥ ५२ ॥

श्रुतिविप्रतिपन्ना ते यदा स्थास्यति निश्चला ।
समाधावचला बुद्धिस्तदा योगमवाप्स्यसि ॥ ५३ ॥

पूर्वश्लोकार्थविवरणपूर्वकं बुद्धिमोहतरणपदोक्तं सम्यग्ज्ञानफलमाह । श्रुतिविप्रतिपन्नेति । पूर्वं श्रुतिभिर्वेदैः विप्रतिपन्ना विरुद्धासती बुद्धिर्यदा वेदार्थानुकूलेन तत्वनिश्चयेन विपरीतवाग्भिरपि चंचला न भवति । अनेनपरोक्षज्ञानकाष्ठा दर्शिता ततश्च समाधावचला ब्रह्मप्रत्यक्षदर्शनेन भेरीताडनादावपि परमानंदमग्नत्वात् । एतेनापरोक्षज्ञानकाष्ठा दर्शिता । तदा योगं योगफलमवाप्स्यसि उपायसिद्धो भवसि इत्यर्थः । अथवा श्रुतिविप्रतिपन्नेति श्रुतौ विशेषेण प्रतिपन्नेत्यर्थः । श्रुतिमार्गं प्रपन्नातु तदर्थज्ञाननिश्चला । समाधानेन तु पुनरापरोक्ष्याच्चनिश्चला । विष्णौ प्राप्स्यति तद्योगं मुक्तो भूत्वा तदश्नुत इति ॥ ५३ ॥

मागें सांगितलेल्या प्रकारचे मोह तरल्यानंतर उत्पन्न होणाऱ्या यथार्थ ज्ञानाचें विवरण करितातः—ज्या वेळीं श्रुतीचे ठिकाणीं परस्पर विरोधाभास झालेली बुद्धि असच्छास्त्राच्या श्रवणानें सुद्धां चंचल न होतां सर्व वेदांला अनुसरून परमात्मनिष्ठ होते किंवा त्यानंतर समाधि ह्मणजे ब्रह्मप्रत्यक्ष दर्शनानें उत्पन्न झालेली निष्ठा भेरीताडनादि मोठमोठ्या विघ्नांनीं सुद्धां चंचल होत नाहीं त्या वेळीं भगवदर्पणबुद्धीनें केलेल्या कर्मरूपयोगाचें फळ प्राप्त झालें असें समज. ॥ ५३ ॥

अर्जुन उवाच.

स्थितप्रज्ञस्य का भाषा समाधिस्थस्य केशव ।
स्थितधीः किं प्रभाषेत किमासीत व्रजेत किम् ॥५४॥

ज्ञानिनि प्रकृते तल्लक्षणादिजिज्ञासया अर्जुनः पृच्छति । स्थितप्रज्ञस्येति । अर्जुनस्य ज्ञानित्वेपि लोकोपकारार्थं प्रश्नः । उक्तंच । जानंति पूर्वे राजानो देवर्षयस्तथैवच । तथापि धर्मान्पृच्छंति वार्तायै गुह्यवित्तयइति । यद्यपि समाधावचला बुद्धिरित्यनेन लक्षणमुक्तं तथापि अयावल्लक्ष्यभावित्वान्नतत्सम्यग्व्यवहारोपयोगि यावल्लक्ष्यभावितु सार्वत्रिकव्यवहारोपयोगि ज्ञास्यामीत्याशयेनोक्तलक्षणमनु-

वदति । समाधिस्थस्येति । संप्रज्ञात समाधिस्थस्येति लक्षणप्रश्नः । असंप्रज्ञातसमाधेः शुभाशुभप्राप्त्ययोगेन यःसर्वत्रानभिस्नेह इत्यादि वक्ष्यमाण लक्षणायोगात् । यद्यपि संप्रज्ञाते प्रजहातीत्येतेन विरोधस्तथापि तत्रैवकामाद्यभावनियमो नास्ति । तदुक्तम् । कामादयो न जायंते ह्यपि विक्षिप्तचेतसाम् । ज्ञानिनां ज्ञाननिर्धूतमलानां देवसंश्रयादिति । यद्वा । समाधिस्थस्य विषमबुद्धिवर्जितस्येत्यर्थः स्थिता प्रज्ञा ज्ञानं यस्य सः स्थितप्रज्ञः । का भाषा कथं भाष्यते । किं लक्षणमित्यर्थः । स्थितधीः किंप्रभाषेत किंवा प्रत्यासीत किंवा व्रजेत एवं परमानंदतृप्तः किमर्थं प्रवृत्तिं करोतीति प्रश्नाभिप्रायः ॥ ५४ ॥

प्रस्तुत ज्ञान्यांचा विचार चालल्यानें त्यांचीं लक्षणें जाणण्याच्या हेतूनें **अर्जुन** प्रश्न करितो:—हे ब्रह्मरुद्रादिप्रेरक भगवन् **श्रीकृष्णा,** ध्यानाविषयीं निश्चळ, बुद्धियुक्त व अपरोक्ष ज्ञानयुक्त अशा पुरुषास लौकिक व्यवहाराचें केव्हांही कारण नाहीं. याकरितां तो कोणत्या फळाच्या इच्छेनें बोलतो, बसतो किंवा चालतो ? भेरीताडनादिकानें सुद्धां चंचलत्व न पावणाऱ्या अशा अपरोक्ष ज्ञाननिष्ठाला लौकिक फळाची अपेक्षा नसल्यानें बोलणें वगैरेस कांहींच कारण संभवत नाहीं. अर्जुन हा स्वतः ज्ञानी असल्यानें तीं लक्षणें त्यास माहित नव्हतीं असें नाहीं. पण साक्षात् भगवंताच्या मुखानें स्पष्टीकरण झाल्यानें योग्य जनांस त्याची माहिती मिळावी हा त्याचा मुख्य हेतु आहे. ॥ ५४ ॥

श्रीभगवानुवाच.

प्रजहाति यदा कामान्सर्वान्पार्थ मनोगतान् ।
आत्मन्येवात्मना तुष्टः स्थितप्रज्ञस्तदोच्यते ॥ ५५ ॥

प्रारब्धकर्मणेषत्तिरोहितब्रह्मणो वासनया मत्तादेरिवाल्पाभिसंधिप्रवृत्तयः संभवंतीति यानिशेत्यादिना दर्शयिष्यन् प्रथमतो लक्षणं भगवानुवाच । प्रजहातीति । प्रायः सर्वान् कामान् प्रजहातीति । नतु सर्वात्मना । तदुक्तम् । सर्वकामनिवृत्तिस्तु ज्ञानिनो न कथंचन । अनिषिद्धामितैवातोह्यकामत्वमितीर्यत इति । प्रायोपि सर्वकामहानस्यासंभवमाशंक्याह । मनोगतानिति । मनोगताहि कामाः अतस्तत्रैव

तद्विरुद्धज्ञानोत्पत्तौ तेषां हानं युक्तमितिभावः । आत्मनि विष्णावेवा स्थितः सन् आत्मना विष्णुना तत्प्रसादेन तुष्टः । विषयांस्तु परित्यज्य रामेस्थितिमतस्ततः । दैवाद्भवति वै तुष्टिर्नान्यथा तु कथंचनेतिवचनात् यदेदृशो भवति तदाऽपरोक्षज्ञानीत्युच्यते ॥ ५५ ॥

जे मनुष्य मी एवढा वेळ केलेल्या उपदेशाप्रमाणें वागून मला मान्य असें निवृत्तिकर्म निरंतर करितात, ते अपरोक्षज्ञानशून्य असले तरी, मी सांगितलेल्या कर्मांच्या अनुष्ठानानें अपरोक्षज्ञान संपादन करून, भवबंधापासून मुक्त होतील. मग, अपरोक्षज्ञानी या कर्मानुष्ठानानें मुक्त होतील ह्मणून काय सांगावें? ॥ ३१ ॥ जे कोणी या माझ्या मताचा द्वेष करून त्याप्रमाणें वागत नाहींत, ते सर्व ज्ञानशून्य, कर्मज्ञान आणि ब्रह्मज्ञान यांविषयीं मतिशून्य आहेत व ते सर्व कर्ममार्गापासून भ्रष्ट होतील असें समज. ॥ ३२ ॥

सदृशं चेष्टते स्वस्याः प्रकृतेर्ज्ञानवानपि ।
प्रकृतिं यान्ति भूतानि निग्रहः किं करिष्यति ॥३३॥

यदिश्रद्धयाऽसूयां विना त्वन्मतानुष्ठाने मोक्षोन्यथातुअज्ञानात् मिथ्याज्ञानाच्च नाशस्तर्हि ते मतं किमिति नानुतिष्ठति लोकइत्यतआह । सदृशमिति । यद्वा मंदान् न विचालयेदित्ययोग्यानां तत्वबोधनं न कार्यमित्युक्तम् तत्र हेतुमाह । सदृशमिति । ज्ञानवानपि स्वस्याः प्रकृतेः रागादिस्वभावस्य सदृशमनुगुणमेव चेष्टते किमुताज्ञः । यतोभूतानि प्राणिनः प्रकृतिं स्वभावं यांति अनुसरंति तथाचेंद्रियाणां निग्रहोज्ञानिभिः क्रियमाणो बहुबोधो वा किं करिष्यति ॥ ३३ ॥

द्वेषभावनारहित होऊन, तुझ्या मतावर श्रद्धा ठेवणारास मुक्तिसुखाचा लाभ होतो, व तुझ्या मतावर ज्याची श्रद्धा नाहीं तो त्या लाभास अंतरतो, तर सर्व लोक तुझ्या मताप्रमाणें आचरण कां करीत नाहींत? अशी अर्जुनास शंका येईल, तिचें समाधान करितातः-ज्ञानी पुरुष असले तरी ते आपल्या स्वभावाप्रमाणें कर्में करितात. मुख्य तात्पर्य असें कीं, सर्व प्राणिमात्र आपापल्या स्वभावाप्रमाणें कर्में करीत असल्यामुळें, त्यांस इंद्रियनिग्रह किंवा ज्ञान्यांनी केलेला उपदेश त्यांच्या पूर्वजन्मांतील संस्कारापुढें काय चालणार? ॥ ३३ ॥

इंद्रियस्येन्द्रियस्यार्थे रागद्वेषौ व्यवस्थितौ ।
तयोर्न वशमागच्छेत्तौ ह्यस्य परिपन्थिनौ ॥ ३४ ॥

ननु स्वभावस्य बलवत्वे मयिसर्वाणीति विधानं फलकथनं च व्यर्थमित्यत आह । इंद्रियस्येति । अर्थे स्वस्वविषये परिपंथिनौ शत्रू रागद्वेषग्रहणम् लोभमोहादेरप्युपलक्षणम् । निग्रहात्सद्यः प्रयोजनाभावेपि अतिप्रयत्नेन फलस्य भावित्वाच्छक्तितो निग्रहःकार्यइत्याशयः । तदुक्तम् । संस्कारोबलवानेषब्रह्माद्याअपितद्वशाः । तथापि सोन्यथाकर्तुं शक्यतेतिप्रयत्नत इति । एतच्च योग्यजनविषयं । अयोग्यानां दुःस्वभावस्य कदापि विपर्ययाभावादिति बोद्धव्यम् ३४

जर स्वभावच बलवत्तर आहे तर एवढा वेळ केलेल्या उपदेशाचें फळ काय? याविषयीं सांगतातः—प्रत्येक इंद्रियास रागद्वेषादि विशेष दोष असतात, तथापि मुमुक्षूला ते केवळ शत्रूसारखे असल्यामुळें, त्यानें त्यांच्या स्वाधीन होऊं नये; कारण, पूर्वसंस्काराचें उल्लंघन करणें जरी दुर्घट असलें, तरी, प्रयत्नानें तेंही साध्य होऊन, तो मुमुक्षू इंद्रिय-निग्रह करण्यास समर्थ होतो. ह्मणून माझ्या मताप्रमाणें सत्कर्म केलेंच पाहिजे. ॥ ३४ ॥

श्रेयान्स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात् ।
स्वधर्मे निधनं श्रेयः परधर्मो भयावहः ॥ ३५ ॥

यद्यपि कर्मकर्तव्यं तथाप्युग्रमवर्जनीयरागद्वेषम् युद्धाख्यं कर्म किमर्थं कार्यमित्यतआह । श्रेयानिति । विगुण अंगहीनोपि स्वधर्मः स्वनुष्ठितात् सर्वांगसाकल्येन कृतात्परधर्मादपि श्रेयान् अधिकतरः ।

कुतः स्वधर्मेयुद्धादौ प्रवर्तमानस्य निधनमपिश्रेष्ठम् । परस्य धर्मस्तु भयावहः निषिद्धत्वादनर्थप्रापकइति ॥ ३५ ॥

कर्म केलेंच पाहिजे असा तुमचा अभिप्राय असला तरी, रागद्वेषादिकांनीं युक्त असें युद्धकर्म कशाला करोंव ? अशी अर्जुनास शंका येईल, तिचें समाधान सांगतातः—गुणांनी कमी असला तरी, स्वधर्म श्रेष्ठ होय; परधर्म सर्व गुणयुक्त असला तरी त्याचा स्वीकार करणें चांगलें नाहीं. स्वधर्मांत—तूं क्षत्रीय आहेस ह्मणून तुला युद्धांत—मरण आलें तरी तें (परलोकीं) श्रेयस्कर होईल. परधर्मांचा स्वीकार करणें भयकारक होय. ॥ ३५ ॥

अर्जुन उवाच ।

अथ केन प्रयुक्तोऽयं पापं चरति पूरुषः ।
अनिच्छन्नपि वार्ष्णेय बलादिव नियोजितः ॥३६॥

बहवः प्रवर्तकारागादयः उक्ताः तेषु बलवंतंप्रति महांतं यत्नं करिष्यामीतिभावेन प्रसंगाद्रागादिषु बलवंतं ज्ञातुमर्जुनउवाच । अथकेनेति । हे वृष्णिकुलोत्पन्न अयं पुरुषः पापं कर्तुमनिच्छन्नपि बलान्नियोजितइव । पापंचरति स केन प्रयुक्तः—प्रेरितश्चरति इतिप्रश्नः । अथेत्यर्थांतरम् यद्वा परमेश्वराद्देवेभ्यश्चानंतरमित्यर्थः । प्रकृतेः क्रियमाणानीत्यादिना तेषामपि प्रेरकत्वस्योक्तवात् । ईश्वरादिव्यतिरिक्तोऽशुभ प्रेरकः शत्रुरूपोमयाजेतव्योबलवान्कइत्याशयः ॥ ३६ ॥

रागद्वेषादि अनेक शत्रू आहेत; त्यांपैकीं सर्वांत बलवान् कोण तें मला समजलें ह्मणजे, त्याचा जय करण्याविषयीं मी होईल तितका प्रयत्न करीन, असें मनांत आणून अर्जुन श्री कृष्णास विचारतोः- अर्जुन ह्मणतो, हे वृष्णिकुलोत्पन्न श्रीकृष्णा, पुरुष हा, इच्छा नसतांही दुसऱ्याच्या प्रेरणेनें बलात्कारें करून पापाचरण करितो; तर त्याला प्रेरणा करणारा कोण ? अथवा मुख्य प्रेरक श्रीहरी आहेच ? व त्या श्रीहरीचे अनुयायी शुभप्रेरक देवही आहेतच; या देवांवाचून अशुभ प्रेरक व मला जिंकण्यास योग्य असा मुख्य शत्रू कोण आहे तें सांगा; ह्मणजे मी त्याला जिंकण्याचा विशेष प्रयत्न करीन. ॥ ३६ ॥

श्री भगवानुवाच ।

काम एष क्रोध एष रजोगुणसमुद्भवः ।
महाशनो महापाप्मा विद्ध्येनमिह वैरिणम् ॥ ३७॥

काममूलत्वात्सर्वेषां सएवबलवानितिभगवानुवाच । कामइति । यस्त्वयापृष्टोबलवान्प्रवर्तकः सएषकामएव क्रोधोप्येष एव तज्जन्यत्वात् कामात्क्रोधोभिजायतइतिउक्तत्वात् । यत्रापि गुरुनिंदादिनिमित्तः क्रोधस्तत्रापि भक्तिनिमित्तानिंदाकामनिमित्तएव । रजोगुणात्समुद्भवतीति रजोगुणसमुद्भवः महदशनं भोग्यं यस्य स महाशनः । महान् ब्रह्महत्यादिरूपः पाप्मायस्मादिति महापाप्मा । इह जगति एनं कामं मोक्षविरोधित्वाद्वैरिणं विद्धि ॥ ३७ ॥

सर्वांमध्यें काम (इच्छा) हाच बलिष्ठ आहे ह्मणून सांगतातः— **श्रीकृष्ण** ह्मणतात हे **अर्जुना**, काम हा पापकर्मप्रवृत्तीस मुख्य कारण आहे. क्रोध हा त्या कामापासूनच उत्पन्न झालेला आहे. आणि त्या क्रोधाची उत्पत्ति रजोगुणापासून झालेली आहे. अति विषयासक्त होऊन ब्रह्महत्यादि महत्पातकांस करविणारा हा काम, सामोपचारानें अनिवार्य (निवारण्यास कठीण) असून, मोक्षमार्गाला विरोध करणारा असल्यामुळें, तूं इहलोकीं हाच आपला शत्रु आहे, असें समज. श्रीहरिप्रेरणेनें देव जसे शुभप्रेरक आहेत त्याप्रमाणें त्यांच्याच प्रेरणेनें कुत्सित कामाभिमानी कालनेमि हा अशुभप्रेरक होय. ॥ ३७ ॥

धूमेनाव्रियते वह्निर्यथादर्शो मलेन च ।
यथोल्बेनावृतो गर्भस्तथा तेनेदमावृतम् ॥ ३८ ॥

कथं कामोमोक्षविरोधीत्यत आह । धूमेनेतिद्वाभ्याम् । यथा धूमेनाग्निरावृतः प्रकाशरूपोप्यन्यैर्न दृश्यते तथेदं परमात्माख्यं वस्तु तेन कामेनावृतं स्वयं प्रकाशरूपमपि अन्यैर्नदृश्यते । यथादर्शोमलेनावृतोमुखाद्यभिव्यक्तिहेतुर्न भवति तथेदमंतः करणमावृतं जीवेश्वराभिव्यक्तिहेतुर्न भवति । यथोल्बेनगर्भवेष्टनेन गर्भआवृतोव्यापाराक्षमः तथेदं जीवस्वरूपं कामेनावृतं नेश्वरादिज्ञाने क्षममित्यर्थः ॥ ३८ ॥

काम हा मोक्षविरोधी कसा होतो तें सांगतातः—धूरानें व्यापलेला अग्नि, प्रकाशरूप असला तरी, जसा दिसत नाहीं, तसा परमात्मा हा स्वयंप्रकाश असूनही, कामरूप आवरणानें जीवांस तो दिसत नाहीं. मलीन झालेला आरसा जसा पाहणाऱ्याच्या मुखाचें प्रतिबिंब दाखविण्यास असमर्थ होतो, तसें हें अंतःकरण कामरूपमळानें आच्छादित झाल्यामुळें त्याला परमेश्वराच्या

स्वरूपाचें ज्ञान होत नाहीं. उदरांतील गर्भ जसा (उल्बनामक) वेष्टणानें गुरफटलेला असून चलनवलनादि करण्यास असमर्थ असतो, तसा जीव हा स्वरूपाच्छादक कामरूप वेष्टणानें गुरफटलेला आहे. ह्मणून त्याला ईश्वराचें ज्ञान होत नाहीं. ॥ ३८ ॥

आवृतं ज्ञानमेतेन ज्ञानिनो नित्यवैरिणा ।
कामरूपेण कौन्तेय दुष्पूरेणानलेन च ॥ ३९ ॥

एवं ज्ञेयज्ञानकरण ज्ञातृ प्रतिबंधकोक्त्या ज्ञानोत्पत्तिप्रतिबंधकत्वमुक्तम् । इदानीं कथं चिदुत्पन्नस्यापि शास्त्रज्ञानस्यापरोक्षज्ञानजननसामर्थ्यं कामेन प्रतिबध्यत इत्याह । आवृतमिति । ज्ञानिनोपि ज्ञानं कामेनावृतं किमुअल्पज्ञानिनः कामरूपेण कामाख्येन नित्यवैरिणा दुःपूरेण दुःखेन हि कामः पूर्यते । नहींद्रादिपदं सुखेन लभ्यते । न केवलं दुष्पूरेण किं तर्हि यद्यपींद्रादिपदम् । प्राप्तं पुनर्ब्रह्मादिपदमिच्छतीत्यलंबुद्धिर्नास्तीत्यनलेन । उक्तंच । ज्ञानस्यब्रह्मणश्चाग्नेर्धूमोबुद्धेर्मलंतथा । आदर्शस्याथजीवस्य गर्भस्योल्बोहि कामकइति । अथवोत्तममध्यमाधमजीवानां कामाभिमान्यसुरेणावृतत्वं । तारतम्येनेत्यत्रदृष्टांतत्रयम् । तदुक्तम् । अखिलप्रेरको विष्णुर्ब्रह्माद्यास्तदनंतराः । अशुभा अशुभेष्वेव कामादेरभिमानिनः । तत्र कामः कालनेमिः, सर्वधूममलोल्बवत् । शुभमध्याधमजनं क्रमादावृत्यतिष्ठतीति ॥ ३९ ॥

कदाचित् दीर्घप्रयत्नानें व शास्त्रानुभवानें ज्ञान उत्पन्न झालें तरी, काम हा त्या ज्ञानाला प्रतिबंधक करितो ह्मणून सांगतात:— हे अर्जुना, शास्त्रोत्पन्न ज्ञान ज्यांस झालें आहे, अशा ज्ञान्यांच्या ज्ञानाला त्यांचा नित्य वैरी जो काम तो प्रतिबंध करितो. काम हा मोठ्या ज्ञान्यांचा नित्य वैरी आहे, मग तो अल्पज्ञांचा वैरी आहे हें काय सांगावें ? काम हा वैरी कसा ? तें सांगतात:—या कामाची इच्छापूर्ति सुखानें होत नसून ती दुःखानें केली पाहिजे. कारण, इंद्रपद प्राप्त झालें असतांही त्या पदापेक्षां वरिष्ठ जें ब्रह्मपद त्याची तो इच्छा करितो याप्रमाणें हा अनलंबुद्धि आहे. ॥ ३९ ॥

इन्द्रियाणि मनो बुद्धिरस्याधिष्ठानमुच्यते ।
एतैर्विमोहयत्येष ज्ञानमावृत्य देहिनम् ॥ ४० ॥

वधार्थं तत्रशत्रोः अधिष्ठानमाह । इंद्रियाणीति । इंद्रियादीनि कामस्याधिष्ठानंएतैर्हि एषकामोज्ञानमावृत्य देहिनं विमोहयति ॥ ४० ॥

शत्रूचा वध करावयाचा ह्मटलें ह्मणजे तो कोठें रहातो हें समजलें पाहिजे, ह्मणून सांगतातः—या कामाचीं राहण्याचीं ठिकाणें ह्मटलीं ह्मणजे, कर्मेंद्रियें, ज्ञानेंद्रियें, मन व बुद्धि हीं होत; हा काम इंद्रियादिकांनीं मनुष्याचें ज्ञान वेष्टण करून, या देही मनुष्यास मोह घालतो ॥ ४० ॥

तस्मात्त्वमिन्द्रियाण्यादौ नियम्य भरतर्षभ ।
पाप्मानं प्रजहिह्येनं ज्ञानविज्ञाननाशनम् ॥ ४१ ॥

हृताधिष्ठानस्य शत्रोर्नाश्यत्वात्कामहनने इंद्रियनिग्रहउपायइत्याह। तस्मादिति ॥ ४१ ॥

ज्यानें शत्रूचें राहण्याचें ठिकाण अगोदर आपल्या स्वाधीन करून घेतलें, अशाला शत्रूचा पराजय करणें सुलभ होतें, ह्मणून सांगतातः—हे भरतश्रेष्ठा अर्जुना, या कामरूप शत्रूस इंद्रियें हीं आश्रयभूत आहेत, ह्मणून तूं पहिल्यानें तीं इंद्रियेंच आपल्या स्वाधीन करून घेऊन, ज्ञान विज्ञानाचा नाश करणारा जो पापी कामरूप शत्रु त्याला निश्चयानें जिंकून टाक. ॥ ४१ ॥

इन्द्रियाणि पराण्याहुरिन्द्रियेभ्यः परं मनः ।
मनसस्तु परा बुद्धिर्यो बुद्धेः परतस्तु सः ॥ ४२ ॥

शत्रुहनने आयुधरूपं ज्ञानंवक्तुं ज्ञेयमाह । इंद्रियाणीति । शारीरादिंद्रियाणि पराणि उत्कृष्टानि न केवलं बुद्धेः परः किंत्वव्यक्तात्पुरुषः परइतिश्रुत्युक्तप्रकारेणाव्यक्तादपि परः ॥ ४२ ॥

शत्रुवध शस्त्रावांचून होत नाहीं ह्मणून, ज्ञानरूप आयुध सांगण्यास तत्पूर्वपीठिका सांगतातः—अर्थाभिमानी रुद्रपुत्रापेक्षां इंद्रियाभिमानी इंद्रादि देवगण श्रेष्ठ; इंद्रादिकांपेक्षां मनोभिमानी रुद्र श्रेष्ठ; रुद्रापेक्षां बुध्यभिमानी सरस्वति श्रेष्ठ; तिच्यापेक्षां महत्तत्वाभिमानी ब्रह्मदेव श्रेष्ठ; त्याच्यापेक्षां अव्यक्ततत्वाभिमानी चित्प्रकृति लक्ष्मी श्रेष्ठ आणि तिच्यापेक्षां ज्याला सुरासुर नमस्कार करितात तो श्रीपरमात्मा श्रेष्ठ होय. ॥ ४२ ॥

एवं बुद्धेः परं बुद्ध्वा संस्तभ्यात्मानमात्मना ॥
जहि शत्रुं महाबाहो कामरूपं दुरासदम् ॥ ४३ ॥
इति श्रीमद्भगवद्गीतासूपनिषत्सु कर्मयोगोनाम
तृतीयोऽध्यायः ॥ ३ ॥

इदानीं ज्ञानमाह । एवमिति । आत्मानं मनः आत्मना बुध्या संस्तभ्य निश्चलं कृत्वा दुरासदं दुःखेनाधर्षणीयं कामं जहि नाशय । इंद्रियाणिपराणीत्यादाविंद्रियादिदेवताविवक्ष्यंते । सर्वेभ्यः प्रवरादेवा-इंद्राद्याइंद्रियात्मकाः । तेभ्योमनोभिमानीतुरुद्रस्तस्मात्सरस्वती । बुध्यात्मिकाततोब्रह्मा महानात्मापरः स्मृतः अव्यक्तरूपा लक्ष्मीस्तु वरातस्या हरिः स्वयम् । नतत्समोधिकोवेति ह्यानुपूर्वीप्रकीर्तिता । यथाक्रमप्रबोधेन नाश्याः कामादिशत्रवः । प्राप्यते च परं स्थानं विष्णोरतुलमंजसेति । इंद्रियेभ्यः पराह्यर्थाह्यर्थेभ्यश्च परं मनः । मनसस्तु पराबुद्धिर्बुद्धेरात्मा महान्परः । महतः परमव्यक्तमव्यक्तात्पुरुषः परः । पुरुषान्नपरं किंचित् साकाष्ठासापरागतिरिति श्रुतेः । नचेंद्रियेभ्यः पराह्यर्था रुद्रोहंकृतिरूपकइत्यादिविरोधः । सर्वाभिमानिनोदेवाः सर्वेपिह्युत्तरोत्तरम् । आधिक्यं वक्तुमेतेषां पृथक् स्थानमुदीर्यत इत्यादिवचनात् ॥ ४३ ॥

इति श्रीमद्भगवद्गीताविवृतौ विद्याधिराजभट्टोपाध्यायविरचितायाम् श्रीमध्वमतानुवर्ति व्याख्योपेतायाम् तृतीयोऽध्यायः ॥३॥

हे भुजशाली अर्जुना, (वर सांगितल्याप्रमाणें) सर्व श्रेष्ठ परमात्मा आहे असें जाणून, बुद्धिनें मनाचें सांतवन करून घे; आणि जिंकण्यास कठीण अशा कामशत्रूला जिंक; ह्मणजे तूं सर्व विषयांचेठायीं निःसंग होऊन, सत्कर्मेंकरून तुला ज्ञान प्राप्ती होईल. मग त्या ज्ञानानें प्रसन्न झालेल्या श्रीहरीच्या कृपेला तूं पात्र होशील. ह्मणून, युद्ध हें मला प्रिय व तुझ्या क्षात्रधर्माला उचित असें कर्म आहे, असें समजून तें तुला केलें पाहिजे. ॥ ४३ ॥

येथें श्रीमदिन्दिराकान्ततीर्थ श्रीपादविरचित प्राकृत टीकेचा
तिसरा अध्याय समाप्त झाला.

अथ चतुर्थोऽध्यायः

श्री भगवानुवाच ।

इमं विवस्वते योगं प्रोक्तवानहमव्ययम् ।
विवस्वान्मनवे प्राह मनुरिक्ष्वाकवेऽब्रवीत् ॥ १ ॥
एवं परम्पराप्राप्तमिमं राजर्षयो विदुः ।
स कालेनेह महता योगो नष्टः परंतप ॥ २ ॥
स एवायं मया तेऽद्य योगः प्रोक्तः पुरातनः ।
भक्तोऽसि मे सखा चेति रहस्यं ह्येतदुत्तमम् ॥ ३ ॥

श्रीगुरुभ्योनमः । उक्तयोर्ज्ञानकर्मणोरुभयोर्विस्तारात्मकोयमध्यायः । ततोबुद्धेःपरस्य माहात्म्यं कर्मभेदोज्ञानमाहात्म्यं चोच्यते । उक्तकर्मयोगे रुचिजननाय पूर्वानुष्ठितोऽयं धर्मइति भगवानुवाच । इममितित्रिभिः ॥ १ ॥ २ ॥ ३ ॥

उक्त ज्ञान किंवा कर्म या उभयतांचा विशेष विस्तार करून, परतर परमात्म्याचें माहात्म्य सांगून, **अर्जुनास** कर्मयोगाची आसक्ति उत्पन्न व्हावी याकरितां हा (कर्मयोग) पूर्वानुष्ठित असल्यानें तूंही युद्धरूप सत्कर्मांत आसक्त व्हावेंस ह्मणून या तीन श्लोकांनीं **अर्जुनास** सांगतातः—हे **अर्जुना**, अविनाशी आणि निष्काम असा कर्मयोग मी पूर्वीं **सूर्याला** सांगितला होता; त्यानें आपला पुत्र **वैवस्वतमनु** याला सांगितला; **मनूनें** आपल्या पुत्राला ह्मणजे **इक्ष्वाकु** राजाला तो सांगितला. ॥ १ ॥ हे शत्रुतापका **अर्जुना**, याप्रकारें परंपरेनें प्राप्त झालेला हा निष्काम कर्मयोग मन्वादि राजर्षि जाणत होते. परंतु वर्तमानकाळीं, तो (कर्मयोग) कोणाला ठाऊक नसण्याचें कारण हेंच कीं, पुष्कळ काळ लोटल्यामुळें, पूर्वींचे ज्ञानी राहिले नाहींत; त्यामुळें हा नाहींसा झाला आहे. ॥ २ ॥ मी पूर्वीं जो **सूर्याला** सांगितला होता तोच तुलाही सांगितला. हा साधारण मनुष्यांनां सांगण्यासारखा नाहीं, परंतु तूं केवळ माझा भक्त व सखा आहेस, ह्मणूनच अति गुह्य असें हें मर्म मी तुला सांगितलें. ॥ ३ ॥

अर्जुन उवाच ।

अपरं भवतो जन्म परं जन्म विवस्वतः ।
कथमेतद्विजानीयां त्वमादौ प्रोक्तवानिति ॥ ४ ॥

मयीसर्वाणीत्युक्तं भगवन्माहात्म्यं आदितोज्ञातुमर्जुनउवाच । अपरमिति । अपरंपश्चात्तनं । परं पूर्वकालीनं ॥ ४ ॥

भगवन्माहात्म्य साकल्यानें श्रवण करण्याविषयीं उत्सुक झालेला **अर्जुन** विचारितोः—हे भगवन् **श्रीहरे**, तुझा प्रादुर्भाव वसुदेव स्त्री जी देवकी तिजपासून झालेला आहे, ह्मणजे तूं अलिकडचाचं आहेस; आणि सूर्याचा जन्म तर फार प्राचीनकाळीं झालेला आहे. असें असतां, तूं सूर्याला निष्काम कर्मयोगाचा उपदेश (पूर्वकाळीं) केलास हें संभवेल तरी कसें? हें तुझें ह्मणणें युक्तिविरुद्ध असल्यामुळें मला योग्य कसें वाटेल? ॥ ४ ॥

श्री भगवानुवाच ।

बहूनि मे व्यतीतानि जन्मानि तव चार्जुन ।
तान्यहं वेद सर्वाणि न त्वं वेत्थ परंतप ॥ ५ ॥

रूपांतरेण मया सूर्याय प्रोक्तमित्याशयवान् भगवानुवाच । बहूनीति ॥ ५ ॥

कृष्णरूपानें देवकीपासून मीं आधुनिककालीं प्रगट झालों आहें तरी, पूर्वीं मीं अन्य रूपानें सूर्याला निष्काम कर्मयोग सांगितला होता; अशा अर्थाचें **श्रीकृष्ण** उत्तर देतातः—हे **धनंजया**, माझे अवतार आणि तुझे जन्म यापूर्वीं पुष्कळ होऊन गेले आहेत. हे शत्रूंला ताप देणाऱ्या **अर्जुना**, मी सर्वज्ञ असल्यामुळें मागें घडलेला वृत्तांत, कोठें कधीं व कसा घडला तें सर्व जाणतों; परंतु, तूं जीवकोटींतील असून अल्पज्ञ आहेस, ह्मणून तुला पूर्वजन्मांतलें कांहींच आठवत नाहीं. हाच काय तो तुझ्यांत व माझ्यांत स्पष्ट भेद आहे. ॥ ५ ॥

अजोऽपि सन्नव्ययात्मा भूतानामीश्वरोऽपि सन् ।
प्रकृतिं स्वामधिष्ठाय सम्भवाम्यात्ममायया ॥ ६ ॥

जन्मान्यतीतानिचेत्तर्हि न जननमरणराहित्यं भगवतः स्यात्तथा चाविनाशीत्युक्तविरोधः स्यादित्यतआह । अजोपीति । उत्पत्तिरहितोपि सन् अव्ययः आत्मा देहोयस्येत्यव्ययात्मापि सन् भूतानामीश्वरोपिसन्संभवामि । स्वरूपतोदेहतश्चानादिनित्यस्य संभवः कथमुच्यते व्याहतत्वात् इत्यतउक्तम् प्रकृतिमिति । प्रकृत्या जातान् वसुदेवादीन् अधिष्ठाय प्रादुर्भवामि । तेन निमित्तेन प्रकृतिमधिष्ठाय प्रकृत्युपादानांभ्रांतिमाश्रित्य संभवामि । भ्रमतां भ्रमति क्षितिरितिवत्संभूतोयमिति जनानां भ्रमविषयोभवामीत्यर्थः । यदि मातापितृसंबंधोङ्गीकृतः तर्हि तन्निमित्तं दुःखादिकमपि प्रसज्येतेत्यतउक्तम् । स्वामिति । स्वकीयाम् भगवदधीनामित्यर्थः । कुतस्तव जीवविलक्षणं जन्मेत्यतउक्तम् । आत्ममाययेति । आत्मज्ञानेन सर्वज्ञत्वादित्यर्थः । केतुः केतश्चितिश्चित्तं मतिः क्रतुर्मनीषामायेतिह्यभिधानं । यद्वा प्रकृतिशब्देन भ्रमनिमित्तमुक्तम् । प्रकृतिवाचिनैव मायाशब्देन भ्रांत्युपादानमुच्यत इति भेदः । उक्तंच । महदादेश्चयामाता श्रीर्भूमिरिति कल्पिता । विमोहिका च दुर्गाख्या ताभिर्विष्णुरजोपिहि । जातवत्प्रथते ह्यात्मचिद्बलात्मूढ चेतसामिति । अथवा परप्रेरणया अवतारादिकमिति शंका निवार्यते । आत्म मायया स्वेच्छयेत्यर्थः । महामायेत्याविद्येति नियतिर्मोहिनीति च । प्रकृतिर्वासनेत्येवं तवेच्छानंत कथ्यतइतिवचनात् । पूर्णकामस्य अवतारे किंप्रयोजनमित्यतउक्तम् । प्रकृतिमिति स्वभावमित्यर्थः । स्वस्वरूपमितिवदुपचारत्व शंकानिवृत्यर्थं पुनः स्वशब्दः । स्रष्टृत्वादिस्वभावत्वात् स्वेच्छया विष्णुरव्ययः । सृष्ट्यादिकं करोत्यद्धास्वयं च बहुधाभवेदितिश्रुतेः ॥ ६ ॥

मागें पुष्कळ अवतार होऊन गेले असें ह्मटल्यानें (अवतार धारण करणाऱ्या परमेश्वरास) जननमरणादि आहे असें सिद्ध होतें; आणि यामुळें मागील (अविनाशितुतद्विद्धि) वाक्यांतील अर्थाला विरोध येतो, याकरितां श्रीकृष्ण सांगतातः—हे अर्जुना, मी उत्पत्तिनाशशून्य आहे; ह्मणजे मला जन्म नाहीं व मृत्युही नाहीं. ब्रह्मादिदेवगणांहून मी श्रेष्ठ आहे. असें आहे तरी, साधुरक्षणाकरितां, मी अनेक काळीं अनेक अवतार घेतों. तें पाहून लोक मला

'उत्पन्न झाला' असें ह्मणतात. स्वरूपानें किंवा देहानें अनादि व नित्य असलेल्यास 'जन्मला' असें तरी कसें ह्मणतां येईल ? तर प्रकृतिसंबंधीं देहधारी असलेल्या देवक्यादिकांच्या देहांत मी असून लोकांत प्रगट झालों ह्मणजे मी त्यांपासून उत्पन्न झालों, अशी भ्रांति लोकांस पडते. ज्याप्रमाणें एखादा मनुष्य पृथ्वीवर धांवत असतां, अचल अशी पृथ्वीही धांवत आहे असें त्यास वाटतें, त्याप्रमाणें, मीं शाश्वत असून प्राकृत देहापासून उत्पन्न झालों असें त्यास वाटतें; आतां मला मातापितरांचा संबंध घडतो ह्मणून गर्भवासादि दुःखेंही असलींच पाहिजेत असें ह्मणशील तर, ज्या प्रकृतिगुणांनीं प्राणीमात्र झाले आहेत, ती प्रकृतीच माझ्या स्वाधीन असल्यामुळें, तें दुःख मला कदापिही होत नाहीं. आणखीं जीवांचे जन्मांत आणि तुझ्या अवतारांत काय भेद आहे ? असें तूं ह्मणशील तर ऐक; मी सर्वज्ञतादि सर्वगुणविशिष्ट असून स्वेच्छेनें लोककल्याणाकरितां अनेक अवतार घेतों. जीव हे, आपापल्या प्राक्तनानें बांधिलेले असून, ते कृतकर्माचें पुण्यपापादि फळ भोगितात. कारण ते पराधीन आहेत. त्यांचा निरुपाय झाल्यानें ते पुनः पुनः जन्ममरणयुक्त संसारांत निमग्न होत असतात. हेंच जीवांतील आणि माझ्यांतील मोठें अंतर होय. ॥ ६ ॥

यदा यदा हि धर्मस्य ग्लानिर्भवति भारत ।
अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम् ॥ ७ ॥

किंच स्वप्रयोजनाभावेपि दयालुतया भगवतः परप्रयोजनार्थमवतारादिकं युज्यत इत्यभिप्रेत्य परप्रयोजनापेक्षाकालं दर्शयन् परप्रयोजनविशेषं दर्शयति । यदेतिद्वाभ्यां ॥ ७ ॥

भगवान् नारायणानें रामकृष्णादि अवतार घेतले ते घेण्याचें त्याला कांहीं कारण होतें किंवा नाहीं ? कारण होतें असें झाल्यास नित्य व परिपूर्ण अशा परमात्म्यास अपूर्णत्व येतें; आणि अवतार घेण्याचें कांहीं कारण नसेल तर एखादा अज्ञान मनुष्य सुद्धां कांहीं तरी कारणाशिवाय कोणतेंही कार्य करण्यास प्रवृत्त होत नाहीं, असें असतां सर्व विद्यानिधि परमात्मा कारणाशिवाय कृत्य कसें करील ? तेव्हां याचें (अवतार घेण्याचें) कारण इतकेंच

कीं, शरणागत दीनांवर दया करावी. याशिवाय दुसरें कांहीं नाहीं; अशा अर्थानें सांगतातः—हे अर्जुना, ज्या ज्या वेळीं लोककल्याणकारक असा धर्म नष्ट होतो, किंवा लोकांनां दुःख देणाऱ्या अधर्माचें प्राबल्य होतें त्या त्या वेळीं मी स्वेच्छेनें अनेक अवतार घेतों. ॥ ७ ॥

परित्राणाय साधूनां विनाशाय च दुष्कृताम्।
धर्मसंस्थापनार्थाय सम्भवामि युगे युगे ॥ ८ ॥

युगेयुगइतिधर्महान्यधर्मवृद्धिकालइत्यर्थः स्वभावादेव जन्मना परित्राणादि भगवान् करोति नाशक्त्येति द्रष्टव्यम् ॥ ८ ॥

ज्या ज्या काळीं अधर्माचा प्रसार झाल्यानें साधुपुरुष नष्टप्राय होतात व दुर्जनांचा सुळसुळाट होतो, त्या त्या काळीं धर्मस्थापना करून साधूंचें रक्षण आणि दुर्जनांचा नाश करण्याकरितां मी अवतार घेतों; (जरी नित्य-मुक्त अशा वैकुंठांत असतांही त्या श्रीहरीला, साधूंचीं सर्व दुःखें नाहींशीं करण्याची शक्ति आहे, तथापि, या लोकांत अनेक अवतार घेऊन आपल्या शक्तीचा विचित्र प्रभाव दाखविल्यानें, मुक्तियोग्य अशा मंदबुद्धि जीवांनां सुद्धां, त्यांच्या ठिकाणीं दृढभक्ति उत्पन्न होऊन ते दुर्निवार अशा भवबंधापासून मुक्त व्हावेत, हाच भूलोकांत अवतार घेण्याचा त्याचा मुख्य हेतु आहे. ॥९॥

जन्म कर्म च मे दिव्यमेवं यो वेत्ति तत्त्वतः ।
त्यक्त्वा देहं पुनर्जन्म नैति मामेति सोऽर्जुन ॥ ९ ॥

एवं स्वस्य स्वभावादेवावतारादिव्यापारमुक्त्वा तज्ज्ञानफल-माह । जन्मेति । एवमुक्तप्रकारेण दिव्यमलौकिकं मे जन्म कर्म च तत्व-तोवेत्ति सदेहं त्यक्त्वा पुनर्जन्म नैति न प्राप्नोति । किंतु मामेति एकदेशज्ञानेन मुक्तिवचनं योग्य गुणज्ञानोपलक्षणार्थं येषां गुणानां ज्ञानेन मुक्तिरुक्ता पृथक् पृथक् । वेदेषु चेतिहासेषु सा तु तेषां समुच्चयात् ॥ ९ ॥

मागील श्लोकांत सांगितल्याप्रमाणें आपल्या अवतारादि विचित्र शक्ति, जीवांच्या शक्तीपेक्षां विलक्षण आहेत असें स्पष्टपणें दाखवून, त्या जो जाणतो

त्यास फळ काय मिळतें तें सांगतात:-हे अर्जुना, उक्त रीतीनें माझे जन्म किंवा कर्म जो पुरुष यथार्थपणें जाणतो, तो पुनः जन्ममरणयुक्त अशा संसारांत पडत नाहीं. इतकेंच नव्हे तर माझें स्थान जी नित्यमुक्ति ती त्यास प्राप्त होते. एक गुणाच्या ज्ञानानें अधिकारी पुरुषास मुक्ति प्राप्त होते असें शास्त्रांत ज्या ठिकाणीं सांगितलें आहे, त्या ठिकाणीं, आपल्या योग्यतेनुसार गुणाचें ज्ञान झाल्यानें मुक्ति प्राप्त होते असेंच समजावें. ॥ ९ ॥

वीतरागभयक्रोधा मन्मया मामुपाश्रिताः ।
बहवो ज्ञानतपसा पूता मद्भावमागताः ॥ १० ॥

जन्मकर्मादिज्ञानश्रद्धायाउत्पादनार्थं संति च तथा मुक्ताइत्याह । वीतेति । मन्मयाः मत्प्रचुराः सर्वत्र मां विना किंचिदपश्यंतः मामुपाश्रिताःसंतः स्वयोग्योपासनाविषयगुणविशिष्टभगवज्ज्ञानाख्येनैव तपसा पूताः दग्धकर्माणः मयिभावं सायुज्यादि लक्षणां स्थितिमापुः१०

भगवंताचें अवतार चरित्र हें कर्मज्ञान व श्रद्धा उत्पन्न होण्यास मुख्य कारण असून, यायोगानें पूर्वीं पुष्कळ मुक्त झाले आहेत; ह्मणून सांगतात:-विषयांची इच्छा सोडून, किंवा भयक्रोधादि दोष रहित होऊन, 'मन्मयाः' ह्मणजे माझ्यावांचून, संसारांत तारणारी अन्य श्रेष्ठ अशी वस्तू नाहीं असें समजणारे-निरंतर माझाच आश्रय करणारे-स्वयोग्य उपासना करून त्या उपासनेला विषयभूत गुणविशिष्ट भगवंताचें ज्ञान हेंच तप तें आचरून दग्ध कर्म ह्मणजे पवित्र झालेले असे अधिकारी सायुज्यादि मुक्ति प्राप्त करून घेतात. (असाच याचा अर्थ होय, 'मन्मय' किंवा 'मद्भाव' असें ह्मटल्यानें मजसीं ऐक्य पावतो किंवा मीच होतों असा अर्थ दिसतो तसा अर्थ घेऊं नये. कारण, अनादि अशा स्वातंत्र्यादि सकलगुणयुक्त परमात्म्याहून अल्पज्ञ व परतंत्र असे जीव नित्य भिन्नच असतात. असें जर नसतें, तर या जीवाला भवबंधमुक्त होण्याकरितां परमात्म्याच्या प्रसादाचें कांहीं कारण नव्हतें आणि, जीवांत आणि परमात्म्यांत भेदच नसेल तर जीवापासून परमात्म्याला मुक्ति कां मिळूं नये ? याप्रमाणें, जीव आणि परमात्मा यांचें ऐक्य आहे असें मानिलें तर अनेक शंका उद्भवतील हें उघड असल्यामुळें सूज्ञजन तसा अर्थ कधींही करीत नाहींत.) ॥ १० ॥

ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम् ।
मम वर्त्मानुवर्तन्ते मनुष्याः पार्थ सर्वशः ॥ ११ ॥

त्रैविद्यानामपि मोक्षसद्भावात् कोविशेषःत्वामुपाश्रितानामित्यत आह । यथेति । ये यथामामुपासते तांस्तथैव तदनुसारिफलदानरूपेणाहं भजामि अतोममसेवानुसारेण फलदत्वात्सेवायाश्च वैषम्यान्न ज्ञानिनां त्रैविद्यानां च फलसाम्यमितिभावः त्रैविद्यानामन्यदेवता याजित्वात्कथमुच्यते मां प्रपद्यंत इत्यतआह । ममेति ॥ ११ ॥

वेदत्रयोक्त कर्मविधिच्याठायीं निरत अशा त्रैविद्यांलाही मोक्ष मिळत असल्यानें, तुझ्या सेवेनेंच मोक्ष प्राप्त होतो, या तुझ्या ह्मणण्यांत विशेषता काय आहे? असें अर्जुन विचारील ह्मणून सांगतातः-हे अर्जुना, जे पुरुष मला ज्याप्रमाणें भजतात त्या प्रमाणेंच मीं त्यांना फळ देतों; कोणत्याही रीतीनें इंद्रादिदेवांच्या उद्देशानें कर्म केलें तरी, तें मलाच अनुसरून असून, तें अंतीं मला अर्पण करण्याचा हेतू ठेविल्यानें, कर्मकर्त्याच्या योग्यतेप्रमाणें फळ देणारा मीच आहें. याकरितां त्रैविद्यांपेक्षां निरंतर माझ्याच स्मरणांत रत असलेले ज्ञानि श्रेष्ठ होत; यावरून ज्ञान्यांस जी फलप्राप्ती होते ती, त्रैविद्यांस होत नाहीं. ॥ ११ ॥

कांक्षन्तः कर्मणां सिद्धिं यजन्त इह देवताः ।
क्षिप्रं हि मानुषे लोके सिद्धिर्भवति कर्मजा ॥ १२ ॥

अन्यदेवता यजंतोपि कर्मणां सिद्धिंकांक्षंतोपि मम वर्त्मानुवर्तंते इत्यर्थः । कर्मफलकांक्षित्वेपि कुतस्त्वन्मार्गानुवर्तनमित्यत आह । क्षिप्रंहीति । यस्मात्कर्मजा सिद्धिः क्षिप्रं भवति तस्मान्मम वर्त्मानुवर्तंत इतिबोद्धव्यं । मद्वर्त्माननुवर्तनेच कर्मफलंनस्यादिति । तदुक्तम् । अन्यदैवतपूजापि यस्मिन्नंते समर्पिता । स्वर्गादिफलहेतुःस्या न्नान्यथा तंभजेद्धरिमिति ॥ १२ ॥

वेदोक्त कर्मांचे ठिकाणीं रत झालेले असे, जर तीं कर्में तुलाच अर्पण करण्याच्या हेतूनें करितात, तर तुला अतिशय संतोष देणारा जो ज्ञानमार्ग

त्याचाच ते स्विकार कां करीत नाहींत ? असें अर्जुन विचारील ह्मणून, कर्ममार्ग सुलभ असून शीघ्र फळ देणारा आहे अशाविषयीं सांगतातः—मनुष्यलोकांत कर्में केल्यानें लवकर सिद्धि मिळते ह्मणून, त्या सिद्धीची इच्छा करणारे, अनेक देवतांच्या उद्देशानें कर्में करितात; त्या कर्मांची सिद्धि ज्ञानसिद्धिपेक्षां कमी होय; तथापि, तीं सर्व कर्में मलाच अर्पण केल्यानें त्यांच्या योग्यतेप्रमाणें फळ देणारा मीच आहे, असें समज. ॥ १२ ॥

चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः ।
तस्य कर्तारमपि मां विद्ध्यकर्तारमव्ययम् ॥ १३ ॥

भगवद्भजनं विना कुतोन तत्फलमित्यतस्तस्य पितृत्वादिना विशिष्टत्वात्तत्त्यागेनान्यदेवतायजंतः कथं महाफलभाजोभवेयुरित्याशयेनाह । चातुर्वर्ण्यमिति । राजससात्विकेषु सात्विको ब्राह्मणः । सत्वमधिकं यतो रजसस्तद्वान् क्षत्रियः । समसत्वरजोवान् वैश्यः । रजोपेक्षयाधिकतमोवान् शूद्रः । चतुर्वर्णसमुदायः । सात्विको ब्राह्मणः । सात्विकराजसः क्षत्रियः । राजसतामसो वैश्यः । तामसः शूद्रः । सत्वसत्वाधिकरजोरजोभिस्तमसा तथा । वर्णाविभक्ताश्चत्वारः सात्विकाएववैष्णवाइति गुणविभागः । कर्मविभागः शमोदमइत्यादिना वक्ष्यते । यथा भगवान् सर्वकर्ता एवं भवतोप्यन्यः कर्तास्ति किमित्यपेक्षायामाह । तस्येति । तस्य चातुर्वर्ण्यस्य कर्तारं । जीववत्तवापि कर्मलेपः स्यादित्यतः कर्मलेपाभावं वक्तुं हेतुं तावदाह । तस्येति । कर्तारमपि मां जीवविलक्षणकर्तृत्वादकर्तारं विद्धि । उक्तंच । अप्रयत्नात्स्वतंत्रत्वात्फलानां च विवर्जनात् । क्रियायांच स्वरूपत्वादकर्तेति च तं विदुरिति ॥ १३ ॥

भगवंताला (कर्में)अर्पण केल्याशिवाय त्याचें फळ मिळत नाहीं याचें कारण असें कीं, ज्या परमात्म्याच्या प्रसादानें, हें सर्व जग उत्पन्न झालें असतां, त्याला विसरून भलत्याच देवास संतोष देणारें असें यजन (हवन) केल्यानें त्याचें फळ मिळावें कसें? यावरून सर्व जगाचा पिता (उत्पन्नकर्ता) जो श्रीहरी त्याला अर्पण करण्याचे हेतूनें कर्में करावीं अशा अभिप्रायानें, भगवान् सर्वांचा पिता आहे असा संबंध दाखवितात—राजस सात्विकांमध्यें

ब्राह्मणांत सत्वगुण अधिक असतो ह्मणून त्यांनीं शमदमादिक कर्में करावी; सात्विक राजसांमध्यें क्षत्रियांचेठायीं रजोगुण अधीक असतो ह्मणून त्यांनीं शौर्य दानादिक कर्मे करावीं; आणि वैश्यांत तमोगुणापेक्षां रजोगुण अधीक किंवा रज आणि सत्व हे गुण सारखे वास करीत असल्यामुळें त्यांनीं गोरक्षण, शेती आणि व्यापार हीं कर्मे करावीं; शूद्रांत रजोगुणापेक्षां तमोगुण अधीक असल्यानें त्यांनीं ब्राह्मण, क्षत्रीय व वैश्य या तीन वर्णांतील लोकांची सेवा करावी; याप्रमाणें हे चार वर्ण मीच उत्पन्न केले आहेत. या चार वर्णांचा कर्ता मीच असून, मला उत्पत्ति किंवा नाश हीं नाहींत असें जाण. ॥ १३ ॥

न मां कर्माणि लिम्पन्ति न मे कर्मफले स्पृहा ।
इति मां योऽभिजानाति कर्मभिर्न स बद्ध्यते ॥१४॥

ततः किमित्यतआह । नमामिति । इतश्च न लिंपतीत्याह । नम इति । स्पृहाऽभिनिवेशः इच्छामात्रंत्वस्ति । तदुक्तं । आकांक्षन्नपि देवेशो नेच्छते लोकवत्परः। न ह्याग्रहस्तस्य विष्णोर्ज्ञानं कामोहितस्य-त्विति । यस्यालिप्तत्वंजानन्नपि सर्वकर्मलेपान्मुच्यते । नमांकर्माणि-लिंपंतीति किं वर्णनीयमित्याशयेनाह । इतीति । प्रकरणात्सिद्धेपि पुनर्मामिति । विशेषणं जीवाभेद निवृत्त्यर्थं ॥ १४ ॥

मला कर्में स्पर्श करीत नाहींत तसेंच, मला कर्मफलाची इच्छाही नाहीं. हें जो जाणतो, त्याला कर्माची बाधा होत नाहीं. मग मला कर्मलेप कसा होईल ? कर्मफलाची इच्छा न करणारा जो मीं त्या मला जो पूर्णपणें जाणतो तो सर्व कर्मबंधापासून मुक्त होतो. ॥ १४ ॥

एवं ज्ञात्वा कृतं कर्म पूर्वैरपि मुमुक्षुभिः ।
कुरु कर्मैव तस्मात्त्वं पूर्वैः पूर्वतरं कृतम् ॥ १५ ॥

एवं ज्ञात्वा यदि ज्ञानीकर्मभिर्नबध्यते तर्हि ममापि ज्ञानित्वेन कर्मबंधाभावात्कथं कर्मविधानमित्याशंक्य ज्ञानिनामप्यधिक मोक्षा-कांक्षायां कर्मकरणे आचारोप्यस्तीत्याह । एवमिति । पूर्वतरंततोपि पूर्वैः कृतत्वेन पूर्वभावीत्यर्थः ॥ १५ ॥

याप्रमाणें तुला जाणल्यानेंच जर कर्मापासून बंध प्राप्त होत नाहीं. तर, मीही तुला जाणत असल्यामुळें अर्थात् मला कर्मबंधनाची भीति नाहीं; मग मी युद्धरूप कर्म तरी कशाला करावें ? अशी अर्जुनास शंका येईल ह्मणून भगवान् सांगतातः—मोक्षांतील आनंदाभिवृद्धीची इच्छा करणारे जनकादिक राजे किंवा, त्यांच्या पूर्वींचेही ज्ञानी पूर्वोक्तप्रकारें मला जाणत असूनच कर्म करीत होते; ह्मणून तूंही कर्म करावेंस. ॥ १५ ॥

किं कर्म किमकर्मेति कवयोऽप्यत्र मोहिताः ।
तत्ते कर्म प्रवक्ष्यामि यज्ज्ञात्वा मोक्ष्यसेऽशुभात् ।१६।

कर्मकुर्वित्युक्तं तस्य कर्मणोजिज्ञासाजननार्थं दुर्विज्ञेयत्वं वदन् प्रकर्षेण वक्तुं प्रतिजानीते । किं कर्मेति । अकर्म शब्देन कर्माभावो-विरुद्धकर्म चोच्यते । अकर्मादिकं हेयत्वेन ज्ञेयं । अतउपादेयत्वेन कर्मणः प्राधान्यात्तत्ते कर्मेत्याह । यद्वा । ते कर्मेत्यत्र अकर्मेति पदच्छेदः । अशुभात्कर्मबंधनात् ॥ १६ ॥

कर्म कर असें अर्जुनास सांगितलें परंतु चांगलीं वाईट कर्में कोणतीं तीं सांगितल्याशिवाय कळणें अशक्य; ह्मणून सांगतातः—कर्म कोणतें आणि अकर्म कोणतें ? ह्याबद्दल कवि (ज्ञानी) सुद्धां भ्रमांत पडले आहेत; ह्मणून तुला, तूं कोणतें योग्य कर्म करावेंस तें सांगतों. ज्याच्या ज्ञानानें तूं अशुभरूप कर्मबंधनापासून मुक्त होशील. ॥ १६ ॥

कर्मणो ह्यपि बोद्धव्यं बोद्धव्यं च विकर्मणः ।
अकर्मणश्च बोद्धव्यं गहना कर्मणो गतिः ॥ १७ ॥

न केवलं तज्ज्ञात्वा मोक्ष्यसे अपितु ज्ञात्वैवेत्याशयेनाह । कर्मण इति । पूर्वश्लोकात्कर्माकर्मग्रहणमनुवर्तते । कर्मादिपदाध्याहारोवा । कर्मणोविविच्यविकर्मादि बोद्धव्यं । विकर्मणोविविच्यकर्मादिबोद्धव्यं । अकर्मणश्च विविच्य कर्मादिबोद्धव्यमित्यर्थः । अथवा प्रतिज्ञातं कर्मादि-स्वरूपमनेनोच्यते । कर्मणइत्यादौ न इति पृथक्पदं द्रष्टव्यम् । असमान-पदस्य रेफोत्तरस्य नस्य णत्वं । ब्रह्मणइंद्रोपयाहीत्यादौ दृष्टं । ततश्च

कर्मादिकमस्मदीयमस्मदधीनमेवेति बोद्धव्यमित्यर्थः । न इतिबहुवचनेन जीवाधीनत्वं निवारयति । एकस्यबोध्दुरबोध्दृत्वादीश्वरवद्बहुरूपत्वादमुख्यत्वादिति । नच शापादिना कवयोप्यत्र मोहिताः अशक्यं तज्ज्ञातुमित्याह । गहनेति ॥ १७ ॥

हे अर्जुना, कर्मादिकांचें स्वरूप शापादि दोषरहित अशा ऋषींलासुद्धां कळणें कठीण आहे ह्मणून तुला सांगतों:—कर्मापासून भिन्न अकर्म होय, अकर्मापासून कर्म भिन्न आहे असें जाणावें व विकर्मापासून भिन्न कर्म व अकर्म जाणावें. कर्मांचें ज्ञान होणें फार कठीण आहे. अनेकरूपी जो मीं त्या माझे स्वाधीन सर्व कर्में आहेत असें जाणावें. ॥ १७ ॥

कर्मण्यकर्म यः पश्येदकर्मणि च कर्म यः ।
स बुद्धिमान्मनुष्येषु स युक्तः कृत्स्नकर्मकृत् ॥१८॥

कर्मादिस्वरूपं प्रपंचयन्नेव तद्बोधं स्तौति । कर्मणीति । यः कर्मणि क्रियमाणेसत्यकर्म विष्णोरेव कर्म सदाहंचित्प्रतिबिंबः स्वातंत्र्येण न किंचित्करोमीति स्वस्य कर्माभावं पश्येत् । अकर्मणि सुप्त्यादावकरणावस्थायां कर्म परमेश्वरः सर्वदा सर्वं सृष्ट्यादि करोतीति परमेश्वरस्य कर्म यः पश्येत् । अथवा कर इति शब्दः कर्मवाची सोस्मिन्विषयीकारित्वेन । प्रतिष्ठित इति कर्म जीवः तद्वैपरीतत्वादकर्मेश्वरः । करोस्मिन्मीयत इति कर्म जीव उदाहृतः । विधिशब्देनामितत्वादकर्मा भगवान् हरिरितिवचनात् । ततश्च कर्मणि जीवेऽस्वातंत्र्यादकर्मकर्माभावं यः पश्येत् । अकर्मणि विष्णौ स्वातंत्र्यात्कर्म यः पश्येदित्यर्थः । अनेन भगवतः परानपेक्षया कर्तृत्वंजीवस्य तदधीनकर्तृत्वं च ज्ञात्वा तदर्थत्वेन वर्णाश्रमविहितानुष्ठानं कर्म तदकरणमकर्म तद्विपरीतकरणं विकर्मेत्युक्तं भवति । एवं यः पश्यति स बुद्धिमान् ज्ञानी स एव योगेनयुक्तः । सर्वाकरणात्सएव कृत्स्नकर्मकृत् स्वयोग्य कृत्स्नकर्मफलस्य मोक्षस्य नियतत्वात् ॥ १८ ॥

कर्मांचें स्वरूप जास्त विस्तार करून सांगावें ह्मणून कर्मांची स्तुति करितात—जो मनुष्य कर्म करते वेळीं, मी हें कर्म स्वतंत्रतेनें करीत नसून, मी

केवळ बिंबरूप, परमात्म्याचे आधिन असून, तोच (परमात्मा) माझ्याकडून हें कर्म करवितो. असें समजतो; किंवा, सुषुप्ति आदिकरून अवस्थेंत सुद्धां, सर्व सृष्टिकर्ता श्रीहरीच पूर्वसंस्कारानें उत्पन्न झालेले विषय दाखवितो, असें जाणतो, तो बुद्धिमान् योगयुक्त ज्ञानी भगवत्प्रीत्यर्थ सर्व कर्में करणारा होय असें समजावें. स्वतंत्रपणानें जीवांस कर्म करण्याची शक्ति नाहीं, ईश्वर हाच स्वतंत्र असून मुख्य कर्ता आहे. हें तात्पर्य होय. ॥ १८ ॥

यस्य सर्वे समारंभाः कामसंकल्पवर्जिताः ।
ज्ञानाग्निदग्धकर्माणं तमाहुः पंडितं बुधाः ॥ १९ ॥

न केवलं कर्तृत्वाभिमानत्यागेनैव कृत्स्नकर्मकर्तृत्वादि अपितु कामादित्यागेनापि भाव्यमित्याह । यस्येत्यादि श्लोकपंचकेन । समारंभाः आरभ्यमाणानि कर्माणि । कामः फलासंगः संकल्पः कर्मसंगः ताभ्यां वर्जिताः । अतएव ज्ञानाग्निदग्धकर्माणम् ॥ १९ ॥

मीं स्वतंत्रपणानें कर्म करीत नाहीं एवढें जाणल्यानेंच भागत नाहीं तर, कामादिकांचा त्यागही करणें अवश्य आहे, ह्मणून सांगतात–ज्याच्या सर्व कर्मांचे आरंभ काम-संकल्परहित ह्मणजे कर्मफलाची इच्छा मनांत न आणतां होतात; त्याचीं सर्व कर्में ज्ञानरूप अग्नीनें दग्ध झालेलीं असतात; अशाला विद्वान् लोक (ज्ञानी) पंडित असें ह्मणतात. ॥ १९ ॥

त्यक्त्वा कर्मफलासंगं नित्यतृप्तो निराश्रयः ।
कर्मण्यभिप्रवृत्तोऽपि नैव किंचित्करोति सः ॥ २० ॥

नच कामसंकल्पाभावेनालं फले आसंगं स्नेहंच त्यक्त्वा । ज्ञानस्वरूपं पुनरप्याह । नित्यतृप्त इति । नित्यतृप्त निराश्रयेश्वरस्वरूपोस्मीति ज्ञानवान् अनिराश्रयोवा भगवदाश्रयत्वात् ॥ २० ॥

केवळ काम-संकल्परहित झाल्यानेंही पूर्णता प्राप्त होत नाहीं; तर, कर्मफलाच्या आसक्तीचा त्याग करून ज्ञानयोगानें भगवत्स्वरूप जाणिलें पाहिजे अशा अर्थाचें भाषण करितात–कर्मफलाची आसक्ती सोडून जो नित्य तृप्त होऊन, परमात्म्याला ज्याप्रमाणें कर्मबंधन संभवत नाहीं, त्याचप्रमाणें

मीही त्या परमात्म्याचा आश्रय केल्यामुळें मलाही कर्मबंध नाहींच असें समजलो, तो कर्म करण्यास प्रवृत्त झाला तरी, तो कांहींच कर्म करीत नाहीं. ॥ २० ॥

निराशीर्यतचित्तात्मा त्यक्तसर्वपरिग्रहः ।
शारीरं केवलं कर्म कुर्वन्नाप्नोति किल्बिषम् ॥ २१ ॥

कामादित्यागोपायमाह । निराशीरिति । आत्मा मनः । यतचित्तमना भूत्वानिराशीः त्यक्त सर्वपरिग्रहश्च भवति । परिग्रहत्यागोऽनभिमानं । तथाह्युक्तम् । सुसुखंबतजीवामि यस्य मे नास्ति किंचन । मिथिलायां प्रदीप्तायां न मे दह्यति किंचनेति । ननूक्तोपायेन यस्त्यक्तकामादिः सर्वकर्मण्यभितः सर्वतः प्रवृत्तौ नैव किंचित्करोतीत्येतद्विरुद्ध मित्याशंक्य तस्याभिप्रायमाह नाप्नोतिकिल्बिषमिति । कर्मफलसंगाभावात्तन्निबंधन दोषराहित्यमेव सेंद्रियशरीरनिर्वर्त्य कर्म कारिणोऽकर्तृत्वमिति भावः ॥ २१ ॥

कामादिकांच्या त्यागाचा उपाय सांगतात:—ज्यानें आपलें मन स्वाधीन ठेविलें आहे, कर्मफळाची ज्याला इच्छा राहिली नाहीं, ज्यानें प्रपंचसंबंधीं वस्तू (देह, घर, स्त्री, पुत्र, इत्यादिकांचा) च्या संग्रहाचा त्याग केला आहे. अशा पुरुषानें केवळ शरीरनिर्वाहार्थ कर्में केलीं तरी, त्या कर्माच्या ठिकाणीं तो स्नेह ठेवीत नसल्यानें तो दोषी होत नाहीं. ॥ २१ ॥

यदृच्छालाभसन्तुष्टो द्वंद्वातीतो विमत्सरः ।
समः सिद्धावसिद्धौ च कृत्वापि न निबध्यते ॥२२॥

कामाद्यहंकार त्यागाद्युपायभूत यतचित्तात्मवतोलक्षणमाह । यदृच्छेति । कथम् द्वंद्वातीतत्वमित्यत आह । समइति ॥ २२ ॥

कर्मांचे ठायीं अभिमानादिकांचा त्याग करून कोणत्या उपायानें जितचित्त होतां येतें त्याचें लक्षण सांगतात—कोणा जवळ कांहीं मागितल्याशिवाय मिळेल तितक्यानेंच संतुष्ट असतो; शीतोष्ण सुखदुःखादि द्वंद्वापासून (लाभहानि, जयपराजय इत्यादि) हर्ष किंवा खेद ज्यास होत नाहीं. कोणत्याही कार्याची सिद्धि झाली तरी ज्यास हर्ष होत नाहीं व सिद्धि न झाली तरी दुःख

होत नाहीं ह्मणजे सिद्ध व असिद्ध या दोन्ही प्रसंगीं समबुद्धि धारण करणारा, अशा पुरुषानें कांहीं कर्म केलें तरी तो त्या कर्मानें बांधला जात नाहीं. २२

गतसंगस्य मुक्तस्य ज्ञानावस्थितचेतसः ।
यज्ञायाचरतः कर्म समग्रं प्रविलीयते ॥ २३ ॥

उपसंहरति । गतसंगस्येति । गतसंगस्य फलस्नेहरहितस्य स्वातंत्र्याभिमानाच्छरीराभिमानाद्वा मुक्तस्य । मुक्तसदृशस्य वा ज्ञानावस्थितचेतसः परमेश्वरज्ञाननिष्ठचितस्य यज्ञाय भगवते आचरतः कर्म समग्रं प्रविलीयते बंधकं न भवति । उक्तंच । एवं नृणां क्रिया योगाः सर्वे संसृति हेतवः । तएवात्म विनाशाय कल्पंते कल्पिताः परइति २३

फलस्नेहरहित किंवा शरीराभिमानरहित असा परमात्मा सर्वोत्तम असून, आपण त्या परमात्म्याचे सदैव स्वाधीन आहों असें जाणून, परमात्म्याचे प्रीति करितांच कर्म करणारा जो, त्यास तीं सर्व कर्मे बंधनकारक होत नाहींत. २३

ब्रह्मार्पणं ब्रम्ह हविर्ब्रम्हाग्नौ ब्रम्हणा हुतम् ।
ब्रम्हैव तेन गंतव्यं ब्रम्हकर्मसमाधिना ॥ २४ ॥

कीदृशं परमेश्वरज्ञानम् कथं वाऽभिमानत्यागः किं यज्ञार्थमित्यत आह । ब्रह्मार्पणमिति । अर्प्यतेऽनेनेत्यर्पणं जुव्हादिब्रह्म हविर्ब्रह्म ब्रह्मण्येवाग्नौ ब्रह्मणाकर्त्रा हुतं । तेन ब्रह्मैव गंतव्यं प्राप्यं समाधिना सह कर्मापि ब्रह्मेत्यर्थः । तदधीनत्वेन सर्वं ब्रह्मेत्युच्यते । न तु तत्स्वरूपत्वेन तदुक्तम् । त्वदधीनं यतः सर्वमतः सर्वभवानिति । वदंति मुनयः सर्वे नतु सर्व स्वरूपत इति । अथवा ब्रह्मण्यर्पणं ब्रह्मणो हविः ब्रह्मणोग्नौ ब्रह्मणः कर्म समाधिनासह समाधिरपि तदधीन इत्यर्थः । अनेन सर्वस्य ब्रह्माधीनत्वेन ब्रह्मणः स्वातंत्र्य ज्ञानं भगवज्ज्ञानं स्वस्यास्वातंत्र्यज्ञानं अभिमानत्यागः ब्रह्मार्पणं यज्ञार्थत्वमित्युक्तम् भवति ॥ २४ ॥

ईश्वर ज्ञान ह्मणजे काय? किंवा अभिमानाचा त्याग करणें ह्मणजे काय? व यज्ञार्थ कर्म कोणतें? याविषयीं सांगतातः—ब्रह्म ह्मणजे अनंतगुण-

परिपूर्ण जडजीवात्मक प्रपंचापासून विलक्षण (भिन्न) मुक्त आणि अमुक्त यांचें नियमन करणारें असें; तें नारायणरूप होय. त्यास कर्म अर्पण करणें किंवा होम करण्याला साधन अशीं जीं स्रुवादिक व हविष्य द्रव्यें व तीं जेथें हवन करावयाचीं तो अग्नि, हीं सर्व ब्रह्माचे स्वाधीन आहेत असें समजणें व हवनही त्याच्याच अधीन आहे असें जाणतो; किंवा ज्याचें कर्म व समाधि-योगही ब्रह्मनिमित्तक आहेत, असा ज्ञानी ब्रह्म (विष्णु) लोकास जातो. तात्पर्य, हविष्यादि सर्व पदार्थ हे आपल्या स्वाधीन नसून केवळ परमात्म्याचे स्वाधीन आहेत. तोच (ब्रह्म) परमात्मा मजकडून हें यज्ञादिक कर्म करवितो व मी त्याच्याच प्रेरणेनें, त्याला संतोष व्हावा ह्मणून हें सर्व सत्कर्म करितों असें जो समजतो त्याला ब्रह्म (विष्णु) पदाची प्राप्ति होते. ॥ २४ ॥

दैवमेवापरे यज्ञं योगिनः पर्युपासते ।
ब्रह्माग्नावपरे यज्ञं यज्ञेनैवोपजुह्वति ॥ २५ ॥

एतत्प्रपंचनपूर्वकमाश्रमचतुष्टयस्यापि यज्ञोस्तीति ज्ञापयितुं यज्ञ-भेदानाह । दैवमित्यादिना । दैवं भगवंतं । यज्ञमिति क्रियाविशेषणम् । भगवदुपासनमेव यतीनां यज्ञइत्यर्थः । यद्वा स्वरूपमेवानंदादि हविः स्वयमेवाग्निर्भगवान् भुङ्क्तइति यज्ञः । यज्ञं संतं विष्णुमुपासते विष्णु-रेव यज्ञः । तस्य तथोपासनं यज्ञकरणमित्युक्तं भवति । उक्तंच । ते नैव तं पूजयेद्वा विहितैर्वान्यसाधनैः। स एव विष्णोर्यज्ञः स्यान्मानसो-वाथबाह्यकइति । ब्रह्मण्यग्नौ यज्ञं भगवंतं प्रसिद्धेन यज्ञेनोपजुव्हति । यथादध्ना जुहोतीत्यत्र दधिप्रक्षेपेण होमनिष्पत्तिस्तथा त्रापि यज्ञार्पणे-नेत्यर्थः । यद्वा क्रियायज्ञं यज्ञेन विष्णुना हेतुना सर्वं तदधीनमिति ज्ञात्वा समर्पयंति ॥ २५ ॥

हें सर्व विस्तारानें सांगावें ह्मणून, ब्रह्मचर्य, गृहस्थ, वानप्रस्थ व संन्यास या चारही आश्रमांस यज्ञ करणें विहित आहे ह्मणून, यज्ञाचे प्रकार सांगतातः—कित्येक यती परामात्मा हाच यज्ञ होय असें समजून उपासना करितात. त्यांस ईश्वराची उपासना करणें याशिवाय इतर यज्ञ ह्मणून नाहीं. कित्येक गृहस्थ प्रसिद्ध यज्ञ करून ब्रह्मरूप अग्नीचेठायीं ब्रह्मप्रीत्यर्थ लौकिक

यज्ञ (यजन) प्रसिद्ध यज्ञास हविष्य असी कल्पना करून तेथेंच (होम) समर्पण करितात हा एक यज्ञ होय. ॥ २५ ॥

श्रोत्रादीनींद्रियाण्यन्ये संयमाग्निषु जुह्वति ।
शब्दादीन्विषयानन्य इन्द्रियाग्निषु जुह्वति ॥ २६ ॥

तत्पूजात्वेन प्रत्याहारात् श्रोत्रादिनिग्रहं कुर्वंति । तत्पूजात्वेन विषयान् भुंजते ॥ २६ ॥

कोणी श्रोत्रादिक इंद्रियांचा इंद्रियनिग्रहरूप अग्नि कल्पून त्या अग्नीवर होम करितात व हीच परमात्म्याची पूजा असें समजतात; कोणी शब्दादि विषयांचा (शब्द, स्पर्श, रूप, रस आणि गंध, हे शब्दादि पांच विषय) इंद्रियाग्नीवर होम करून इंद्रियांनीं विषयांचा उपभोग करतात व हीच त्या परमात्म्याची पूजा असें समजतात. ॥ २६ ॥

सर्वाणीन्द्रियकर्माणि प्राणकर्माणि चापरे ।
आत्मसंयमयोगाग्नौ जुह्वति ज्ञानदीपिते ॥ २७ ॥

तत्पूजात्वेनैवेंद्रियादिव्यापारान् आत्मनो मनसः आत्मसंयमाख्योयोगउपायः स एवाग्निस्तस्मिन् जुव्हति । विष्णवधीनत्वज्ञानं सर्वत्रावश्यकम् ॥ २७ ॥

कोणी, सर्व इंद्रियकर्मव्यापारांचा व प्राणापानादिक वायूंचे व्यापारांचा ज्ञानानें प्रदीप्त झालेल्या मनोनिग्रहरूप अग्नीवर होम करितात; ह्मणजे मनानें सर्व इंद्रियें व प्राण यांचा निरोध करतात. त्यांच्या वृत्ति स्वाधीन ठेवितात. सर्वत्र भगवदधीनत्व जाणणें आवश्यक आहे. ॥ २७ ॥

द्रव्ययज्ञास्तपोयज्ञा योगयज्ञास्तथाऽपरे ।
स्वाध्यायज्ञानयज्ञाश्च यतयः संशितव्रताः ॥ २८ ॥

द्रव्यं जुव्हतीति द्रव्ययज्ञाः । तपः परमेश्वरार्पणबुध्या तत्र जुव्हतीति तपोयज्ञाः एवं योगयज्ञाः स्वाध्याययज्ञाः ज्ञानयज्ञाश्च । यतयः प्रयतमानाः । सम्यक् शितं तीक्ष्णं व्रतं येषां ते संशितव्रताः२८

किल्येक योगी घृतादि द्रव्यानें हवन करितात; किल्येक तपश्चर्या करून तिचें परमात्म्याचे ठायीं हवन करितात; किल्येक योगाभ्यासरूप हवन करितात. किल्येक प्रयत्न करणारे व अत्यंत कठीण (दृढ) व्रतें करणारे व किल्येक वेदाध्ययन करणारे त्या त्या व्रतांचें व अध्ययनाचें परमेश्वराचेठायीं हवन करितात व किल्येक ज्ञानयोगानें हवन करितात. ॥ २८ ॥

अपाने जुह्वति प्राणं प्राणेऽपानं तथापरे ।
प्राणापानगती रुद्ध्वा प्राणायामपरायणाः ॥ २९ ॥

अपरे प्राणनियमनतत्पराः प्राणापानगतीरुध्वा प्राणमपाने जुव्हति । अपानं च प्राणे कुंभकस्था एव भवंतीत्यर्थः ॥ २९ ॥

किल्येक प्राणायामाचा अभ्यास करून, शरीरांतील अधोगमन करणाऱ्या अपानवायूचे ठिकाणीं प्राणवायूचा होम करितात, ह्मणजे रेचक, पूरक रीतीनें वायूचा निरोध करून कुंभकरूप धारणा करितात. दुसरे किल्येक प्राणवायूमध्यें अपानवायूचा, तसेंच प्राण आणि अपानवायूचा निरोध करितात. ॥ २९ ॥

अपरे नियताहाराः प्राणान्प्राणेषु जुह्वति ।
सर्वेऽप्येते यज्ञविदो यज्ञक्षपितकल्मषाः ॥ ३० ॥

नियताहारत्वेनेंद्रियेषु तद्वृत्तिसंकोचात्प्राणान् प्राणेषुजुव्हति । यदस्याल्पाशनं तेन प्राणाः प्राणेषु वैहुता इति वचनात् । यच्छेद्वाङ्मनसीप्राज्ञइत्यादिश्रुत्युक्तप्रकारेणावराणामिंद्रियदेवताना मुक्तमेंद्रियदेवता नियतत्वचिंतनात्त्विद्रियाणामिंद्रियेषु होमः । अस्मिन्पक्षे नियताहाराइति पृथग्यज्ञो ज्ञातव्यः । एवं यज्ञभेदान् ज्ञात्वा अनुतिष्ठतां फलमाह सर्वेपीति ॥ ३० ॥

किल्येक नियमित आहार ठेवून इंद्रियवृत्तीला इंद्रियांचेठायीं हवन करितात; हे सर्व यज्ञानुष्ठानानें दोषरहित होऊन, यज्ञ नामक परमात्मा, सर्वांतर्यामी आहे असें समजतात. इंद्रियाभिमानी कनिष्ठ देव त्या इंद्रियाभिमानी उच्च देवतांच्या आधीन आहेत असें समजणें हाच इंद्रिय होम होय. ॥३०॥

यज्ञशिष्टामृतभुजो यान्ति ब्रम्ह सनातनम् ।
नायं लोकोऽस्त्ययज्ञस्य कुतोऽन्यः कुरुसत्तम ॥ ३१ ॥

यज्ञाकरणे दोषमाह नायमिति । अयमल्पसुखोऽपि मनुष्यलोकः अयज्ञस्य यज्ञानुष्ठानशून्यस्य नास्ति कुतोऽन्यः स्वर्गादिः अतोयज्ञाः सर्वथा कर्तव्याइत्यर्थः ॥ ३१ ॥

यज्ञ केल्याचें फळ काय व तो न केल्यानें दोष कोणता, तें सांगतातः—हे कुरुकुलोत्पन्ना अर्जुना, अमृत ह्मणजे यज्ञ करून राहिलेलें शेष त्याचें भोजन करणारे अविनाशी अशा ब्रह्मलोकांत जातात. जे कोणी आपल्या योग्यतेप्रमाणें हे यज्ञ करीत नाहींत, त्यांस अल्प सुख प्राप्य असा हा मनुष्य लोकही मिळत नाहीं. तर, जो पुष्कळ सुख देणारा परलोक तो कोठून प्राप्त होणार? होणार नाहीं. याकरितां आपापल्या योग्यतेप्रमाणें यज्ञ करून, त्याच्या फळाविषयीं निरिच्छ होऊन, तो यज्ञ श्रीहरी परमात्म्याला अर्पण करणें हें योग्य होय. ॥ ३१ ॥

एवं बहुविधा यज्ञा वितता ब्रह्मणो मुखे ।
कर्मजान्विद्धि तान्सर्वानेवं ज्ञात्वा विमोक्ष्यसे ॥३२॥

उक्तान् यज्ञभेदानुपसंहरति । एवमिति । श्रोत्रादीनित्यादिष्वीज्यानुक्तेरीज्योऽन्यइति शंकास्याचां वारयति । विततात्रह्मणोमुखइति । ब्रह्मणः परमात्मनोमुखे वितताइति सर्वयज्ञभोक्तृत्वाद्विष्णवाख्यं ब्रह्मैव यज्ञैरीज्यत इत्यर्थः । यद्येवमनेके यज्ञास्तर्हि ज्ञानादियज्ञेनैवालं किं कर्मात्मकेन युद्धेनेत्यत आह । कर्मजानिति । मानासिकवाचिककायिक कर्मजानित्यर्थः । ततः किमित्यत आह । एवमिति । यदि सर्वेऽपि यज्ञाः कर्मजाइति जानासि तर्हि ततोविशेषाभावात् स्वविहितयुद्धादिकं करिष्यसि ततो मुक्तोभविष्यसि कर्मजत्वेनज्ञानाभावे युद्धादिकं परित्यज्य मोक्षार्थं ज्ञानादिकमेवानुतिष्ठतो भवतोविहितातिक्रमादनर्थएव स्यान्न मोक्ष इत्याशयः विमोक्षसे इतिपाठे सन्नंतान्मुचः कर्मकर्तरि । यद्वा मोक्षे कर्मीभूतस्येवात्मनः कर्तृत्वादेवंज्ञात्वा यदि सर्वेऽपियज्ञाः

कर्मजाइति जानासि तर्हि तानि युद्धादीनिस्वविहितानि कर्माणि कृत्वैव मोक्षसे संसारादात्मानं मोक्तुं इच्छासि । सर्वेषां कर्मजत्वज्ञाने तवैव मोक्षार्थं युद्धादिकं कर्तव्यमितीच्छा भविष्यतीत्यर्थः ॥ ३२ ॥

ह्या सर्व यज्ञांचा भोक्ता **श्रीनारायण** आहे असें सांगितलें; आतां अनेक प्रकारचे यज्ञ असतांनां ते करण्याचें सोडून मी युद्धच कां करावें? अशी अर्जुनास शंका येईल तिचें निरसन करितातः–हे (मागें सांगितलेले) अनेक प्रकारचे यज्ञ वेदमुखानें प्रसिद्ध झाले आहेत; ह्मणजे वेदांनीं ते विहित मानिले आहेत; परंतु, ते कायिक, वाचिक, मानसिक कर्मापासून उत्पन्न होतात, असें समजून, तूं स्वधर्मोचित (युद्धरूपी) यज्ञ करून, तो मला अर्पण केल्यानें मुक्त होशील. तुझ्या धर्माला उचित अशा युद्धाचा त्याग करून, इतर रीतीनें उपासना करशील तर, तूं आपल्या धर्माचा त्याग केल्यासारखें होईल; तो तूं कदापि करूं नकोस; तूं क्षात्रकुलोत्पन्न असल्यामुळें तुला युद्ध केल्याशिवाय मुक्ति नाहीं. ॥ ३२ ॥

श्रेयान्द्रव्यमयाद्यज्ञाज्ज्ञानयज्ञः परन्तप ।
सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते ॥ ३३ ॥

उक्तेषु यज्ञेषु को यज्ञः श्रेष्ठ इति जिज्ञासायामाह । श्रेयानिति । द्रव्यमयादिति यज्ञांतराणामप्युपलक्षणार्थं श्रेष्ठत्वेहेतुः सर्वमिति । सर्वं कर्म अखिलं तांध्यायेद्रूषट्करिष्यन्नित्याद्युपासनाद्यंगसहितं ज्ञाने ज्ञानोत्पत्तौ परिसमाप्यते उपक्षीणं भवति । ज्ञानफलमेवेत्यर्थः । अथवा आसमंतात्खिलं अल्पं ज्ञाने जाते परिसमाप्यते पूर्यते ज्ञानिना कृतमल्पमपि कर्म संपूर्णफलं भवतीत्यर्थः । उक्तंच । अल्पमात्रकृतो धर्मो भवेज्ज्ञानवतो महान् । महानपिकृतोधर्मो ह्यज्ञाना न्निष्फलो भवेदिति ॥ ३३ ॥

पूर्वीं सांगितलेल्या सर्व यज्ञांमध्यें कोणता यज्ञ श्रेष्ठ आहे तें सांगतातः— हे शत्रुसंहारका पृथापुत्रा **अर्जुना,** द्रव्ययज्ञापेक्षां ज्ञानयज्ञ श्रेष्ठ होय. कारण, सर्व कर्में ज्ञानयज्ञानेंच सफल होतात; अथवा, कर्म हें अल्पसुखाचें साधन आहे परंतु तेंच ज्ञानानें विशिष्ट सुखाला साधन होतें; कारण, कर्मरूप-धर्म

अल्प असला तरी, ज्ञान्याला विशिष्ट फल देणारा होतो; परंतु मोठा कर्मरूप-धर्म असला तरी, ज्याला श्रीहरीचें ज्ञान नाहीं. अशाला तो निष्फळच होतो. ॥ ३३ ॥

तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया ।
उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः ॥ ३४ ॥

कर्मणोज्ञानमधिकमित्युक्त्वा तद्वेदनम् संपादयेत्याह । तदिति । दंडप्रणामादिना प्रपन्नस्य गुरूपदेशो ज्ञानसाधनं । भगवतैवोपदिष्टत्वा दुपदेक्ष्यमाणत्वाच्च सएवात्रानेकरूपः परोक्षतया निर्दिश्यते। अर्जुनस्य ज्ञानित्वा दुत्पन्नज्ञानतिरोभावनिवृत्त्यर्थमुपदेशः ॥ ३४ ॥

कर्मापेक्षां ज्ञानाची योग्यता अधिक आहे, ह्मणून तें ज्ञान कसें संपादन करावें तें सांगतातः—तें अपरोक्ष ज्ञान गुरूला संतोष होईल अशी सेवा केल्यानें, किंवा त्यांना साष्टांग प्रणिपात केल्यानें, अथवा सविनय प्रश्न केल्यानें, ते अपरोक्षज्ञानी (गुरू) माझ्याकडून प्रेरित होऊन, तुला (ज्ञानाचा) उपदेश करतील. ॥ ३४ ॥

यज्ज्ञात्वा न पुनर्मोहमेवं यास्यसि पाण्डव ।
येन भूतान्यशेषेण द्रक्ष्यस्यात्मन्यथो मयि ॥ ३५ ॥

मदुपदेशानंतरं ज्ञानस्यतिरोभावोनभविष्यति तेनाशेषतत्वार्थावगतिश्च भवतीत्याह । यदिति । येन ज्ञानेन मय्यात्मनि नियामके सति सर्वाणिभूतान्यशेषेण कात्स्न्येन अथो तस्मात् मोहनाशात् द्रक्ष्यसि । यद्वा आत्मनि व्याप्ते मयि अथो तस्माद्व्याप्तत्वादेव द्रक्ष्यसीत्यर्थः ॥ ३५ ॥

मी उपदेश केलेल्या या ज्ञानाचा कधींही नाश होत नसून, तुला बाकी राहिलेलें ज्ञानही होईल अशा अर्थानें सांगतातः—हे पंडुपुत्रा अर्जुना, जें ज्ञान तूं जाणलेंस ह्मणजे आतांसारखा पुन्हां बांधवादिकांच्या वधरूप मोहांत पडणार नाहींस, कां कीं, त्या ज्ञानाचे योगानें तूं पहाशील कीं, सर्वव्यापक किंवा सर्वप्रेरक जो मीं त्या माझेठायीं सर्व भूतें आश्रय करून असतात; असें समज. ॥ ३५ ॥

अपि चेदसि पापेभ्यः सर्वेभ्यः पापकृत्तमः ।
सर्वं ज्ञानप्लवेनैव वृजिनं सन्तरिष्यसि ॥ ३६ ॥

कारणभूतंज्ञानं पुनस्तौति । अपिचेत्यादि श्लोकत्रयेण । पापेभ्यः पापकृद्भ्योपि पापकृत्तमः अतिशयेन पापकृत्तमः अतिशयेन पापकारी असि चेत्तथापि सर्वं वृजिनं पापं ज्ञानप्लवेन ज्ञानाख्येन योगेनैव सम्यक् तरिष्यसि ॥ ३६ ॥

' अपिचेत्यादि ' तीन श्लोकांनीं कारणभूत ज्ञानाची पुनः स्तुति करितातः–सर्व पाप्यांमध्यें तूं जरी अतिशय मोठा पातकी असलास तरी, या अपरोक्षज्ञानाचे योगानें, पापरूप समुद्राला उल्लंघून जाशील. ॥ ३६ ॥

यथैधांसि समिद्धोऽग्निर्भस्मसात्कुरुतेऽर्जुन ।
ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा ॥ ३७ ॥

एधांसि दारूणि समिद्धः प्रदीप्तः । भस्मसात् भस्मीभूतानि । सर्वाणि प्रारब्धव्यतिरिक्तानि । कर्माणिक्षपयेद्विष्णुरप्रारब्धानि विद्यया । प्रारब्धानितु भोगेन क्षपयेत्स्वपदं नयन्निति वचनात् ॥ ३७ ॥

हे अर्जुना, जसा प्रदीप्त अग्नि लांकडें जाळून त्यांची राख करून टाकितो, तसा ज्ञानरूपअग्नि प्रारब्धकर्मांवांचून निषिद्ध असलेलीं सर्व कर्में जाळून टाकितो. प्रारब्धकर्म मात्र, भोगल्यानंतर, भगवत्प्रसादानें मुक्ति प्राप्त होते. ॥ ३७ ॥

न हि ज्ञानेन सदृशं पवित्रमिह विद्यते ।
तत्स्वयं योगसंसिद्धः कालेनात्मनि विंदति ॥३८॥

तज्ज्ञानयोगसंसिद्धः सिद्धोपायः कालेन बहुना विंदति प्राप्नोति३८

ह्या लोकांत परलोक प्राप्तीचीं साधनें पुष्कळ आहेत. परंतु आत्मज्ञानासारखें पवित्र असें दुसरें कांहीं नाहीं. तें प्राप्त झालें असतां संसाररूप वज्रापासून रक्षण होतें; ह्मणून तें ज्ञान उपायसिद्ध असलेला पुरुष कांहीं काळानें जाणतो. ॥ ३८ ॥

श्रद्धावांल्लभते ज्ञानं तत्परः संयतेन्द्रियः ।
ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति ॥३९॥

ज्ञानस्यांतरंगसाधनमाह । श्रद्धावानिति । आस्तिक्यबुद्धिमान् तदेकनिष्ठोजितेंद्रियश्च ज्ञानं लभते । ज्ञानफलमाह ज्ञानमिति । शांतिं- मोक्षम् ॥ ३९ ॥

ज्ञानाचें अंतरंगसाधन सांगतातः—आस्तिक्यबुद्धियुक्त, इंद्रियें स्वाधीन ठेवणारा, आणि भगवंताचे ठिकाणीं निष्ठा ठेवणारा, अशालाच ज्ञानप्राप्ति होते; व तें ज्ञान प्राप्त झाल्यावर, सर्व सुखांत उत्तम असें जें मुक्तिसुख तें त्याला प्राप्त होतें (मोक्षप्राप्त होतो.) ॥ ३९ ॥

अज्ञश्चाश्रद्दधानश्च संशयात्मा विनश्यति ।
नायं लोकोऽस्ति न परो न सुखं संशयात्मनः ४०

ज्ञानतत्साधनाभावे तद्विरोधेचानिष्टमाह । अज्ञश्चेति ॥ ४० ॥

परंतु अज्ञानी असून श्रद्धारहित व ज्याचें चित्त सदोदित संशयग्रस्त असतें, असा पुरुष नष्ट होतो. संशयखोरास हा लोक किंवा परलोक प्राप्त होत नाहीं व सुखही होत नाहीं. ॥ ४० ॥

योगसंन्यस्तकर्माणं ज्ञानसंछिन्नसंशयम् ।
आत्मवंतं न कर्माणि निबध्नंति धनंजय ॥ ४१ ॥

ज्ञानसाधनमनुवदन् ज्ञानफलं प्रपंचयति । योगेति । योगेन विष्णौ समर्पितं कर्म येन स तथा तं । ज्ञानेन संछिन्नःसंशयो येन स तथा तं । आत्मवंतं परमात्मभक्तम् कर्माणि न निबध्नंति ॥ ४१ ॥

ज्ञानसाधन सांगून त्याचें फळही सांगतातः—हे अर्जुना, ईश्वराचें आराधन करून, कर्म ईश्वरार्पण करणारा, ज्ञानप्राप्तीमुळें ज्याचे सर्व संशय नाहींसे झाले आहेत, अशा आत्मनिष्ठास (परमेश्वरभक्तास) कर्में बद्ध करूं शकत नाहींत. ॥ ४१ ॥

तस्मादज्ञानसम्भूतं हृत्स्थं ज्ञानासिनात्मनः ।
छित्त्वैनं संशयं योगमातिष्ठोत्तिष्ठ भारत ॥ ४२ ॥

इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे ज्ञानकर्मयोगोनाम चतुर्थोऽध्यायः ॥ ४ ॥

एवमुपपादितं कर्मणः कर्तव्यत्वमुपसंहरति । तस्मादिति। अज्ञानजं हृद्गतं आत्मनः संशयं ज्ञानाख्येन खड्गेन च्छित्वा योगमातिष्ठ युद्धायोत्तिष्ठेति ॥ ४२ ॥

इति श्रीमद्भगवद्गीताविवृतौ विद्याधिराजभट्टोपाध्यायविरचितायाम् श्रीमध्वमतानुवर्तिनी व्याख्योपेतायाम् चतुर्थोऽध्यायः ॥ ४ ॥

याप्रमाणें कर्मांचें कर्तव्य सांगून, उपसंहार करितातः—हे भरतकुलोत्पन्ना, ह्मणून, तुझ्या मनांत उत्पन्न झालेला गोत्रवधाचा संशय, ज्ञानरूप तलवारीनें छेदून टाक; सावध हो आणि भगवदर्पण करण्याचे हेतूनें तुझें कर्म-युद्ध-तें करण्यास तयार हो. ॥ ४२ ॥

येथें श्रीमदिन्दिराकान्ततीर्थ श्रीपादविरचित प्राकृत टीकेचा चवथा अध्याय समाप्त झाला.

अथ पञ्चमोऽध्यायः

अर्जुन उवाच ।

संन्यासं कर्मणां कृष्ण पुनर्योगं च शंससि ।
यच्छ्रेय एतयोरेकं तन्मे ब्रूहि सुनिश्चितम् ॥ १ ॥

श्रीगुरुभ्यो नमः । निरूपितः पूर्वं समुचितः कर्मयोगः स च योगसंन्यासभेदेन द्विविधः । तस्य द्विविधस्य योगस्य स्वरूपं संक्षेपेण कुरुकर्माणि संगंत्यक्त्वेत्यादौ उक्तम् तदेवास्मिन्नध्याये प्रपंच्यते । तत्रार्जुनउवाच । संन्यासमिति । यदृच्छालाभसंतुष्टइत्यादिना संन्यासं कामादिवर्जनलक्षणं शंससि कुरुकर्मेति कर्मयोगंच शंससि । एतयोरुक्तलक्षणयोः संन्यासकर्मयोगयोर्मध्ये यच्छ्रेयोऽधिकं तदेकं मम सुनिश्चितं यथास्यात्तथाब्रूहि । अयंभावः संन्यासस्याधिकत्वे तमेव गृहीष्यामि किं तद्विरोधिना रागादियुक्तेन युद्धाख्येनाधिकेनापि कर्मयोगेनेति । अथवा योगसंन्यस्तकर्माणमित्यादिना संन्यासाश्रमं शंससि । योगमातिष्ठेत्यादिना गृहस्थाश्रमं । एतयोर्मध्ये यच्छ्रेयस्तद्ब्रूहि । उभयोरेकेनैवानुष्ठातुमशक्यत्वादन्यतरपरित्यागे नान्यतरग्रहणे श्रेयसएवग्राह्यत्वादितिप्रश्नाभिप्रायः ॥ १ ॥

(पूर्वींच्या अध्यायांत, संन्यासयोग व कर्मयोग यांचें संक्षेपानें निरूपण केलें. या अध्यायांत त्यांचें विस्तारानें निरूपण करितील) अर्जुन ह्मणतो, हे भगवान् श्रीकृष्णा, कर्मांचा त्याग करून, यदृच्छालाभानें संतुष्ट असावें ह्मणून प्रथम सांगून, पुन्हा कर्म करावें ह्मणून सांगतोस; परंतु, या दोहोंमध्यें जें मला अधीक श्रेयस्कर होईल तें सांग; ह्मणजे संन्यास मला श्रेयस्कर होण्यासारखा असेल तर त्याचाच मी स्वीकार करीन; ह्मणजे रागद्वेषादिकांनीं युक्त असें युद्ध करावयास नको; किंवा गृहस्थाश्रमाचा स्वीकार करून, कर्म करणें मला उक्त असेल तर तसें सांग; ह्मणजे मी त्याप्रमाणें करीन. ॥ १ ॥

श्री भगवानुवाच ।

संन्यासः कर्मयोगश्च निःश्रेयसकरावुभौ ।
तयोस्तु कर्मसंन्यासात्कर्मयोगो विशिष्यते ॥ २ ॥

श्रीभगवानुवाच । संन्यासइति । द्वावपि निःश्रेयसकरौ तत्रापि संन्यासात् योगोविशिष्टोऽतो न युद्धं त्वया त्याज्यमिति परिहारः द्वितीये प्रश्नाभिप्रायेतु संन्यासकर्मयोगावुभौ समुचितौ निःश्रेयसकरौ तस्मात् द्वावप्यनुष्ठेयौ तत्रान्यतरश्रेयस्त्वप्रश्नोऽनर्थकएव । स्वरूपमात्रज्ञानार्थं प्रश्नश्चेद्योगएव विशिष्ट इति ॥ २ ॥

श्रीकृष्ण ह्मणतात हे अर्जुना, संन्यास आणि कर्मयोग हे दोन्हीही कल्याणकारकच आहेत; परंतु या दोहोंत, कर्म करणें (कर्मयोग) हेंच चांगलें; ह्मणून तूं तुझें कर्म जें युद्ध त्याचा त्याग करणें बरें नव्हे. अथवा संन्यास व कर्मयोग उभयहि समुचित एकत्र्यानें आचरण केल्यास ते उत्तम कल्याणकारक होतात. ह्मणून यांत श्रेष्ठ कोण ? हें विचारणेंच मुळीं चांगलें नव्हे. पण त्यांचें (कर्म व संन्यास यांचें) स्वरूप समजावें ह्मणून प्रश्न असेल तर, यांत कर्मयोग श्रेष्ठ आहे असें समज. ॥ २ ॥

ज्ञेयः स नित्यसंन्यासि यो न द्वेष्टि न कांक्षति ।
निर्द्वंद्वो हि महाबाहो सुखं बंधात्प्रमुच्यते ॥ ३ ॥

संन्यासस्य निःश्रेयसकरत्वं ज्ञापयितुं संन्यासशब्दार्थं स्मारयति । ज्ञेयइति । स्मर्तव्यइत्यर्थः व्याख्यानांतरे तु कथं योगसंन्यासयोः समुच्चयो युज्यते यतिगृहस्थयोरधिकारभेदादित्यतआह । ज्ञेयइति । योगसंन्यस्तकर्माणमित्यादौ द्वेषादिवर्जनमेव संन्यासोभिमतो न यत्याश्रमइतिभावः । एवं योगमातिष्ठेत्यादौ भगवदर्पणादियोगएवाभिमतो न गृहस्थाश्रम इत्यपि द्रष्टव्यम् । नच कामादिवर्जनस्यसंन्यासशब्दार्थत्वे काम्यानां कर्मणांन्यासंसंन्यासमित्यनेन विरोधः । तेनापि सहितस्यसत्वात् । नच सर्वकर्मफलत्यागंप्राहुस्त्यागंविचक्षणाइति कामादिवर्जनस्य त्यागत्वेनोक्तत्वात्तद्विरोधः । कुरुपांडवन्यायेन संन्यासावांतरभेदत्वात्त्यागस्येति द्रष्टव्यम् ॥ ३ ॥

संन्यास हाच कल्याणदायक आहे असें दाखविण्याकरितां, संन्यास ह्मणजे कर्म संन्यास—कर्म योग—कर्म करणें—हीं दोन्हीं आचरलीं असतां कल्याणदायकच होतात; परंतु, त्या दोन्हींचे अधिकारी यति व गृहस्थाश्रमी

यांचे अधिकार निरनिराळे असल्यामुळें एकालाच ते दोन्हीं करतां येणें अशक्य होय. ह्मणून संन्यास ह्मणजे काय तें सांगतातः—हे भुजशाली अर्जुना, जो भगवद्भक्तांचा द्वेष करीत नाहीं व कशाचीही इच्छा करीत नाहीं, सुखदुःखादि द्वंद्वरहित असा असतो, तोच संन्यासी समजावा; असा संन्यासी अनायासें संसारबंधापासून मुक्त होतो. ॥ ३ ॥

सांख्ययोगौ पृथग्बालाः प्रवदंति न पंडिताः ।
एकमप्यास्थितः सम्यगुभयोर्विंदते फलम् ॥ ४ ॥

ननु कामादिवर्जनस्य ज्ञानोत्पत्त्यंतरंगत्वेन परीक्ष्य लोकान् कर्मचितान् ब्राह्मणोनिर्वेदमायादित्यादिश्रुतिसिद्धत्वात्कर्मानुष्ठानस्याग्निमुग्धोहवैधूमतांतःस्वर्लोकं न प्रतिजानाति इत्यादिना निंदितत्वात्कथं संन्यासाद्योगोवरइत्यतआह । सांख्ययोगाविति । ज्ञानकर्मयोगौ पृथक् साध्यसाधनभावहीनाविति बाला अविवेकिनोवदंति नतु पंडिताः । अग्निमुग्धइतितु काम्यकर्मविषयमितिभावः । योगस्य ज्ञानसाधनत्वे प्रमिते भवेदेतत्तदेवकथमित्यतआह । एकमपीति ॥ ४ ॥

ज्ञानयोग व कर्मयोग हे, निराळे आहेत असें अविवेकी लोक ह्मणतात; पण ते निराळे नाहींत असें विवेकी (पंडीत) लोक ह्मणतात. या दोहोंपैकीं एकाचेंही चांगल्या रीतीनें आचरण केलें असतां, दोहोंचेंही फळ मिळतें. कर्मयोगाचें योग्य प्रकारें आचरण केलें असतां ज्ञान प्राप्त होऊन, दोहोंच्या आचरणानें मिळणारें जें मोक्षफळ तें मिळतें. ॥ ४ ॥

यत्सांख्यैः प्राप्यते स्थानं तद्योगैरपि गम्यते ।
एकं सांख्यं च योगं च यः पश्यति स पश्यति ।५।

तस्याभिप्रायमाह । यत्सांख्यैरिति । सांख्यैर्ज्ञानिभिर्यत् स्थानं प्राप्यते तद्योगैः योगिभिरपि ज्ञानद्वारा गम्यते एवंच सांख्यंचयोगंच एकं साध्यसाधनभाववत् यः पश्यति स ज्ञानीत्यर्थः । द्वितीयव्याख्याने तु योगसंन्यासशब्दयोराश्रमार्थत्वाभावाद्योगसंन्यासयोराधिकारभेदप्रयुक्तः समावेशाप्रयोगोनिरस्तः । अथासावधिकारभेदो न युज्यते इत्याह

सांख्ययोगाविति । बालास्तु संन्यासशब्देन यत्याश्रममेव स्वीकृत्य तत्स्थानामेव सांख्यशब्दोदितज्ञानाधिकारोगृहस्थानामेव योगशब्दोदितकर्माधिकार इतिमन्यंते । तन्न पंडितामन्यते । कुतःयस्मात् ज्ञानमार्गे कर्ममार्गेवासम्यगास्थितः उभयोरपि फलं प्राप्नोति । तस्मात् ज्ञानिनां यतीनां कर्माप्यनुष्ठेयं । कर्मिणामपि गृहस्थादीनां ज्ञातव्यो भगवान् । नहि ज्ञानं विना कर्मणः सम्यगनुष्ठानं भवति । आश्रमभेदस्तु कर्मसंकोचविकासापेक्षइति श्लोकद्वयतात्पर्यार्थः ॥ ५ ॥

ज्ञानयोग किंवा कर्मयोग हे दोन्हीही आचरण्यास एकच अधिकारी योग्य आहे असें जो समजतो, तोच ज्ञानी समजावा; ज्ञानयोगी संन्याशाला कर्मयोगाचा अधिकार आहे, व कर्मयोगी गृहस्थाला ज्ञानयोगाचा अधिकार आहे, दोघांनांही एकाच स्थानाची—मोक्षाची—प्राप्ति होते. ॥ ५ ॥

संन्यासस्तु महाबाहो दुःखमाप्तुमयोगतः ।
योगयुक्तो मुनिर्ब्रम्ह न चिरेणाधिगच्छति ॥ ६ ॥

संन्यासाद्योगस्यवरत्वमन्वयव्यतिरेकाभ्यामुपपादयति । संन्यासस्त्विति । अयोगतः योगंविना संन्यासोदुःखम् कामजयादिजनितमाप्तुमेव न मोक्षादिप्राप्त्यर्थमितिव्यतिरेकः । यच्चाल्पफलम् तन्महाफलस्य योगस्य पद्मरागस्येव तंडुलमुष्टिफलमेव न भवतीत्याशयः । मुनिः संन्यासी सहिलोके मुनिर्नाम यः कामक्रोधवर्जित इत्युक्तेः । योगयुक्तःसन्नचिरेण शीघ्रं ब्रह्मादिगच्छतीत्यन्वयः । व्याख्यानांतरेतु समुचितयोरेव योगसंन्यासयोर्निःश्रेयसकरत्वमुक्तम् तदन्वयव्यतिरेकाभ्यामुपपादयति । अयोगतइतिभावप्रधानोनिर्देशः योगरूपत्वंविनेत्यर्थः । उक्तंच । मोक्षोपायोयोगइति तद्रूपोन्यासएवतु । विष्णवर्पिततयाभद्रोनान्योन्यासः कथं च नेति । एवंच व्याख्यानद्वयेपिसंन्यासस्ययोगांतर्भूतत्वं सिद्धम् ॥ ६ ॥

हे भुजशाली अर्जुना, कृष्णार्पण करण्याच्या हेतूनें केलेला कामादिवर्जनरूप संन्यास मोक्षप्राप्तीस साधन आहे, ह्मणून तो संन्याशाला योगरूपत्व आहे. या योगरूप संन्याशाला मोक्ष साधनत्व आहे. योगरूप नसलेल्या

संन्यासास मोक्ष साधनत्व नाहीं. अथवा योगावांचून संन्यासाची प्राप्ति दुर्घट होय. योगयुक्त संन्यासी लवकर मोक्षास जातो. ॥ ६ ॥

योगयुक्तो विशुद्धात्मा विजितात्मा जितेन्द्रियः ।
सर्वभूतात्मभूतात्मा कुर्वन्नपि न लिप्यते ॥ ७ ॥

योगयुक्तसंन्यासस्य मोक्षार्थत्वं प्रपंचयति । योगयुक्तइति । योगयुक्तः विशुद्धचित्तः अतएव विजितात्मा विजितमनाः जितान्येन्द्रियः सर्वभूतानामादानकर्तृत्वादात्मभूतः परमात्मा सः स्वसमीपंप्रत्यादानादिकर्ता यस्य ससर्वभूतात्मभूतात्मा । यच्चाप्नोतियदादत्तेयच्चात्तिविषयानिह । यच्चास्यसंततो भावस्तस्मादात्मेतिभण्यतइतिवचनात् । सर्वभूतात्मनि विष्णौ भूतः स्थितः आत्मा यस्य सइतिवा । कर्माणिकुर्वन्नपि ॥ ७ ॥

पूर्वीं सांगितलेल्या कर्मयोग्यास मोक्ष कशा प्रकारें मिळतो तें सांगतात— ज्याचें अंतःकरण शुद्ध झालें आहे, ज्यानें आत्मसंयमन केलें आहे, ज्यानें इंद्रियें स्वाधीन करून घेतलीं आहेत व सर्व प्राणिमात्रांस आदानादिकर्ता ईश्वरच आहे, तोच माझाही नियामक आहे किंवा सर्व प्राणीमात्र त्याचा (ईश्वराचा) आश्रय करून आहेत, असें जो समजतो, तो कर्म करीत असला तरीही केलेल्या कर्मानें बद्ध होत नाहीं. ॥ ७ ॥

नैव किंचित्करोमीति युक्तो मन्येत तत्त्ववित् ।
पश्यन्शृण्वन्स्पृशन्जिघ्रन्नश्नन्गच्छन्स्वपन्श्वसन् ॥ ८ ॥
प्रलपन्विसृजन्गृण्हन्नुन्मिषन्निमिषन्नपि ।
इंद्रियाणींद्रियार्थेषु वर्तंत इति धारयन् ॥ ९ ॥

योगरूपसंन्यासस्यमोक्षहेतुत्वमुक्तम् । तत्र संन्यासस्य योगरूपत्वं केनप्रकारेणेत्यतोयथा संन्यासस्य योगरूपत्वं तथा संन्यासं पुनः स्पष्टयति । नैवाकिंचिदित्यादि श्लोकद्वयेन । परमेश्वरेच्छयेंद्रियाणि विषयेषु वर्ततइति धारयन्स्वातंत्र्याभावान्नाकिंचित्करोमीतिमन्यते ।

उक्तंच । विष्णुनार्थेष्वीरितानि मनआदीनिसर्वशः । वर्ततेन्यो न स्वतंत्र इतिजानाति तत्वविदिति ॥ ८ ॥ ९ ॥

योगयुक्त संन्यास मोक्षास कारण आहे असें पूर्वीं सांगितलें; आतां त्या संन्यासाला योगरूपत्व कसें प्राप्त होईल तो प्रकार सांगून संन्यासयोगाचें पुनः स्पष्टीकरण करितातः-इंद्रियें हीं केवळ ईश्वराच्या प्रेरणेनेंच त्यांच्या विषयांच्या ठिकाणीं प्रवर्ततात (ह्मणजे ईश्वरप्रेरणेनें इंद्रियें विषयांकडे जातात,) मी त्या ईश्वराचे स्वाधीन असून अस्वतंत्र असल्यामुळें, स्वतंत्रपणानें मला विषयभोग स्वातंत्र्यानें करितां येणें शक्य नाहीं, असा अधिकारी (तत्वज्ञ कर्मयोगी) पहात, ऐकत, स्पर्श करीत, वास घेत, जेवीत, चालत, निजत, श्वासोच्छ्वास करीत, बडबडत, टाकीत, घेत, डोळे उघडीत, मिटीत, असला तरी, यांपैकीं कोणतेंही एकसुद्धां कर्म मी स्वतंत्रपणानें करीत नसून, हें सर्व भगवंताच्या आज्ञेनें होतें असें जाणतो ॥ ८ ॥ ९ ॥

ब्रह्मण्याधाय कर्माणि संगं त्यक्त्वा करोति यः ।
लिप्यते न स पापेन पद्मपत्रमिवांभसा ॥ १० ॥

योगयुक्त संन्यासवतोमुक्तिर्भवतीति नोपचारइति भावेन पुनः फलमाह ब्रह्मणीति । तत्पूजात्मकानि तत्कृतानि ममशुभार्थमिति ब्रह्मण्याधानम् । स्वातंत्र्याभावापेक्षयैव जीवस्याकर्तृत्वं । स्ववंदनं यथापित्रा कारितं शिशुकर्तृकं । एवं पूजाविष्ण्वधीना भवेज्जीवकृतेत्यपीतिवचनात् ॥ १० ॥

" योगयुक्त संन्याशाला मुक्ति प्राप्त होते " हें ह्मणणें केवळ औपचारिक नव्हे; ह्मणून त्याचें पुनः फळ सांगतात-जो मनुष्य, कर्में ब्रह्मपूजानिमित्तानें आपल्या कल्याणाकरितां करितो, व हीं मी स्वतः करीत नाहीं असें समजतो, तो ज्याप्रमाणें कमळाचें पान पाण्यावर तरंगत असून तें पाण्यानें लिप्त होत नाहीं, त्याप्रमाणें कर्मांच्या दोषानी लिप्त होत नाहीं. ॥ १० ॥

कायेन मनसा बुद्ध्या केवलैरिंद्रियैरपि ।
योगिनः कर्म कुर्वंति संगं त्यक्त्वात्मशुद्धये ॥ ११ ॥

एवंचास्त्याचारइत्याह । कायेनेति । कायादिभिरिंद्रियांतैः केवलैः कामाहंकाररहितैःस्नानध्यानादितत्वनिश्चयादिश्रवणकीर्तनादिकर्माणि संगं फलस्नेहं त्यक्त्वा आत्मनः चित्तस्य शुद्धये जीवस्यान्यथाकारपरित्यागेन स्वरूपाविर्भावाय च कुर्वंति ॥ ११ ॥

याप्रमाणें करण्याचा संप्रदाय आहे ह्मणून सांगतातः—कर्मयोगी, फळाची इच्छा सोडून, चित्तशुद्धीकरितां शरीरानें करावयाचीं स्नानदानादि कर्में, व मनानें करावयाचीं जपादि कर्में, आणि बुद्धीनें करावयाचीं तत्वनिश्चयादि कर्में, कर्मांचा अभिमान न धरितां इंद्रियांचे—योगानेंही कर्में करितात. ॥ ११ ॥

युक्तः कर्मफलं त्यक्त्वा शांतिमाप्नोति नैष्ठिकीम् ।
अयुक्तः कामकारेण फले सक्तो निबद्ध्यते ॥ १२ ॥

प्राक् संन्यासयोगौ मिलितावेव फलं साधयतोनान्यतरपरित्यागेनान्यतरइति नियमज्ञापनार्थं तयोःफलमुक्तं । इदानींतु तावेव मोक्षसाधनं नतु तदुभयत्यागेनान्यादिति नियमज्ञापनाय योगसंन्यासवतस्तदुभयाभाववतश्च मुक्तिसंसारविस्तारलक्षणं फलमाह । युक्तइति । युक्तो योगयुक्तः । नैष्ठिकीं स्वाभाविकीं । कामकारेण कामकामतः प्रवृत्त्या ॥ १२ ॥

संन्यास व कर्माचरण हीं दोन्हीं करणाऱ्यालाच मुक्ति प्राप्त होते, व त्यांपैकीं एकाचा त्याग केला तर, फळ प्राप्त होत नाहीं, या अभिप्रायानें त्यांचीं फळें सांगितलीं; आतां, दोहोंपैकीं एकाचेंही आचरण न करणारास संसारांत पडावें लागतें, ह्मणून सांगतातः—कर्मफळाची इच्छा सोडून, एकनिष्ठेनें ईश्वराचें चिंतन करणारा पुरुष, आपल्या योग्यतेप्रमाणें सालोक्यादि मुक्ति पावतो; व योगरहित (ईश्वरपराङ्मुख) आणि कर्मांचेठायीं आसक्त असलेला पुरुष, त्या कर्मांनीं बद्ध होऊन संसारांत पडतो. ॥ १२ ॥

सर्वकर्माणि मनसा संन्यस्यास्ते सुखं वशी ।
नवद्वारे पुरे देही नैव कुर्वन्न कारयन् ॥ १३ ॥

पुनः संन्यासशब्दार्थं स्पष्टयति । सर्वकर्माणीति । मनसासर्व-कर्माणि संन्यस्य स्वातंत्र्याभिमानं त्यक्त्वा वशी जितेंद्रियः अकुर्वन्न-कारयन्नेव चक्षुःश्रोत्रघ्राणयुग्ममुख पायूपस्थ लक्षण नवद्वारवति देहे सुखं यथाभवति तथास्ते ॥ १३ ॥

संन्यास शब्दाचा अर्थ स्पष्ट करून सांगतातः—मनापासून सर्व कर्मे करून, तीं मी स्वतंत्रपणानें करित नाहीं, असें जाणणारा, इंद्रियें स्वाधीन ठेवणारा, नऊ आहेत द्वारें ह्मणजे मार्ग ज्याला (डोळे २, नाकपुड्या २, कान २, तोंड १, गुद १, उपस्थ १, एकंदर नऊ द्वारें) अशा देहाचे ठिकाणीं, मी स्वतंत्र कर्ता नव्हे व करविताही नव्हे असें समजून, सुखानें असतो. ॥ १३ ॥

न कर्तृत्वं न कर्माणि लोकस्य सृजति प्रभुः ।
न कर्मफलसंयोगं स्वभावस्तु प्रवर्तते ॥ १४ ॥

ननु दर्शनादिकं कुर्वन्नेव किंचित्करोमीति मन्येतेत्ययुक्तं । मिथ्याज्ञानस्य विप्रलंभस्य वा प्रसंगादित्याशंकानिरासाय परमेश्वर-प्रेरितः कुर्वन् कारयन्नपि स्वातंत्र्येण न करोति न कारयतिचेत्युच्यत-इत्याह । न कर्तृत्वमिति । जडमपेक्ष्य प्रभुः समर्थोजीवः लोकस्य कर्तृत्वं न सृजति न लोकेन कर्म कारयति स्वयंच कर्माणि न सृजति न करोतीत्यर्थः । कर्मणि स्वातंत्र्यंनचेत्फलेनास्तीति किंवाच्यमित्याह नेति । सृजतीत्यनुषंगः । तर्हि तस्य कर्मयोगे प्रवृत्तिर्नस्यादित्यतआह। स्वभावस्त्विति । स्वः स्वतंत्रः परमात्मा । स्वातंत्र्यात्स्वइतिप्रोक्त इत्युक्तेः । तेनैव सदा स्वयंभवति भावयति चान्यानीतिस्वभावः । तथा स्वतंत्रं भावयति ध्यायतीति स्वभावः । स्वतंत्रः परमात्मा सएव-मद्गतः स्वयं करोतीति नाहं स्वातंत्र्येण किंचित्करोमि तत्प्रसादात्त-दायत्तकर्मणैवाहं विहितकृदिति भावयन्नेव स्वविहितकर्मयोगे प्रवर्तत-इतिभावः ॥ १४ ॥

स्वतः दृष्टीनें पहात असून, तें आपण पहात नाहीं असें कोणी ह्मणेल तर त्यास भ्रांति पडली आहे किंवा मिथ्याज्ञान झालें आहे, असें ह्मणावें

लागेल; त्या अर्थीं परमेश्वरच प्रेरक असून सर्व कर्ता करविता तोच आहे. मनुष्याला स्वतंत्रपणानें कांहींच करतां येत नाहीं व करविता येत नाहीं त्यामुळें जीवांनीं स्वतः पाहिलें तरी पहात नाहीं असें ह्मणवितो. या अभिप्रायानें सांगतात—ज्यापेक्षां (जडापेक्षां) समर्थ असलेला हा जीव, लोकांकडून स्वतंत्रपणानें कर्में करवीत नाहीं, किंवा आपणही स्वतंत्रपणानें करीत नाहीं, त्याप्रमाणेंच, त्या कर्मांचें फळही लोकांस स्वतंत्रपणानें देत नाहीं किंवा त्यालाही स्वतंत्रपणानें मिळत नाहीं. तर मग हें कोण करवितो? तर, स्वातंत्र्य असल्यामुळें ' स्व ' शब्दवाच्य जो परमात्मा, तो सर्व जीवांत राहून, कर्में करवितो किंवा करितो; कर्मांचें फळ देणाराही तोच. त्या (परमात्म्या) वांचून स्वतंत्रपणानें कोणालाच कांहीं करितां येत नाहीं. ॥ १५ ॥

नादत्ते कस्यचित्पापं न चैव सुकृतं विभुः ।
अज्ञानेनावृतं ज्ञानं तेन मुह्यंति जंतवः ॥ १५ ॥

एवं प्रवर्तमानस्य फलमाह । नादत्तइति । जडमपेक्ष्य विभुर्जीवो न कस्यापि कर्मणः फलं पापं पुण्यं वा आदत्ते । किमिति तर्हि स्वगतं स्वतंत्रं परमात्मानं प्राणिनो नपश्यंतीत्यत आह । अज्ञानेनेति । अथवा जीवानां स्वातंत्र्याभावेपि परमात्मदत्तस्य कर्तृत्वस्य सद्भावात्कथं कर्मणां ब्रह्मण्याधानमित्यत आह । न कर्तृत्वमिति । कर्माण्यदृष्टानि । क्रियायामदृष्टोत्पादने फलेचास्वातंत्र्यं लोकस्य न सृजति ईश्वरः । अतएव यथाराजा स्वपुत्रादिभ्यः स्वराज्यवित्तभोजिभ्योप्याधिपत्यादानाद्राज्यं न ददातीत्युच्यते तथा कर्मफलादिसंयोगिनोपिकर्तृत्वादिकं न सृजतीत्युच्यते । स्वयमेव भवति भावयतिचेति स्वभावोभगवान् । स्वभावत्वात्स्वयमेव कर्तृत्वादिषु प्रवर्तते । स्वातंत्र्यादेव विभुः ईश्वरः कर्मफलं पापादिकं नादत्त इत्यादिव्याख्येयं । तदुक्तं । स्वातंत्र्याद्भगवान्विष्णुः स्वभस्वइतिकीर्तितः । तत्स्वातंत्रं कदाप्येष नान्यस्य सृजति क्वचित । स्वातंत्र्यादेवपापादि संबंधः कुर्वतोपि न । अज्ञानावृतबुद्धित्वादीदृशं तं न जानतइति । स्वातंत्र्याधानमेव कर्माधानमित्याशयः ॥ १५ ॥

यांप्रमाणें जे जाणतात त्यांस काय फळ मिळतें तें सांगतात—जडापेक्षां समर्थ असलेला जीव, कोणत्याही कर्माचें फळ पापपुण्य स्वातंत्र्यानें आपण घेत नाहीं; ईश्वरच सर्वत्र राहून स्वतंत्रपणानें सर्व करितो असें जर आहे तर, त्याच्या हृदयांत रहाणारा परमात्मा त्याला कां दिसत नाहीं? याचें कारण एवढेंच कीं, या जीवाचें ज्ञान अज्ञानानें आच्छादिलेलें आहे ह्मणून, अज्ञानानें मोहित होऊन, तो परमात्म्याला पाहूं शकत नाहीं. अथवा जीवाचेठायीं ईश्वरानें दिलेलें दत्तस्वातंत्र्य असल्यामुळें, त्याच्या त्याच्या अदृष्टाप्रमाणें त्याजकडून कर्में करवितो, आणि त्यांकडून त्या कर्मांचीं फळेंही भोगवितो. परंतु, कोणतेंही कर्म स्वतंत्रपणानें करण्याची शक्ति त्याला देत नाहीं. ज्याप्रमाणें राजाचें वैभव, त्याच्या आज्ञेनें त्याच्या पुत्रास उपभोगितां येतें, परंतु, त्या राजपुत्राला स्वतंत्रपणानें राज्यकारभार, राजा करूं देत नाहीं, त्याप्रमाणें ईश्वर, जीवाला स्वातंत्र्य देत नाहीं, ईश्वर स्वतंत्र असल्यामुळें त्या (जीवा) चें पाप किंवा पुण्यही त्या (ईश्वरा) ला लागत नाहीं. ॥ १५ ॥

ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः ।
तेषामादित्यवज्ज्ञानं प्रकाशयति तत्परम् ॥ १६ ॥

ननु ज्ञानस्याज्ञानेनावृतत्वे सत्यज्ञानस्यनाशकांतराभावात् ज्ञानार्थयोर्योगसंन्यासयोर्वैयर्थ्यमित्याशंक्य स्वरूपज्ञानमविद्यावृतं वृत्तिज्ञानं त्वविद्यांशिथिलयति प्रकाशयति च परब्रह्मेत्याह । ज्ञानेनेति । आत्मनोभगवतो ज्ञाने आत्मनः परमेश्वरात् तत्प्रसादात् नाशितमिति वा संबंधः । अंतःकरणवाचिना आत्मशब्देन ज्ञानशब्दयोः संबंधे वृत्तिज्ञानमुक्तं भवति । तृतीयांतज्ञानशब्देन परोक्षज्ञानमुच्यते । प्रथमांतेन च साक्षात्कारः ॥ १६ ॥

ज्ञान हें अज्ञानानें झांकलेलें असतें असें सांगितलें; तर अज्ञानाचा नाश करण्याला ज्ञानाशिवाय दुसरें साधन नसल्यामुळें, ज्ञानार्थ जे संन्यासादि योग साधतात तेही व्यर्थच होतील; या शंकेचें समाधान सांगतात:—स्वरूपज्ञान हें अविद्येनें (अज्ञानानें) झांकलेलें असलें तरी, वृत्तिज्ञान त्या अविद्येला शिथिल (सैल) करून, ब्रह्मज्ञान उत्पन्न करितें. परमात्म्याच्या प्रसादानें

ज्यांनां ज्ञान प्राप्त होऊन त्या ज्ञानानें अज्ञान नाहींसें झालें आहे, त्यांचें तें सूर्यासमान अपरोक्षज्ञान परात्पर अनंत गुणयुक्त अशा परमेश्वरास दाखवितें. ।१६।

तद्बुद्धयस्तदात्मानस्तन्निष्ठास्तत्परायणाः ।
गच्छंत्यपुनरावृत्तिं ज्ञाननिर्धूतकल्मषाः ॥ १७ ॥

अपरोक्षज्ञानोत्पत्तौ ध्यानादिव्यवहितपरोक्षज्ञानंविनान्यदप्यव्यवहितं साधनमाह । तद्बुद्धयइति । न सकृद्भगवत्परोक्षज्ञानेन चरितार्थता किंतु पुनस्तत्रबुद्धिर्येषांते तद्बुद्धयः । स आत्मा आदानादिकर्ता स्वामी वा येषां ते तदात्मानः । तस्मिन्निष्ठा स्थितिः आपद्यपि तस्मादचलनं येषां ते तन्निष्ठाः । स एव परमायनं येषां ते तत्परायणाः । चक्षुराद्याश्रितावयमितिध्यायिनइत्यर्थः एतच्च देवताविषयं । स्वोत्पत्त्यंगंतु देवानां विष्णोश्चिंत्यं सदैव तु। तेषांतत्र प्रवेशोहि मुक्तिरित्युच्यते बुधैरितिवचनात् । यद्वा स एव परोयेषां ते तत्पराः ते अयनं येषां ते गुर्वादित्वेन तत्परायणाः । तेच अपरोक्षज्ञान निर्धूतपापा अपुनरावृत्तिलक्षणां मुक्तिं गच्छंति ॥ १७ ॥

ज्यांची ईश्वराचेठायींच निश्चयात्मक बुद्धि आहे, परमात्म्याचेठायींच ज्यांचें मन लागलें असून तोच आपला स्वामी असें समजणारे, आपत्कालीं सुद्धां भक्तीपासून न चळणारे, मुख्य काय तो परमात्माच आहे असें ज्ञानानें पहाणारे, ते अपरोक्षज्ञानाचे योगानें पापरहित होऊन, ज्याला पुनरावृत्ति—जन्ममरणाचे फेरे—नाहीं, अशा मोक्षास जातात. ॥ १७ ॥

विद्याविनयसंपन्ने ब्राह्मणे गवि हस्तिनि ।
शुनि चैव श्वपाके च पंडिताः समदर्शिनः ॥ १८ ॥

परमेश्वरस्वरूपाणां सर्वत्रसाम्यदर्शनं चापरोक्षज्ञानसाधनमित्याशयवानाह । विद्येति । पंडिताः परोक्षज्ञानिनः । पांडित्यमागमज्ञानमितिवचनात् । ब्राह्मणादिषु स्थितं ब्रह्म समंपश्यतीति समदर्शिनः १८

सर्व उच्च नीच देह धारण करणाऱ्या सर्व जीवांच्या अंतर्गत भगवद्रूपें सर्वही गुणादिकेंकरून समान आहेत, असें समजणें हेंही अपरोक्षज्ञानप्राप्तीचें एक साधन आहे, ह्मणून सांगतातः—विद्या आणि विनय (नम्रता) यांनीं

युक्त असा ब्राह्मण, किंवा गाय, हत्ती, कुत्रा व चांडाळ इत्यादिकांचे ठिकाणीं सर्वांतर्यामीं ईश्वर स्वरूपअंशानें आहे, त्यामध्यें परस्पर भेद किंवा भेदाभेद कांहीं नाहीं, असें ज्ञानी समजतात. ॥ १८ ॥

इहैव तैर्जितः सर्गो येषां साम्ये स्थितं मनः ।
निर्दोषं हि समं ब्रह्म तस्माद्ब्रह्मणि ते स्थिताः॥१९॥

तदेवस्तौति । इहैवेति । येषां मनः परमेश्वररूपाणां साम्ये स्थितं तैरपीहास्मिन्नेवजन्मनि सर्गो जन्मादिरूपः संसारः परोक्षज्ञानाद्विजितः । समदर्शिनइति दृश्यत्वेनोक्तं वस्तु कथं समं भवेदित्यपेक्षायामाह । निर्दोषमिति । उक्तंच । विषमेष्वपिजीवेषु समोविष्णुः सदैव तु । यत्तृणादिगतस्यापि गुणाः पूर्णाहरेः सदेतिहि । ते ज्ञानिनः संसारं जित्वा तस्माद्ब्रह्मणः तदनुग्रहात् ब्रह्मणि स्थितः निर्दुःखानंदात्मिकां स्वास्थितिं प्राप्ताः ॥ १९ ॥

असें जाणणाऱ्या ज्ञान्यास फळ काय मिळतें तें सांगतात:—निर्दोष असें ब्रह्म सर्व गुणादिकेंकरून सर्वत्र सम आहे, त्या सर्व रूपांत भेद मुळींच नाहीं, असें ज्याचें मन स्थिर झालें आहे त्यानें येथेंच (या लोकींच) जन्ममरणरूप संसार जिंकला असें समजावें; तो ज्ञानी परब्रह्म प्रसादानें ब्रह्मनिष्ठ होऊन, नित्यसुख जेंत आहे, अशा मुक्तीस जातो. ॥ १९ ॥

न प्रहृष्येत्प्रियं प्राप्य नोद्विजेत्प्राप्य चाप्रियम् ।
स्थिरबुद्धिरसंमूढो ब्रह्मविद्ब्रह्मणि स्थितः ॥२०॥

संन्यासयोगज्ञानानि मिलित्वा प्रपंचयत्यध्यायशेषेण । सर्वत्र पुनःपुनरुक्तार्थप्रपंचनमनुक्तानां विशेषणानां संग्रहार्थमिति बोद्धव्यं । तत्र संन्यासं प्रपंचयति । नप्रहृष्येदिति ॥ २० ॥

जो प्रिय (आवडती) वस्तु मिळाली असतां हर्षित होत नाहीं, व नावडती वस्तु मिळाली असतां दुःखित होत नाहीं. आपण परमात्म्याच्या अधीन आहे. अशी ज्याची बुद्धि स्थिर झाली आहे, मोह न पावणारा असा ब्रह्मवेत्ता. ॥ २० ॥

बाह्यस्पर्शेष्वसक्तात्मा विंदत्यात्मनि यत्सुखम् ।
स ब्रह्मयोगयुक्तात्मा सुखमक्षयमश्नुते ॥ २१ ॥

पुनर्योगस्याधिक्यं संन्यासात्स्पष्टयति । बाह्यस्पर्शेष्विति । कामरहितआत्मनि यत्सुखं विंदति । स एव ब्रह्मयोगयुक्तात्माचेत् तदेवाक्षयं सुखं विंदति । ब्रह्मविषयोयोगो ब्रह्मयोगः । यद्यपि कामाद्युपद्रवक्षयेऽपि ईषत्तात्कालिकमात्मसुखं व्यज्यते तथापि तस्य संसारनिवृत्तौ स्वरूपभूतस्याक्षयसुखस्याभिव्यक्तेः संन्यासाद्वरः कर्मयोगइत्युक्तंभवति। यद्वा योगरूपसंन्यासस्य निःश्रेयसकरत्वमनेनोपपाद्यते । यदा संसारेऽपि परमात्मस्मरणाद्यल्पयोगयुक्तः संन्यासी सुखं विंदति तदा ध्यानादिमहायोगयुक्तोमोक्षादिसुखंविंदतीति किमुवक्तव्यमित्यर्थः २१

जो मनुष्य बाह्य शब्दादि विषयांचेठायीं आसक्त नसून, आपल्याठिकाणीं जें सुख मानतो तोच ज्ञानयोगयुक्त ध्यानानें, ज्याचा कधींही नाश व्हावयाचा नाहीं, असें अखंड सुख पावतो. ॥ २१ ॥

ये हि संस्पर्शजा भोगा दुःखयोनय एव ते ।
अद्यंतवंतः कौन्तेय न तेषु रमते बुधः ॥ २२ ॥

संन्यासार्थं कामभोगं निंदति । येहीति । संस्पर्शजाः विषयसंबंध संभवाः । दुःखकारणानि उत्पत्ति नाशवंतः ॥ २२ ॥

संन्यासाकारितां ऐहिक विषयांची निंदा कारितातः—हे कुंतिपुत्रा अर्जुना, जीं खरोखर विषयांपासून उत्पन्न होणारीं सुखें, तीं दुःख उत्पन्न करणारीं व ज्यांस उत्पात्ति व नाश आहे अशींच असतात; ह्मणून तीं सुखें प्राप्त झालीं असतां ज्ञानी लोक आनंद मानीत नाहींत. ॥ २२ ॥

शक्नोतीहैव यः सोढुं प्राक्शरीरविमोक्षणात् ।
कामक्रोधोद्भवं वेगं स युक्तः स सुखी नरः ॥ २३ ॥

संन्यासार्थमेव कामभोगपरित्यागं प्रशंसति । शक्नोतीति । यः कामक्रोधोद्भवं वेगं मनसोऽनवस्थानं सोढुं शक्नोति स युक्तः स सुखी इहैव शरीरविमोक्षणात् प्रागिति यथा मनुष्यशरीरे सोढुं सुशंकं न तथान्यत्र । ब्रह्मलोकादिस्तु जितकामानामेव भवति । अतोऽत्रैव तत्सहनाय प्रयतितव्यमिति भावः ॥ २३ ॥

संन्यासप्राप्तीकरितां ऐहिक विषयांचा त्याग करावा, ह्मणून सांगतातः—

जो पुरुष इच्छा व राग यांपासून उत्पन्न झालेल्या वेगास मरण येण्याच्या पूर्वींच सहन करण्यास समर्थ होतो, तो पुरुष ज्ञाननिष्ठ होय. तोच सुखी समजावा. ॥ २३ ॥

योऽन्तःसुखोऽन्तरारामस्तथांतर्ज्योतिरेव यः ।
स योगी ब्रह्मनिर्वाणं ब्रह्मभूतोऽधिगच्छति ॥ २४ ॥

ज्ञानिलक्षणं प्रपंचयति । योंतःसुखइत्यादिभिः । आरामः परमात्मदर्शनादिनिमित्तंसुखं । सुखं कामाद्युपद्रवक्षये व्यक्तं । उक्तंच । दर्शनस्पर्शसंभाषाद्यत्सुखंजायतेनृणां । आरामः सतु विज्ञेयः सुखंकामक्षयोदितमिति । अंतःसुखः कामक्षयाभिव्यक्तात्मसुखः अंतरारामः परमात्मदर्शनादिहेतुकसुखवान् । अंतर्ज्योतिः अंतरभिव्यक्तपरमात्मरूपः । असंप्रज्ञातसमाधीनां बाह्यदर्शनव्यावृत्त्यर्थस्तदन्यज्ञानिनां बाह्यदर्शनेऽपि चित्तविक्षेपाभावाद्ब्रह्मदर्शनापेक्षया बाह्यदर्शनप्राचुर्यव्यावृत्त्यर्थ एव शब्दः । सच सामर्थ्याज्ज्योतिषैव संबध्यते । केषांचिद्बहिरपि ब्रह्मदर्शनात् । पुनर्यइति सर्वत्रानुगमार्थः । अंतःसुखत्वादेः कारणं ब्रह्मणिभूतइति । सोप्राकृतविग्रहं भगवंतं प्राप्नोतीत्यर्थः ॥ २४ ॥

ज्ञान्याचें लक्षण विस्तारानें सांगतातः—जो मनुष्य विषयसुख तुच्छ मानून, सुखी असलेला व हृदयांत परमात्म्याच्या दर्शनसुखांत निमग्न असलेला व असंप्रज्ञातसमाधि लावणारा तोच ब्रह्मनिष्ठ; तो चिदानंदस्वरूपी परमात्म्यातें पावतो; त्यास बाह्य विषयांचें दर्शन झालें तरी, त्याची वृत्ति चंचळ होत नाहीं. ॥ २४ ॥

लभंते ब्रह्मनिर्वाणमृषयः क्षीणकल्मषाः ।
छिन्नद्वैधा यतात्मानः सर्वभूतहिते रताः ॥ २५ ॥

पापक्षयाच्चैतद्भवतीत्याह । लभंत इति । क्षीणकल्मषाभूत्वा छिन्नद्वैधायतात्मानः द्वैधीभावोद्वैधं संशयोविपर्ययोवा छिन्नं द्वैधं येषांते छिन्नद्वैधास्तएवायतात्मानः । आयतात्मत्वं दीर्घमनस्कत्वं तत्छिन्नद्वैधत्वेहेतुः । तदुक्तम् । विपर्ययः संशयोवा यद्द्वैधंत्वत्कृतात्मनां ।

ज्ञानासिना तु तच्छित्वा मुक्तसंगः परंव्रजेदिति । छिन्नद्वैधाः यतात्मानइति पदद्वयं वा ॥ २५ ॥

वर सांगितलेलें ज्ञान पापाचा क्षय झाल्यावांचून होत नाहीं, ह्मणून सांगतातः—ऋषिजन पाप आणि संशय यांनीं रहित होऊन सर्व प्राण्यांच्या हिताविषयीं तत्पर असून, परमात्मादि तत्वें त्या त्या तारतम्याप्रमाणें जाणणारे व ज्यांच्या मनाचा निग्रह झाला आहे असे ज्याला नाश नाहीं अशा ब्रह्मलोकाप्रत जातात. ॥ २५ ॥

कामक्रोधवियुक्तानां यतीनां यतचेतसाम् ।
अभितो ब्रह्मनिर्वाणं वर्तते विदितात्मनाम् ॥ २६ ॥

सुलभंच तेषांब्रह्मेत्याह । कामक्रोधेति । अभितः सर्वतः ॥२६॥

आत्मस्वरूपाची ज्यांना चांगली ओळख झालेली आहे, मनोनिग्रही, इच्छा व क्रोध यांचा ज्यांना वियोगच झालेला आहे, असे जे योगी (यति, ब्रह्मनिष्ठ,) त्यांना, मेल्यावर व जिवंतपणींही जीवन्मुक्ति प्राप्त होते. त्यांना सर्व देशकालाचेठायीं भगवान् प्रत्यक्ष असतो. ॥ २६ ॥

स्पर्शान्कृत्वा बहिर्बाह्यांश्चक्षुश्चैवांतरे भ्रुवोः ।
प्राणापानौ समौ कृत्वा नासाभ्यंतरचारिणौ ॥२७॥

ब्रह्मयोगादिपदेन ध्यानं प्रकृतं तत्कारणमाह । स्पर्शानिति । स्पृश्यंत इति स्पर्शाविषयाः । बाह्यान् स्पर्शान् बहिः कृत्वा श्रोत्रादीनि योगेन नियम्येत्यर्थः चक्षुःभ्रुवोरंतरे कृत्वा भ्रुवोर्मध्यमवलोकयन्नित्यर्थः । उपलक्षणमेतत् । संप्रेक्ष्य नासिकाग्रं स्वमिति वक्ष्यमाणत्वात् । प्राणापानौ समौसमानौ कृत्वा कुंभके स्थित्वेत्यर्थः ॥ २७ ॥

आतां योग कसा करावा तें सांगतातः—शब्दस्पर्शादि बाह्यविषयांस मनांत न घेतां बाहेरच ठेऊन, दोन्ही भिंवयांच्या मध्यभागीं दृष्टि ठेऊन, (कारण, डोळे पूर्ण झांकले तर झोंप येईल व ते पूर्ण उघडे ठेविले तर, बाह्य विषयांवर दृष्टि जाईल ह्मणून अर्धे डोळे मिटून.) नासिकामध्यें संचार करणारे प्राण आणि अपान वायु यांस सम करून, ह्मणजे खालीं वर जाऊं न देतां—कुंभकांत ठेवून मंद श्वासानें संचरण करावें. ॥ २७ ॥

यतेंद्रियमनोबुद्धिर्मुनिर्मोक्षपरायणः ।
विगतेच्छाभयक्रोधो यः सदा मुक्त एव सः ॥२८॥

मुक्तएव स इतिश्रुतिः मुक्तसदृशः स्याद्वामुक्तः । उक्तंच । अमुक्तोमुक्तसादृश्यान्मुक्त एव हि तत्त्वदृक् । किमु मुक्तिगतस्तस्माज्ज्ञानमेवाधिकंनरे इति ॥ २८ ॥

असा योगी इंद्रियें, मन व बुद्धि स्वाधीन ठेवणारा व मोक्षच परमसुख ह्मणून जाणणारा सर्वदा तत्पर असतो; याप्रमाणें इच्छादिकांचा ज्यानें त्याग केला आहे, तो जीवंत असला तरी मुक्तासारखा समजावा. ॥ २८ ॥

भोक्तारं यज्ञतपसां सर्वलोकमहेश्वरम् ।
सुहृदं सर्वभूतानां ज्ञात्वा मां शांतिमृच्छति ॥२९॥

इति श्रीमगवद्गीता सूपनिषत्सु ब्रम्हाविद्यायां योगशास्त्रे श्रीकृष्णार्जुन संवादे कर्मसंन्यास योगोनाम पञ्चमोऽध्यायः ॥५॥

ध्येयमाह । भोक्तारमिति ज्ञात्वेत्यस्य ध्यात्वेत्यर्थः । शांतिसाधनत्वमपि भोक्तृत्वादिवत् ध्येयविशेषणमेव । एवं सर्वत्राप्रसिद्धोपादानं द्रष्टव्यम् ॥ २९ ॥

इति श्रीमद्भगवद्गीताविवृतौ विद्याधिराजभट्टोपाध्यायविरचितायाम् श्रीमध्वमतानुवर्तिनी व्याख्योपेतायाम् पंचमोऽध्यायः ॥५॥

आतां ध्यान कसें करावें तें सांगतात:-यज्ञ व तपश्चर्या यांचा उपभोक्ता, सर्व लोकांचा नियंता ईश्वर, सर्व भूतांचा अनिमित्त (निरपेक्ष) मित्र, असा आहे असें जाणणारा परमसुखाचें स्थान, जी मुक्ति तिची प्राप्ति करून घेतो. यावरून, सर्व जीवांपेक्षां ईश्वर श्रेष्ठ आहे असें जाणल्यानेंच तो परमात्मा कल्याण करितो असें उघड दिसतें. ॥ २९ ॥

येथें श्रीमदिन्दिराकान्ततीर्थ श्रीपादविरचित प्राकृत टीकेचा पांचवा अध्याय समाप्त झाला.

अथ षष्ठोऽध्यायः

श्री भगवानुउवाच ।

अनाश्रितः कर्मफलं कार्यं कर्म करोति यः ।
स संन्यासी च योगी च न निरग्निर्न चाक्रियः ॥१॥

श्रीगुरुभ्योनमः । योगेत्विमां शृण्विति प्रतिज्ञातयोगश्च कर्मयोगोध्यानयोगश्चेति द्विविधोभवति तत्र संक्षेपविस्ताराभ्यां कर्मयोगोनिरूपितः । ध्यानयोगप्रकारश्च संक्षेपेण पंचमांतेनिरूपितोविस्तरेणास्मिन्नध्याये उच्यते । प्रकृतं ध्यानमग्न्याधानादिपरित्यागेन निःसंगतया वर्तमानस्य भवतीतिकेचित् तन्निरासार्थमीश्वराराधनस्वकर्मानुष्ठान लक्षणेन योगेन सह ध्यानाधिकारिविशेषणं कामादिवर्जनलक्षणं संन्यासमाह । अनाश्रितइति । यः फलकामनारहितः कर्तव्यं स्ववर्णाश्रमोचित्तं कर्म करोति स संन्यासी च योगी च । निरग्निः संन्यासी योगी च न भवति । आक्रियश्च तथा सब्रह्मनिष्ठस्तुयतिर्महात्माशारीरमग्निंचमुखेजुहोतीत्यादेर्यत्याश्रमस्वीकारकाले पूर्वाश्रमस्वीकृताग्नेरात्मनि समारोपणाद्दैवमेवापरेयज्ञमित्याग्निक्रिययोरभिधानाच्च न यतीनामग्निक्रिययोरभावः । अनग्नित्वादिप्रवादश्च बाह्याग्न्याद्यभावनिबंधन इतिबोद्धव्यं ॥ १ ॥

(योगेत्विमांशृणु) असें ह्मणून श्रीकृष्णानीं, एक कर्मयोग व दुसरा ध्यानयोग, असे दोन प्रकारचे योग सांगितले; व प्रथमतः संक्षेपानें आणि नंतर विस्तारपूर्वक कर्मयोग सांगितला; पांचव्या अध्यायाचे शेवटीं ध्यानयोगाचें संक्षेपानें निरूपण केलें आहे. त्याचेंच या सहाव्या अध्यायांत विस्तारानें निरूपण करितात. हा ध्यानयोग, अग्निहोत्रादि कर्मांचा त्याग करून निःसंग असलेल्यास साध्य होतो असें कित्येक लोक ह्मणतात, त्याचें निराकरण करण्याकरितां ईश्वराचें आराधन व स्वकर्माचें अनुष्ठान; हीं, ध्यानयोगास योग्य अशा पुरुषानें (फलांच्या) इच्छादिकांचा त्याग करून करणें हेंच संन्याशाचें लक्षण आहे ह्मणून सांगतातः—जो अधिकारी फलाची इच्छा न

धरितां, करण्यास योग्य अशीं, स्ववर्णाश्रमोचित कर्मे करितो, तोच योगी किंवा संन्यासी होय; केवळ निरग्निक किंवा क्रियारहित अशाला संन्यासी ह्मणत नाहींत; कारण, जो ब्रह्मनिष्ठ तोच संन्यासी, असें श्रुतिआदिकरून सांगतात. बाह्याग्नि नसल्यानें 'अनग्निक' अशी लौकिकगाथा आहे. ॥ १ ॥

यं संन्यासमिति प्राहुर्योगं तं विद्धि पांडव ।
न ह्यसंन्यस्तसंकल्पो योगी भवति कश्चन ॥ २ ॥

संन्यासीच योगीचेत्युक्त्या प्राप्तांसंन्यासयोगयोः पृथक् शंकां निवारयति । यमिति । इतिशब्दः पूर्वाध्यायोक्तप्रकारपरामर्शार्थः । योगविशेषएव संन्यासइत्यर्थः । तदेवोपपादयति । नहीति । कामसंकल्पाद्यपरित्यागे कथमुपायवान्स्यादित्याशयः ॥ २ ॥

संन्यासी आणि योगी हे निरनिराळे आहेत असें कोणास वाटेल, ह्मणून सांगतातः-हे पंडुपुत्रा अर्जुना, ज्याला संन्यास ह्मणून ह्मणतात, तोच कर्मयोग असें तूं समज, कारण कर्मफलाच्या इच्छेचा व संकल्पाचा त्याग न करणारा, कोणीही योगी होऊं शकत नाहीं. ॥ २ ॥

आरुरुक्षोर्मुनेर्योगं कर्म कारणमुच्यते ।
योगारूढस्य तस्यैव शमः कारणमुच्यते ॥ ३ ॥

योगातिशयेन कियंतं कालं कर्म कर्तव्यमित्यत आह । आरुरुक्षोरिति । योगमारुरुक्षोः उपायसंपूर्तिकामस्य कर्म कारणं सन्निधानाद्योगारोहस्येति गम्यते । दृष्टार्थत्वादवघातादिवत्फलपर्यंतमनुष्ठेयमित्यर्थः योगारूढस्य कर्तव्यमस्तिवा नवेत्यपेक्षायामाह । योगारूढस्येति। संपूर्णोपायस्य परमसुखस्येतिशेषः । कारणं शमः भगवन्निष्ठबुद्धित्वं पुनरपि जपादिकं कर्तव्यमित्यर्थः । यद्यपि ज्ञानिसुखस्यासंप्रज्ञातसमाधिःकर्माद्यपेक्षयाप्रधानं कारणं तथापि यदा भोक्तव्योपरमः तदैव सम्यगसंप्रज्ञातसमाधिर्जायते अन्यदा तु भगवच्चरितादौ स्थितिः । तच्चोक्तं । ये त्वां पश्यंति भगवंस्तएव सुखिनःपरं । तेषामेव च सम्यक् च समाधिर्जायते नृणां । भोक्तव्यकर्मण्यक्षीणे जपेन कथयापिवा । बर्तयंतिमहात्मानस्तन्निष्ठास्तत्परायणाइति । अथवा कर्मध्यान-

योगयोर्मध्ये कीदृशोयोगोध्यानार्थिनावश्यमपेक्षितइत्यत आह। आरुरुक्षोरिति। राजादिकरवदावश्यकतया प्रमितं प्राण्युपकारलक्षणं कर्मयोगफलज्ञानकामस्य ज्ञानकारणमुच्यते। संपूर्णोपायस्य ज्ञानिनः शमोभगवन्निष्ठबुद्धित्वं मुक्तिगतानंदातिशयकारणमुच्यते। तदुक्तम्। नानाजनस्यशुश्रूषा कर्माख्या करवन्मितेः। योगार्थिनातु सा कार्या योगस्थेन हरौ स्थितिम्। तेनापि स्वोत्तमानांतुकार्यान्यैरखिलेष्वपि। भक्तितः करणीयेति विशेषो सिद्धयसिध्ययोः। प्राप्तोपायस्तु सिद्धस्यात्प्रेप्सुः साधकउच्यते। तस्यप्राण्युपकारेण संतुष्टोभवतीश्वरः। सिद्धोपायेन विष्णोस्तु ध्यान व्याख्यार्चनादिकं। कार्यं नान्यत्तस्य तेन तुष्टोभवति केशवइति। अत्र कर्मपदेन नानाजनशुश्रूषैवोच्यते। नतु संध्यावंदनादि शमपदेन नानाजनशुश्रुषोपशमएवोच्यते। भगवद्ध्यानादिकंच न संध्यावंदनादि कर्मोपशमः। अतो ज्ञानार्थिनः कर्मापेक्षितं ज्ञानिनः कर्मापेक्षितंइत्युक्त्या न निरग्निर्नचाक्रियइतिविरोधो नेति भावः॥ ३॥

योगातिशयानें कोठपर्यंत कर्म करावें? तर, कर्म करणें हा उपाय संपूर्तिकाम अशास सुलभ सांगितला आहे, ह्मणून कर्म हें दृष्टार्थ असल्यानें ज्याप्रमाणें कोंडा (तुष) नाहींसा होईपर्यंत धान्य सडतात, त्याप्रमाणें योगरूप फलोत्पत्ति होईपर्यंत कर्म करावें, योगारूढ (ज्ञाननिष्ठ) अपरोक्षज्ञान्यास मुक्तिगत परमसुख प्राप्त होण्यास, भगवन्निष्ठ असणें हें कारण आहे; आतां पुनः किमर्थ भगवंताचें ध्यानआदिकरून करावें, या ह्मणण्याचें तात्पर्य असें कीं, जरी ज्ञान्याला सुख होण्यास असंप्रज्ञातसमाधि मुख्य कारण आहे तरी, ज्यासमयीं असंप्रज्ञातसमाधिस्थ होण्यास प्रारब्धकर्म प्रतिबंधक आहे त्या कालीं अपरोक्षज्ञानी परमात्म्याची पूजा कथा श्रवण यांतच काल हरण करतात. अथवा, कर्मयोग व ध्यानयोग यांमध्यें ध्यानयोगाची इच्छा करणारानें कोणता योग अवश्य करावा, याविषयीं श्रीकृष्ण सांगतात:—जसें, राजाला प्रजाजन, त्या त्या काळीं नियमित कर देतात; तसें भगवंतानें नियम ठरविल्याप्रमाणें प्राण्यावर उपकार करणें हें ज्ञानोत्पत्तीस कारण सांगितलें आहे. ज्ञान्यास भगवन्निष्ठता ही, मुक्तिगत आनंदाची अभिवृद्धि करणारी होय; येथें कर्मपदानें

भगवंताला संतोष होईल व लोकांवर उपकार होतील अशीं कर्मे, किंवा भगवंताचें ध्यानादिक करावें हें सांगितलें आहे. यावरून ज्ञान्यास कर्म करण्याची जरूर आहे किंवा क्वचित् उपरमही आहे. या योगानें (न निरग्निर्नचा क्रियः) यांतील विरोध नाहींसा केला. ॥ ३ ॥

यदा हि नेंद्रियार्थेषु न कर्मस्वनुषज्जते ।
सर्वसंकल्पसंन्यासी योगारूढस्तदोच्यते ॥ ४ ॥

योगारूढस्यलक्षणमाह । यदेति । यदाविषयेषु कर्मसु च प्रयत्नंविनाप्यननुषक्तः । कथंनानुषज्जते सर्वसंकल्पसंन्यासी संकल्पादिकं सर्वं भगवदधीनमितिज्ञानवान् तदा योगारूढउच्यते ॥ ४ ॥

योगारूढाचें लक्षण सांगतात:-व जेव्हां योगी हा (कर्माचे) संकल्पादिक हे भगवंताचे स्वाधीन आहेत असें जाणून, इंद्रियविषयांच्याठायीं किंवा कर्माच्याठायीं आसक्ति धरित नाहीं, तेव्हां त्याला योगारूढ असें ह्मणतात. ४

उद्धरेदात्मनात्मानं नात्मानमवसादयेत् ।
आत्मैव ह्यात्मनो बंधुरात्मैव रिपुरात्मनः ॥ ५ ॥

सच योगारोहः प्रयत्नेन कर्तव्यइत्याह । उद्धरेदिति । आत्मना मनसा । आत्मानं जीवं आत्मा मनएव आत्मनोजीवस्य बंधुः सएवजीवस्यरिपुः ॥ ५ ॥

योगारोह प्रयत्नानें करावा ह्मणून सांगतात:—मनेंकरून या जीवाचा उद्धार करावा; त्यास अधोगतीस जाण्यास योग्य असा कदापि करूं नये. या जीवास शत्रु किंवा मित्र मन हेंच आहे. ॥ ५ ॥

बंधुरात्मात्मनस्तस्य येनात्मैवात्मना जितः ।
अनात्मनस्तु शत्रुत्वे वर्तेतात्मैव शत्रुवत् ॥ ६ ॥

कीदृशं मनः । कीदृशस्य जीवस्य बंधुः रिपुश्चेत्यत आह । बंधु-
येनात्मना जीवेन कर्त्रा येन जीवेन बुद्ध्या करणेन वा ।
: । मनोजितं । तस्यात्मनोजीवस्यात्मामनोबंधुः । यथा-

सन्नपि भृत्योभृत्यकार्यमकुर्वन्नभृत्यः । तथासन्नपि आत्मामनोयस्यानुपकारीत्यनात्मा । तस्यासन्मनस्कस्य पुरुषस्यात्मा मनएव शत्रुवच्छत्रुत्वेऽपकार करणे वर्तते । मनएव मनुष्याणां कारणंबंधमोक्षयोः । बंधाय विषयासक्तं मुक्त्यै निर्विषयं स्मृतमितिश्रुतिः । अथवा योगारोहस्य भगवत्प्रसादो मुख्यसाधनमित्याह । उद्धरेदित्यादिना । पूर्वं येनात्मशब्देनमनोभिहितं तेनेदानीं भगवानुच्यते । उक्तंच । उद्धरेत्तैव संसाराज्जीवात्मानं परात्मना । विष्णुर्बंधुः सतां नित्यं परात्माह्यसतामरिः । तत्प्रसादजयाभक्त्या जितोयस्यवशेत्विति । वर्तते तस्य मित्रं सः तदन्यस्य च शत्रुवदिति ॥ ६ ॥

कारण ज्या जीवानें बुद्धीच्या योगानें मनोजय केला आहे, असें तें मन, त्या जीवाचा मित्र होय; चाकर हा आपल्या धन्याचें काम करीत नसेल तर तो चाकर कशाचा? तसेंच, जो आत्मा (मन) आपल्या जीवाच्या उद्धारास उपयोगीं पडत नाहीं, तो अनात्मा होय. ज्यानें आपलें मन जिंकिलें नाहीं, त्याला तें (मन) च शत्रूप्रमाणें अपकार करितें. पुरुषाला विषयासक्त करून, बंधनाला कारण हें मनच होय; अथवा, तें (मन) च त्याची विषयवासना नाहींशी करून, मुक्ति मिळण्याला कारण होतें. अथवा, योगारोहणाला भगवंताचा प्रसादच कारण आहे, अशाविषयीं सांगतातः—वरील अर्थांत जेथें "आत्मा" शब्दानें मन असा अर्थ घेतला आहे, तेथें परमात्म्याच्या प्रसादानें हा जीव मुक्त होतो व अन्यथा (भगवत्प्रसाद न झाल्यास) बद्ध होतो, हें उघड दिसतें आहे. ॥ ६ ॥

जितात्मनः प्रशांतस्य परमात्मा समाहितः ।
शीतोष्णसुखदुःखेषु तथा मानापमानयोः ॥ ७ ॥

जितात्मनः फलमाह । जितात्मनइति । जितात्मत्वादेव प्रशांतस्य प्रायोविषयानुन्मुखमनसः परमात्मा सम्यक् हृद्याहितः सन्निहितोभवति । परमात्मापरोक्षज्ञानं भवतीत्यर्थः । अपरोक्षज्ञानिनोलक्षणं स्पष्टयति । शीतोष्णेत्यादिना । शीतोष्णादिषु कूटस्थः कूटमाकाशः कूटःखंविदलंव्योमसंधिराकाशउच्यतइत्यभिधानात् । तद्वत् स्थितो निर्विकार इत्यर्थः ॥ ७ ॥

जितेंद्रिय पुरुषास काय फळ मिळतें तें सांगतातः—ज्यानें मनोजय केला आहे असा, इंद्रियांच्या विषयोपभोगाविषयीं पराङ्मुख होतो त्यायोगानें त्याच्या हृदयांत परमात्मा श्रीहरी वास करितो, तोच अपरोक्षज्ञानी होय; ह्मणून सांगतात- जो शीतोष्ण, सुखदुःख, मानापमान, हे सहन करितो, तो जितात्मा आहे असें जाणावें. याविषयीं पुढील श्लोकांत सांगतात. ॥ ७ ॥

ज्ञानविज्ञानतृप्तात्मा कूटस्थो विजितेंद्रियः ।
युक्त इत्युच्यते योगी समलोष्टाश्मकांचनः ॥ ८ ॥

तत्र हेतुः । ज्ञानविज्ञानतृप्तात्मा विजितेंद्रियः । ज्ञानं सामान्यज्ञानं । विज्ञानं विशेषज्ञानं । सर्वत्र विष्णोरुत्कर्षज्ञानं ज्ञानमितीर्यते । तद्विशेषपरिज्ञानं विज्ञ नमिति गीयतइत्युक्तेः । ताभ्यां संतुष्टं मनोयस्येति तथायोगी योगं कुर्वन् । युक्तो योगसंपूर्णः । एवंभूतो योगानुष्ठिता योगसंपूर्णउच्यतइत्यर्थः ॥ ८ ॥

ज्ञान ह्मणजे विष्णु श्रेष्ठ आहे असें सामान्यतः जाणणें, व विज्ञान ह्मणजे विशेष महात्म्यातिशयानें विष्णु हा सर्वोत्तम आहे असें जाणणें; या दोन्ही ज्ञानाच्या योगानें ज्याचें चित्त संतुष्ट आहे, किंवा जो आकाशासारखा विषयांपासून अलिप्त आहे, त्याला योगसंपूर्ण असें ह्मणतात. ज्याला मातीचें ढेंकूळ, दगड, आणि सोनें, हीं बुद्धीनें सारखींच दिसतात, त्यालाच योगसंपूर्ण ह्मणावें. ॥ ८ ॥

सुहृन्मित्रार्युदासीनमध्यस्थद्वेष्यबंधुषु ।
साधुष्वपि च पापेषु समबुद्धिर्विशिष्यते ॥ ९ ॥

सएवसुहृदादिषु समबुद्धिः सर्वस्माद्विशिष्यते । प्रत्युपकारानपेक्षयोपकारकृत्सुहृत् । क्लेशस्थानं ज्ञापयित्वा यो रक्षां करोति स मित्रं । अरिः वधादिकर्ता । कर्तव्ये उपकारेऽपकारे च यउदास्ते स उदासीनः । कर्तव्यमुभयमपि यःकरोति स मध्यस्थः अप्रियकृत्द्वेष्यः । उक्तंच । अनिमित्तस्नेहवांस्तु सुहृत् ज्ञात्वोपकारकृत् । मित्रंवधादिकृदरिर्द्वेष्यस्त्वप्रियमात्रकृत् । उदासीनः स्नेहवतोप्यस्नेही तत्कृतानुकृत् । मध्यस्थ

इतिविज्ञेयः सुहृदेषु विशिष्यतइति। बंधुर्देहसंबंधी। साधुःसाधुधर्मवान्। पापःपापवान्। स्वभावतस्त्रिधा जीवाउत्तमाधममध्यमाः। उत्तमास्तत्र-देवाद्यामर्त्याद्याश्चैव मध्यमाः। अधमा असुराद्याश्च नैषामस्त्यन्यथाभवः। शरीरमात्रान्यथात्वे स्वजातिं पुनरेष्यतीति। सर्वंचेश्वरतः स्तेषां न किंचित्स्वतएवतु। समाएव ह्यतःसर्वेवैषम्यं भ्रांतिसंभवमित्याद्युक्त-प्रकारेण सुहृदादिषु जीवचैतन्यस्योत्तममध्यमाधमरूपस्योत्तमादिरूपत्व-मेव स्वाभाविकं वैषम्यं भ्रांतिजमितिज्ञानं। तथासुहृदादिषु स्थितस्य भगवतः सुहृत्वादेस्तन्निमित्तकत्वस्य च साम्येन ज्ञानं समबुद्धित्वं। यस्य यत्र यथावृत्तिर्विहितावर्तनं तथा। ज्ञानं चापिसमत्वं तद्विषमत्वमतो-न्यथा। यथा सुहृत्सु कर्तव्यं पितृशत्रुसुतेषु च। तथा करोति पूजादि समबुद्धिः सउच्यतइत्याद्युक्तप्रकारेण वा समबुद्धित्वं नतु सुहृदादीनां पूजासाम्यं। समानां विषमा पूजा विषमानां समा तथा। क्रियते येन देवोपि स्वपदाद्भ्रश्यते हिसइतिदोषस्मरणात्॥ ९॥

मागें सांगितलेला योगी हा समबुद्धि असला तर, तो सर्वांपेक्षां श्रेष्ठ ह्मणवून घेतो; तो प्रकार असा आहे कीं, प्रत्युपकाराची (आपण केलेल्या उपकारांची दुसऱ्यानें फेड करावी, ही) इच्छा नसून, जो उपकार करितो, त्यास सुहृद् ह्मणतात; अमुक एक गोष्ट केल्यानें दुःख प्राप्त होईल ह्मणून सांगून जो त्यापासून रक्षण करितो, त्यास मित्र असें ह्मणतात; आपला नाश करणारा शत्रू होय; करण्यास योग्य असे उपकार किंवा अपकार जो करीत नाहीं, तो उदासीन होय. कर्तव्यकर्म ह्मणून जो उपकार किंवा अपकार करितो तो मध्यस्थ जाणावा! आपणास जो पीडा देतो (आपलें अहित करितो) तो द्वेषी जाणावा! देहसंबंधानें जो प्रिय असतो तो बंधु जाणावा; आपल्यास योग्य असें कर्म करणारा तो साधु जाणावा; अनुचित (अयोग्य) कर्म करणारा तो पापी जाणावा; स्वभावतः जीव हे उत्तम, मध्यम व अधम या भेदानें तीन प्रकारचे आहेत; उत्तम देवादिक जाणावे; मध्यम मनुष्यादिक जाणावे; आणि अधम असुरादिक जाणावे. यांचें स्वरूप कदापिही पालटत नाहीं. एखाद्या शापादिकाचे योगानें शरीर मात्र पालटतें, तरी पुनरपि त्यांचें शरीर त्यांस प्राप्त होतें. हे सर्व स्वभाव ईश्वरापासूनच प्राप्त

झालेले आहेत, त्याशिवाय त्यांना कधींही प्राप्त होत नाहींत. ह्मणून ते जीव, ज्यांच्या त्यांच्या स्वभावाप्रमाणेंच असतात. असें जाणणारा समबुद्धि होय. विषमत्व हें भ्रांतीपासून उत्पन्न होतें; किंवा, त्या त्या जीवांत रहाणारा परमात्मा त्याकडून, सुहृत्वादि संबंधानें सुखदुःखादिक देतो; असें जाणणें हें, समत्व होय; अथवा सुहृदादिवर्गांत ज्याचा जसा सत्कार वगैरे केला पाहिजे, तसा करणारा तोच समबुद्धि होय; त्यावांचून सर्वांस दानमानादिकांविषयीं समान मानणाराला समबुद्धि ह्मणत नाहींत. कारण, योग्यतेस समान आहेत अशा लोकांनां विषम (त्यांच्या योग्यतेहून कमी) पूजा करणें किंवा विषम योग्यतेच्या लोकांनां समपूजा (सर्वांस सारखी) करणें हें केवळ अनुचित असल्यामुळें, देवसुद्धां, अशा (विरुद्ध) आचरणानें आपल्या पदापासून भ्रष्ट होतात; ह्मणून ज्याच्या त्याच्या योग्यतेला शोभेल असें कर्म करणें योग्य होय, असें जाणणें हेंच समबुद्धित्व होय. ॥ ९ ॥

योगी युंजीत सततमात्मानं रहसि स्थितः ।
एकाकी यतचित्तात्मा निराशीरपरिग्रहः ॥ १० ॥

समाधियोगप्रकारमाह । योगीयुंजीतेत्यादिना । आत्मानं मनो- युंजीत समाधियोगयुक्तं कुर्यात् । सततं निरंतरं रहसि एकांते स्थितः सन् । एकाकी संगशून्यः । अनेन बाह्ययोगांतरायान्निवारयति । नियमरूपेण तप आदिना शुद्धौ मनोदेहौ यस्य स यतचित्तात्मा । निराशीः दृष्टश्रुतविषयवितृष्णः अपरिग्रहइत्यहिंसादि यमांतराणामप्युपलक्षणम् ॥ १० ॥

आतां समाधियोगाचा प्रकार सांगतातः—एकांतस्थळीं राहून, भवबंधमोचक उपायांनींयुक्त असा योगी, निःसंग (सर्वसंग परित्यागी) होऊन अंतःकरण (मन) स्वाधीन ठेवून, विषयांचे आशेपासून रहित, (विषयांची इच्छा न करणारा) आणि अहिंसक (हिंसा न करणारा) अशा योग्यानें निरंतर आपलें मन समाधियोगयुक्त करावें. त्याचा प्रकार पुढील श्लोकांत सांगतात. ॥ १० ॥

शुचौ देशे प्रतिष्ठाप्य स्थिरमासनमात्मनः ।
नात्युच्छ्रितं नातिनीचं चैलाजिनकुशोत्तरम् ॥ ११ ॥

शुचौदेशइति । मनःप्रसादहेतुभूतदेशोपलक्षणं । तमेव देशं सेवेत तं कालं तामवस्थितिं । तानेव भोगान्सेवेत मनोयत्र प्रसीदति । न हि देशादिभिः कश्चिद्विशेषः समुदीरितः । मनः प्रसादनार्थं हि देशकालादि चिंतनमितिवचनात् । आत्मनः आसनं प्रतिष्ठाप्य कीदृशं स्थिरं अचलं । नातीवोन्नतं नचातिनीचं । चैलं वस्त्रं अजिनं व्याघ्रादिचर्म । कुशादर्भाउत्तरायस्मिंतथोत्तरं । समग्रादासनप्रदेशात् साक्षादुत्तरत्वायोगात् बुध्याविभक्तस्योत्तरोत्तरनिर्दिष्टस्य बुद्धिसंनिहितत्वात्साक्षादुत्तरत्वं पूर्वनिर्दिष्टस्य व्यवहितत्वात्परंपरयोत्तरत्वं द्रष्टव्यं । ११

मनाची प्रसन्नता होण्यास योग्य अशा पवित्र स्थळीं, पूर्वेस अथवा उत्तरेस अग्रें करून, दर्भ घालावे. फार उंच नाहीं व फार नीच नाहीं असें, आसन तयार करावें, व त्यावर कृष्णाजिन (व्याघ्र, हरीण इ० उक्त पशूंचें चर्म) घालून त्यावर वस्त्र घालावें—॥ ११ ॥

तत्रैकाग्रं मनः कृत्वा यतचित्तेन्द्रियक्रियः ।
उपविश्यासने युंज्याद्योगमात्मविशुद्धये ॥ १२ ॥

तत्र तस्मिन्नासने उपविश्येति पद्मासनस्वस्तिकासनादिष्वन्यतमस्मिन् स्थिरे सुखे आसने उपविष्टस्यैव समाधिसिद्धिरिति दर्शयति । तदुक्तं । स्मरणोपासनं चैव ध्यानात्मकमितिद्विधा । स्मरणं सर्वदा योग्यं ध्यानोपासनमासने । नैरन्तर्यं मनोवृत्तेर्ध्यानमित्युच्यतेबुधैः । आसीनस्य भवेत्तत्तु न शयानस्य निद्रया । स्थितस्य गच्छतोवापि विक्षेपस्यैव संभवात् । स्मरणात्परमं ज्ञेयं ध्यानं नास्त्यत्रसंशयइति । क्षिप्तं मूढं विक्षिप्तमेकाग्रं निरुद्धमिति चित्तवृत्तयस्तत्र समाध्यंतरंगभूता चतुर्थी मनोवृत्तिर्निर्दिश्यते । एकाग्रं मनःकृत्वेति । उपरत चित्तेंद्रियव्यापारः आत्मनोमनसोविशुद्धये सर्वमनोमलदाहार्थे योगं युंज्यात् । सर्वात्मना चित्तवृत्तिनिरोधलक्षणं समाधियोगंकुर्यात् ॥ १२ ॥

(वरील श्लोकांत सांगितलेल्या) त्या आसनावर बसून, मन आणि इंद्रियें यांचे व्यापार स्वाधीन करून घेऊन, मनापासून उत्पन्न होणारे कल्मषाचे निवारणार्थ, मन निश्चळ करून समाधियोग करावा; ह्मणजे सर्वतः क्षिप्त—मूढ—किंवा एकाग्र आणि निरुद्ध अशा भिन्न भिन्न चित्तवृत्ति आहेत त्यांपैकीं चौथी वृत्ति चित्तनिरोध तद्रूप समाधियोग करावा. उपासना, स्मरणरूप व ध्यानरूप अशा दोन प्रकारच्या आहेत. स्मरणरूप उपासना ही सर्वदा करितां येतें; आणि ध्यानरूप उपासना ही, मनोवृत्ति एकाग्र झाल्यावांचून करितां येत नाहीं. ह्मणून तें (ध्यान) आसनावर बसूनच करावें. तें ध्यान निद्रिताला किंवा उभें राहणाराला, त्यामुळें चित्तवृत्ति चंचल होत असल्यामुळें साध्य होत नाहीं. स्मरणोपासनेपेक्षां ध्यानोपासना श्रेष्ठ होय. ॥ १२ ॥

समं कायशिरोग्रीवं धारयन्नचलं स्थिरः ।
संप्रेक्ष्य नासिकाग्रं स्वं दिशश्चानवलोकयन् ॥ १३ ॥

कायं मध्यदेहं शिरश्च ग्रीवांच समत्वेन धारयन् । अन्यथा मनश्चलनप्रसंगात् । उक्तंच । अचलं चेच्छरीरस्यात्मनसश्चाप्यचालनं । चलनेच शरीरस्य चंचलं च मनोभवेदिति । स्वयं स्थिरः अवहितप्रयत्नः । नासिकाग्रं संप्रेक्ष्येति । भ्रु मध्यं च संप्रेक्ष्येतिग्राह्यं । चक्षुश्चैवांतरेभ्रुवोरित्युक्तत्वात् ॥ १३ ॥

ह्मणून आसनविधि सांगतात—देहाचा मध्यभाग, शीर व कंठदेश सरळ राहील असा ठेवून, दृढ प्रयत्नयुक्त होत्सातां आपल्या नासिकाग्रावर (नाकाच्या शेवटावर) दृष्टि ठेवून इतर ठिकाणीं न पाहतां, शरीर चंचल झालें असतां मनही चंचल होतें ह्मणून शरीर न हालवितां मन एकाग्र करावें असें तात्पर्य. ॥ १३ ॥

प्रशान्तात्मा विगतभीर्ब्रह्मचारिव्रते स्थितः ।
मनः संयम्य मच्चित्तो युक्त आसीत मत्परः ॥ १४ ॥

प्रशान्तात्मा निर्मलचित्तः । अनेन श्रद्धादिसंस्कारवत्वमाचष्टे । विगतभीः । प्रमादालस्याद्यांतरयोगांतरायभयरहितः । ब्रह्मचर्येस्थितः ।

मनः सम्यक् प्रत्याहृत्य मच्चित्तो भगवद्ध्यानवान्युक्तः समाधिसंपन्नः आसीत् । सोपि समाधिर्भगवदनुग्रहादेव भवतीत्याशयेनाह । मत्पर- इति ॥ १४ ॥

निर्मलांतःकरण व निर्भय होऊन, स्त्रीसंगादि वर्ज करून–ब्रह्मचारीपणानें व्रतस्थ राहून–मन हें विषयांपासून फिरवून, तें माझ्या ठिकाणीं लावून, मीच या जडजीवात्मक प्रपंचापेक्षां श्रेष्ठ, सर्वोत्तम असा आहें व माझ्याच प्रसादानें हा समाधियोग सिद्ध होतो असें जाणून, समाधियोगयुक्त होऊन बसावें. ॥ १४ ॥

युंजन्नेवं सदात्मानं योगी नियतमानसः ।
शांतिं निर्वाणपरमां मत्संस्थामधिगच्छति ॥ १५ ॥

न केवलमादरनैरंतर्याभ्यां समाधिः सेवितव्यः किंतु दीर्घमपि तादृक्तयैव व्युत्थानसंस्कारानभिभाव्यत्वादितिदर्शयन् समाधिफलमाह । युंजन्निति । निर्वाणं देहाभावः । तस्मात्परमामुत्तरकालीनां मत्संस्थां मयिस्थितिं तादृशीं शांतिं योगी प्राप्नोति । न जीवन्मुक्तिमात्रमित्यर्थः ॥ १५ ॥

केवळ आदरपूर्वक व निरंतर समाधि केल्यानें (समाधियोग) झाला असें नाहीं. तर पुष्कळ काळपर्यंत समाधिस्थ राहिल्यानें विशेष फळ मिळतें ह्मणून सांगतातः–उपाययुक्त अशा योग्यानें मागें सांगितल्याप्रमाणें सर्वकाळ आपलें चित्त समाधियोगानें युक्त केलें तर, प्रारब्धभोग संपून देहत्याग केल्यावर, माझ्या अनुग्रहानें प्राप्त होणारी जी मुक्ति ती त्याला प्राप्त होते. ॥ १५ ॥

नात्यश्नतस्तु योगोऽस्ति न चैकांतमनश्नतः ।
न चातिस्वप्नशीलस्य जाग्रतो नैव चार्जुन ॥ १६ ॥

योगनिष्ठस्याहारादिनियममाह । नात्यश्नतइतिद्वाभ्यां । एकांतमत्यंतम् । एतच्च जाग्रतइत्यनेनापि संबध्यते ॥ १६ ॥

योगनिष्ठांचे आहारादिकांचा क्रम सांगतातः–हे अर्जुना, अति भोजन करणाऱ्याला (फार जेवणाऱ्याला) समाधियोग साधत नाहीं. तसाच, उप-

वास करणारा, किंवा झोंप घेणारा, पुष्कळ भ्रमण करणारा, अशालाही तो योग साधत नाहीं. हा विषय (फार खाणें किंवा उपवास करणें वगैरे) अशक्त अशांला मात्र लागू होय; सशक्त असतो तो उपवासादिक करूनही योग (समाधियोग) साधन करितो. ॥ १६ ॥

युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु ।
युक्तस्वप्नावबोधस्य योगो भवति दुःखहा ॥ १७ ॥

यावता श्रमाद्यभावोभवति । तावदाहारादेर्दुःखनाशकोयोगो भवति । एतच्चाशक्तविषयं । उक्तंच । निद्राशन भयश्वास चेष्टा तंद्रादिवर्जनं । कृत्वानिमीलिताक्षस्तु शक्तो ध्यायन् प्रसिद्ध्यतीति ॥१७॥

जितक्या आहारानें, जेवढ्या चालण्यानें, जितकें काम केल्यानें, तसेंच जितकी झोंप घेतल्यानें किंवा जागरण केल्यानें श्रम होत नाहींत, तेवढींच तीं (आहारादिक) केल्यानें दुःखनाशक असा योग सिद्ध होतो. हेंही अशक्तांविषयींच सांगितलें. कारण, झोंप, भीति, खाणें, श्वासोछ्वास, आळस, इत्यादि सर्वांचा त्याग करून, नासाग्रावर दृष्टि ठेवून, ब्रह्मध्यान करणारा सशक्त पुरुष समाधियोग साध्य करून घेतो. असा स्मृत्यर्थ (शास्त्राचा अर्थ) आहे. १७

यदा विनियतं चित्तमात्मन्येवावतिष्ठते ।
निःस्पृहः सर्वकामेभ्यो युक्त इत्युच्यते तदा ॥१८॥

योगसंपूर्तिकालमाह । यदेति । आत्मनिभगवति ॥ १८ ॥

समाधि साधली असें केव्हां ह्मणतां येईल, तें सांगतातः—ज्यावेळीं सर्व विषयांपासून फिरविलेलें चित्त, भगवद्ध्यानाचेठायींच आसक्त होतें, किंवा विषासारखे जे विषय त्यांपासून तें निरिच्छ होतें, तेव्हां त्या पुरुषाला समाधियोग साधला असें ह्मणतात. ॥ १८ ॥

यथा दीपो निवातस्थो नेंगते सोपमा स्मृता ।
योगिनो यतचित्तस्य युंजतो योगमात्मनः ॥ १९ ॥

योगीकथंतिष्ठतीत्यपेक्षायां योगिनोऽवस्थितौ दृष्टांतमाह । यथेति । आत्मनः भगाद्विषयं योगं ॥ १९ ॥

योगी कोणत्या प्रकारें राहतो याविषयीं दृष्टांत सांगतातः—मुळींच वारा नाहीं, अशा ठिकाणीं ठेविलेल्या दिव्याची ज्योत जसी हालत नाहीं, तसा परमात्मविषयक समाधिस्थ जो योगी असतो, त्याचें चित्त चंचल होत नाहीं; योग्याचे चित्तास (वर सांगितलेल्या) ज्योतीची उपमा लागू पडते. ॥ १९ ॥

यत्रोपरमते चित्तं निरुद्धं योगसेवया ।
यत्र चैवात्मनात्मानं पश्यन्नात्मनि तुष्यति ॥ २० ॥

विस्तरेण योगलक्षणमाह । यत्रेति । यत्र योगे निरुद्धं मनः उपरमतेऽन्यत्र निवृत्तव्यापारं भवति । विष्णौ रमतइतिवा । हृदिस्थविष्णौ संतोषः सदैवोपरमः स्मृतइतिवचनात् । यत्र चात्मना मनसा । यद्वा परमात्मना । तत्प्रसादादेवात्मनि देहे आत्मानं भगवंतं पश्यन् । तुष्यति सुखं प्राप्नोति ॥ २० ॥

पुनः विस्तारानें योगाचें लक्षण सांगतातः—योगाभ्यासानें निश्चल झालेलें मन ज्या समयीं विषयांपासून फिरतें त्या समयीं योग असें ह्मणतात; किंवा ज्या समयीं हृदयस्थ असलेल्या विष्णूचे ठायीं उपरम नामक संतोष होतो, अथवा परमात्म्याचे अनुग्रहरूप प्रसादानें देहाचे ठायीं जीव नियामकत्वानें असणाऱ्या परमात्म्याला पाहून जेव्हां संतोष प्राप्त होतो, तेव्हां त्याला योग असें ह्मणतात. ॥ २० ॥

सुखमात्यंतिकं यत्तद्बुद्धिग्राह्यमतींद्रियम् ।
वेत्ति यत्र न चैवायं स्थितश्चलति तत्त्वतः ॥ २१ ॥

बुद्धिग्राह्यं स्वानुभवेनवेद्यं अतींद्रियं इंद्रियैरग्राह्यम् । आत्यंतिकं सुखं वेत्ति यत्र स्थितस्तत्त्वतः । अबाधिताद्भगवद्रूपान्न चलति ॥२१॥

आणखींही योगाचेंच लक्षण सांगतातः—जें सुख, स्वरूपज्ञान झालें असतांच समजतें, जें बाह्येंद्रियांस होत नाहीं, असें तें निरतिशय सुख, ज्या अवस्थेंत (योगी) जाणतो, किंवा ज्या अवस्थेंत ध्येय (ध्यानयोग्य) अशा परमात्म्याच्या स्वरूपापासून चंचल होत नाहीं, अशा अवस्थेला समाधियोगावस्था असें ह्मणतात. ॥ २१ ॥

यं लब्ध्वा चापरं लाभं मन्यते नाधिकं ततः ।
यस्मिन्स्थितो न दुःखेन गुरुणापि विचाल्यते ॥२२॥

यं लब्ध्वा ततोधिकमपरं लाभं न मन्यते । यस्मिन् स्थितो-गुरुणापि दुःखेन न विचाल्यते ॥ २२ ॥

ज्या अवस्थेंत प्राप्त परमात्मलाभापेक्षां दुसरा लाभ अधिक वाटत नाहीं, किंवा, ज्यासमयीं परमात्मज्ञानाचेठायींच स्थित होऊन, मोठें दुःख प्राप्त झालें असतांही चळत नाहीं, अशा अवस्थेला समाधियोगावस्था असें ह्मणतात. २२

तं विद्याद्दुःखसंयोगवियोगं योगसंज्ञितम् ।
स निश्चयेन योक्तव्यो योगोऽनिर्विण्णचेतसा ॥२३॥

तं योगसंज्ञितं विद्यात् । दुःखसंयोगो येन वियुज्यते स दुःखसं-योगवियोगः तम् । संयोगशब्देन न केवलमुत्पन्नं दुःखं नाशयति किंतूत्पत्तिमेव निवारयतीत्तिदर्शयति । योगानुष्ठाने गुणांतरविधानार्थ माह । सइति । निश्चयेन योक्तव्यएव बुभूषुणेत्यर्थः ॥ २३ ॥

त्या (वर सांगितलेल्या) अवस्थेला, दुःखसंयोगवियोगास साधन असा योग समजावा. (त्या अवस्थेला योग असें नांव समजावें.) तो योग लवकर सिद्धीस जाणार नाहीं असा खेद करणारानें, तो निश्चयानें करण्यास योग्य आहे. ॥ २३ ॥

संकल्पप्रभवान्कामांस्त्यक्त्वा सर्वानशेषतः ।
मनसैवेंद्रियग्रामं विनियम्य समंततः ॥ २४ ॥

सर्वान्सर्वविषयानशेषतः । एकविषयोपि कामः संकल्पः कदा-चित्कापि न कर्तव्यइत्यर्थः । मनसैव नियंतुं शक्यते नान्येनेत्येव-शब्दार्थः ॥ २४ ॥

(योगसाधन करणें होणार नाहीं.) अशी ज्याची समजूत असेल त्या पुरुषानें, संकल्पास कारण होणारे जे विषय, त्यांचा त्याग करून, ह्मणजे उपभोगात्मक विषयांची कधींही कोठेंसुद्धां यत्किंचितही अपेक्षा करूं नये, ती

अपेक्षा (इच्छा) मनानेंच आवरून धरावी; कारण मनाशिवाय ती इच्छा आवरणें, इतर इंद्रियानां शक्य नाहीं. ॥ २४ ॥

शनैःशनैरुपरमेद्बुद्ध्या धृतिगृहीतया ।
आत्मसंस्थं मनः कृत्वा न किंचिदपि चिंतयेत् ॥२५॥

बुद्ध्या उपरमेत् विषयेभ्योनिवर्तयेत् । आत्मनि रमेतेतिवा २५

म्हणून धैर्यानें स्वाधीन करून घेतलेल्या बुद्धीनें आपलें मन, परमात्म्याचेठायीं दृढ करून अभ्यासानें तें हळुहळू विषयांपासून फिरवावें; व परमात्म्याशिवाय कोणतेही विषय अल्पसुद्धां मनांत आणूं नयेत. ॥ २५ ॥

यतो यतो निश्चरति मनश्चंचलमस्थिरम् ।
ततस्ततो नियम्यैतदात्मन्येव वशं नयेत् ॥ २६ ॥

मध्येअनवास्थितंचेन्मनस्तदा प्रत्याहारेण वशीकुर्यादित्याह । यतइति । यतो यतो यत्र यत्र । अस्थिरं योगसमये चंचलं सत् मनोनिर्गच्छति एतन्मनस्ततोनियम्य प्रत्याहृत्यात्मन्येव वशं नयेत् । आत्मविषयएव वशीकुर्यादित्यर्थः ॥ २६ ॥

एखाद्याचें मन स्थिर न होतां मध्येंच चंचल होत असेल तर, त्याला—मनाला—प्रत्याहार योगानें वश करावें याविषयीं सांगतातः—जें स्वभावतःच चंचल असलेलें, धैर्यानें आवरून धरलें तरी स्थिर होत नाहीं असें मन, ज्या ज्या विषयांकडे जात असेल त्या त्या विषयांपासून प्रत्याहार योगानें त्याचें आकलन करून, (स्वाधीन करून) तें परमात्म्याचेठायीं स्थिर करावें ॥२६॥

प्रशांतमनसं ह्येनं योगिनं सुखमुत्तमम् ।
उपैति शांतरजसं ब्रह्मभूतमकल्मषम् ॥ २७ ॥

एवं सांगयोगमभिधाय तदनुष्ठातुः फलं प्रपंचयति। प्रशांतमनसमिति । विगतरजोदोषं ब्रह्मणिस्थितं एनं योगिनं उत्तमं सुखं कर्तृ स्वयमुपैति ॥ २७ ॥

असें (वर सांगितलेलें) योगाचें पूर्ण लक्षण सांगून, त्याप्रमाणें योगसाधन करणारास फळ काय मिळतें तें सांगतातः—शांत झाला आहे

रजोगुण ज्याचा, परमात्म्याचेठायीं स्थिर झालें आहे मन ज्याचें, व त्या परमात्म्याविषयीं अत्यंत पूज्यबुद्धि झाली आहे ज्याची, अशा योग्याला उत्तम प्रकारचें समाधिसुख आपोआप प्राप्त होतें. ॥ २७ ॥

युंजन्नेवं सदात्मानं योगी विगतकल्मषः ॥
सुखेन ब्रह्मसंस्पर्शमत्यंतं सुखमश्नुते ॥ २८ ॥

तत्सुखं किं प्रयासेनभवति कीदृशं चेत्यतउक्तं प्रपंचयति । युंजन्निति । सुखेनाक्लेशेन भगवत्संसर्गाभिव्यक्तं ॥ २८ ॥

तें समाधिसुख प्रयत्नानें मिळण्यासारखें आहे किंवा नाहीं? व तें कोणास मिळतें, या विषयीं सांगतातः—या प्रमाणें आपलें मन निरंतर परमात्म्याचेठायीं ठेवून, मनोदोषरहित—निर्दोष—झाल्यावर, ब्रह्माविषयीं अपरोक्षज्ञान ज्यास उत्पन्न झालें आहे, असा ज्ञानी—योगी—सर्वोत्कृष्ट अशा समाधि सुखाचा उपभोग घेतो. ॥ २८ ॥

सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि ॥
ईक्षते योगयुक्तात्मा सर्वत्र समदर्शनः ॥ २९ ॥

इदानीं ध्येयमाह । सर्वभूतस्थमित्यादिनासर्वभूतेषु स्थितं परमात्मानं परमेश्वरं सर्वभूतानिचात्मनि परमेश्वरे तं च परमेश्वरं सर्वत्र ब्रह्मतृणादौ ऐश्वर्यादिना साम्येन पश्यतीति समदर्शनः ॥२९॥

आतां ध्येयाचें स्वरूप सांगतातः—ज्याचें अंतःकरण ध्यानयोगानें युक्त झालें आहे असा योगी, सर्व प्राण्यांचेठायीं नियामकत्वानें परमात्माच आहे असें पहातो; तसेंच परमात्म्याचेठायीं सर्व प्राण्यांस पहातो, म्हणजे ब्रह्मादिदेवांपासून तृणापर्यंत सर्व भूतांचेठायीं नियामकत्वानें असणारी परमात्म्याचीं स्वरूपें, स्वातंत्र्य ऐश्वर्यादिगुणांनीं सम आहेत, असें जाणतो; हें समदर्शन (सारखें पहाणें) परमात्म्याच्या अभिन्नांशरूप रामकृष्णादि अवतारांविषयींच आहे; कारण, परमात्म्याच्या स्वरूपांत किंवा त्याच्या स्वरूपांश जे मत्स्यकूर्मादि अवतार त्यांत, भेद आहे असें मानणें हें केवळ अधोगतीला कारण आहे. त्यांवांचून भिन्न असे अंशभूत जीव, त्यांच्या त्यांच्या अनादि योग्यता व

वासना यानीं श्रेष्ठ कनिष्ठ अशा अनेक भेदानीं युक्त आहेत; ह्मणून त्यांस परस्पर समान मानणें हें अनुचित होय; किंवा, अल्पज्ञ, परतंत्र, अपूर्ण, अवरत्वादि अनेक दोषयुक्त जीवांला व नित्य मुक्त, सर्वज्ञ, स्वतंत्र इत्यादि सर्व गुणसंपन्न अशा श्रीहरीला समान मानणें हें प्रत्यक्षानुमानागमविरुद्ध असल्यानें तसें मानतां येत नाहीं ॥ २९ ॥

यो मां पश्यति सर्वत्र सर्वं च मयि पश्यति ॥
तस्याहं न प्रणश्यामि स च मे न प्रणश्यति ॥३०॥

अस्य ध्यानविशेषस्य फलमाह । योमामिति । तस्याहं न प्रणश्यामि सर्वदा योगक्षेमवहःस्यामीत्यर्थः । सच मे न प्रणश्यति सर्वदा मद्भक्तोभवति ॥ ३० ॥

ध्यानयोगानें कोणतें विशेष फळ मिळतें तें सांगतातः—जो अधिकारी, सर्व भूतांचे ठायीं मी (परमेश्वर) आहें असें पहातो, किंवा सर्व भूतें माझ्याच आश्रयानें आहेत असें पहातो, अशा त्या सत्पुरुषास मी कधींही दूर होत नसून, त्याचा योगक्षेम मींच चालवितों. आणि तो (सत्पुरुष) ही माझ्या-ठायीं आसक्त राहून मला विसरत नाहीं. ॥ ३० ॥

सर्वभूतस्थितं योमां भजत्येकत्वमास्थितः ॥
सर्वथा वर्तमानोऽपि स योगी मयि वर्तते ॥ ३१ ॥

एतदेवस्पष्टयति । सर्वभूतस्थितमिति । एकत्वमास्थितः सर्वत्रैकएव परमात्मेति स्थितः । सर्वप्रकारेण न्यायेनान्यायेन वर्तमानोमय्येव वर्तते । एवमधर्माचरणेप्यपरोक्षं पश्यतोज्ञानफलं नियतमित्यर्थः । प्रायेण ज्ञानिनां नाधर्मेबुद्धिः प्रामादिकंतु पापं भस्मीभवति । महच्चेदुःखसूचकं भवतीतिभावः । उक्तंच । कदाचिदपिनाधर्मे बुद्धिर्विष्णुदृशां भवेत् । प्रमादात्तुकृतं पापं स्वल्पं भस्मी भविष्यति । आदिराजैस्तथादेवै ऋषिभिः क्रियते कियत् । बाहुल्यात्कर्मणस्तेषां दुःखसूचकमेवतदिति । ३१ ॥

मागील श्लोकांचा अर्थ अधिक स्पष्ट करून सांगतातः—जो अधिकारी, ब्रह्मारंभ करून तृणजीवपर्यंत अशेष जीवनियामकत्वानें असणारा परमात्मा

ज्ञेयवस्तु कोणती तें समजण्याकरितां ज्ञानाचीं साधनें आणि ज्ञान विकारांतर्गत भावानें सांगतातः—आपले गुण आपल्या तोंडानें न सांगणें, आपली थोरवी (मोठेपणा) न दाखविणें,(ढोंगीपणा नसणें) हिंसाकर्म न करणें, प्राप्त होणारीं सुखदुःखें प्रारब्धानें प्राप्त होतात असें समजून तीं सहन करणें, मनानें, शरीरानें आणि वाणीनें विपरीत कर्म न करणें, सद्गुरूच्या सेवेंत तत्पर असणें, अंतरबाह्य शुद्ध असणें--(मृत्तिका, जल यानीं बाह्य शुद्धि व मनांत दुष्टविकार नसणें ही अंतःशुद्धि) भयादिकांमुळेंही स्वधर्मापासून न ढळणें, आणि विशेषेंकरून मनाचा निग्रह करणें. ॥ ७ ॥ इंद्रियांचे जे विषय ते निःसार आहेत, असें समजून त्यांचेठिकाणीं प्रीति न ठेवणें, मनांत अहंकार न धरणें, जन्म, मृत्यु, म्हातारपण (जरा) दुःख इत्यादि दोष या संसारांत आहेत असें समजणें. ॥ ८ ॥ (७–८)

असक्तिरनभिष्वङ्गः पुत्रदारगृहादिषु ॥
नित्यं च समचित्तत्वमिष्टानिष्टोपपत्तिषु ॥ ९ ॥

असक्तिः स्नेहाभावः अनभिस्वंगोऽतिपक्वस्नेहाभावः स्नेहः सक्तिः सएवातिपक्वोभिष्वंगउच्यतइत्यभिधानात् दाराः स्त्रियः इष्टानिष्टप्राप्तिषु समचित्तत्वं हर्षविषादाभावः ॥ ९ ॥

मुलगा, बायको, घर इत्यादिकांवर आसक्ति नसणें व त्यांपासून प्राप्त होणारीं सुखदुःखें सदोदित मनांत चिंतन न करणें, इष्ट किंवा अनिष्टप्राप्ति झाली असतां त्यापासून हर्ष किंवा विषाद न पावणें. ॥ ९ ॥

मयि चानन्ययोगेन भक्तिरव्यभिचारिणी ॥
विविक्तदेशसेवित्वमरतिर्जनसंसदि ॥ १० ॥

विविक्तदेशसेवित्वं शुद्धस्थानस्थितिः ॥ १० ॥

अन्य विषयांवरून चित्त आवरून, केवळ माझ्याच ठिकाणीं तें लावून, माझी भक्ती करून, चित्त शुद्ध करून, दुर्जनसभेंत आसक्ति नसतां राहणें. १०

अध्यात्मज्ञाननित्यत्वं तत्त्वज्ञानार्थदर्शनम् ॥
एतज्ज्ञानमिति प्रोक्तमज्ञानं यदतोऽन्यथा ॥ ११ ॥

अध्यात्मज्ञाने नित्यत्वं नियतत्वं तत्वज्ञानार्थे अपरोक्षज्ञानार्थे दर्शनं शास्त्रदर्शनं । अथवा तत्वज्ञानविषयस्य विष्णोरपरोक्षदर्शनं एतज्ज्ञानमिति निगमनं । ज्ञायतेनेनेतिज्ञानं ज्ञप्तिर्ज्ञान मितिच व्युत्पत्त्या ज्ञानशब्देन ज्ञानसाधनं ज्ञानंचोच्यते । अतोन्यथा तद्विपरीतं यत्तदज्ञानं ज्ञानं तत्साधनंच नभवतीत्यर्थः ॥ ११ ॥

अध्यात्मज्ञानाचे ठिकाणीं निरत रहाणें, अपरोक्षज्ञान होण्याकरितां शास्त्रांचें ज्ञान संपादन करणें, हे अमानित्वादि गुण ज्ञानाला साधन आहेत. यांतील परमात्म्याचे ज्ञानाशिवाय असलेले गुण ज्ञानप्राप्तीस साधन होत असें जाणावें. परमात्म्याचें अपरोक्षज्ञान यालाच ज्ञान असें समजावें. याशिवाय जे गुण आहेत ते अज्ञानास कारण आहेत असें समजावें. ॥ ११ ॥

ज्ञेयं यत्तत्प्रवक्ष्यामि यज्ज्ञात्वाऽमृतमश्नुते ॥
अनादिमत्परं ब्रह्म न सत्तन्नासदुच्यते ॥ १२ ॥

बहुत्वात्साधनात्युपयोगाच्च पूर्वप्रतिज्ञातं यतश्चयदित्यर्थं पश्चाद्वक्तुं स च योयत्प्रभावश्चेति प्रतिज्ञातार्थं प्रतिपादयन्नेवाह । ज्ञेयमित्यादिना । यत्प्रभावइत्येतदुपपाद्यते । आदिरस्यास्तीत्यादिमत् न आदिमदनादि- मत् अनादीत्येवोक्ते छांदसं लिंगव्यत्ययं विभक्तिलोपं वा मन्यमानस्य बहुव्रीहितत्पुरुषसंदेहे स्वयं कारणं न भवतीत्याशंकास्यात्तान्निवृत्त्यर्थं अनादिमदित्युक्तं यद्वा आदिरेषामस्तीत्यादिमंति देहेंद्रियादीनि तद्व- र्जितमनादिमत् । मुख्यतोगुणपूर्णत्वात्परं ब्रह्म मूर्तातीतत्वान्नसत् अमूर्तातीतत्वान्नासत् । उक्तंच । मुख्यतो गुणपूर्णत्वात्परं ब्रह्म जना- र्दनः । मूर्तामूर्तव्यतीतत्वान्नसन्नैवासदुच्यतइतिवचनात् । मूर्तसदिति-

संप्रोक्तममूर्तमसदुच्यते । मूर्तामूर्तेतरब्रह्म नसत्तन्नासदुच्यते । यदन्यद्वायोश्चांतरिक्षाच्चैतत्सद्वायु रंतरिक्षंचासत् ॥ १२ ॥

ज्ञानसाधनें पुष्कळ आहेत, तीं प्रथम सांगून नंतर पूर्वीं सांगितलेल्या साधनांनीं समजण्यास योग्य वस्तु कोणती तें स्पष्ट करून सांगतात:—ज्या वस्तूंच्या ज्ञानानें अधिकाऱ्यास मोक्षप्राप्ति होते, त्या वस्तूंचें सामर्थ्य असें आहे कीं, यापूर्वीं सांगितलेल्या साधनांनीं, जाणतां येतो असा क्षेत्रप्रेरक परमात्मा, कारणयुक्तदेह आणि इंद्रियें यांनीं रहित असल्यामुळें, त्यास अनादिमत् असें ह्मणतात; अथवा तो सर्व सद्गुणांनीं परिपूर्ण असल्यामुळें त्यास परब्रह्म असेंही ह्मणतात; पुरुषाला, (आपल्या) सामर्थ्यानें जाणण्यास योग्य असलेलीं जीं पृथ्वि, आप व तेज यांस मूर्त व सत् असें ह्मणतात; स्थूल दृष्टीनें पहाणारास दिसण्यास अशक्य अशीं जीं वायु व आकाश, यांला अमूर्त व असत् असें ह्मणतात; या दोहोंपासून तें ज्ञेय असें परमात्मस्वरूप—ब्रह्म—नित्य भिन्न असल्यामुळें, त्यास मूर्तामूर्तेतर असें ह्मणतात. परमात्मा श्री नारायण हा पृथिव्यादि मूर्त आणि वायु, आकाश अमूर्त, यांहून निरंतर भिन्न असून तो गुणपूर्ण असल्यामुळें त्यास परब्रह्म असें ह्मणतात. हें श्रुतिस्मृतिसिद्ध आहे. यावांचून दुर्मतीनें मानिलेलें अनिर्वचनीयत्व त्या परमात्म्यास लावूं नये; कारण, (तो) अनिर्वचनीय (आहे) असें सांगून, तोच परब्रह्म आहे असें ह्मणणें हें अगदीं परस्पर विरुद्ध आहे. पुढील श्लोकांत त्याच्या स्वरूपाचें वर्णन केलें आहे, त्यांत अनिर्वचनीय ह्मणजे काय तें सांगितलें असतां आपल्या बोलण्यास विरोध येणारच, यावरून दुर्मत (वाईट मत) सर्वदा उपेक्षा करण्यासच योग्य होय. ॥ १२ ॥

सर्वतः पाणिपादं तत्सर्वतोऽक्षिशिरोमुखम् ॥
सर्वतः श्रुतिमल्लोके सर्वमावृत्य तिष्ठति ॥ १३ ॥

केशादिष्वपि सर्वत्र पाणिपादादिशक्तिमत्वस्य कृष्णकेशे कृष्णे दृष्टत्वात्सर्वतःपाण्यादीत्युच्यते । अथवा पाण्यादियुक्तैरणुतरैरूपैः सर्वत्रस्थितत्वात्सर्वतः पाणिपादादिमत् । उक्तंच । सर्वत्रपाणिपादादियतः पाण्यादिशक्तिमान् । केशादिष्वपि सर्वत्र कृष्णकेशोहि यादवः ।

अणोरणुतरैरूपै पाणिपादादिसंयुतैः । सर्वत्रसंस्थितत्वाद्वा सर्वतःपाणिपाद्वान् इति ॥ १३ ॥

तो क्षेत्रप्रेरक परमात्मा ह्मणजे ज्यास ब्रह्म असें ह्मणतात, तो सर्व जगाचे अंतर्यामि असून, त्यास सर्वत्र (चोहोंकडेही) हातपाय आहेत, सर्वत्र डोळे, डोकीं, तोंडें आहेत, सर्वत्र त्यास कान आहेत, याप्रमाणें असलेला तो परमात्मा सर्वांला व्यापून राहिला आहे असें समजावें. येथें सर्वतः करचरणादियुक्त तो (परमात्मा) आहे असें जें ह्मटलें आहे तें असें कीं, कृष्णकेशात्मक यदुकुलोत्पन्न श्रीकृष्णाचे ठिकाणींही हातपाय इत्यादि सर्व अवयव असल्यामुळें, अथवा सर्वांच्या अंतर्यामीं त्या त्या वस्तूच्या प्रेरकरूपानें असणाऱ्या परमात्म्याचीं अति सूक्ष्म रूपेंही हातपाय इत्यादि अवयवांनींयुक्त असतात; याकरितां तें ब्रह्म अनिर्वचनीय निराकार असें ह्मणणें हें जगन्मिथ्यात्वादि दुराग्रहानें जे व्यापिले आहेत अशांसच मात्र शोभेल. ॥ १३ ॥

सर्वेन्द्रियगुणाभासं सर्वेन्द्रियविवर्जितम् ॥
असक्तं सर्वभृच्चैव निर्गुणं गुणभोक्तृ च ॥ १४ ॥

सर्वाणींद्रियाणि सर्वे गुणाः विषयाश्च भास्यंते ज्ञायंते ज्ञाप्यंते चानेनेति सर्वेंद्रियगुणाभासं प्राकृतानां भिन्नानां चेंद्रियाणामभावात्सर्वेंद्रियवर्जितं । न तु सर्वथाऽभावात्सर्वतः पाणिपादं तदित्यादेः । उक्तंच । अपाणिपादोजवनोगृहीता पश्यत्यचक्षुः सश्रुणोत्यकर्णः । सवेत्तिवेद्यं नच तस्य वेत्ता तमाहुरग्र्यं पुरुषं महांतं । न तस्य कार्यं करणं च विद्यते न तत्समश्चाभ्याधिकश्च दृश्यते । परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रियाचेति असक्तं निर्लेपं सर्वं भुक्तइति सर्वभुक् निर्गुणं सत्वादि गुणहीनं कल्याण गुणवर्णनप्रकरणात् अगुणोऽगुणदेहत्वादितिवचनात्। गुणभोक्तृ सर्वगुणभोक्तृत्वेपि सारभूतमानंदादिकमेव भुंक्ते । सर्वत्र सारभुकूदेवो नासारं स कदाचनेतिवचनात् ॥ १४ ॥

तें परब्रह्म सर्व इंद्रियें आणि सर्व इंद्रियांचे विषय, सकल जनांस दाखविणारें, प्राकृत इंद्रियानीं रहित, पुण्यपापांचा गंध ज्यास नाहीं, स्वतंत्रपणानें,

सर्व जगाचें धारण करणारें, सत्वादिगुणरहित, सर्व आनंदादिसार सेवन करणारें इत्यादि अनेक गुणांनीयुक्त असें आहे ॥ १४ ॥

बहिरन्तश्च भूतानामचरं चरमेव च ॥
सूक्ष्मत्वात्तदविज्ञेयं दूरस्थं चान्तिके च तत् ॥ १५ ॥

भूतानां नित्यसिद्धानां जीवानां बहिरंतश्च व्यवस्थितं । अन्यथा भावराहित्यादचरम् । सर्व देशेषु चरणाच्चरम् । सूक्ष्मत्वादिंद्रियाग्राह्यत्वादनुमानस्यानियतत्वाद्वेदैर्विज्ञातुमशक्यं सर्वगतत्वात्दूरस्थं अंतिकेऽवस्थितम् ॥ १५ ॥

तें ब्रह्म नित्य अशा प्राणिमात्रांचे आंत आणि बाहेर व्याप्त असून विकाररहित व सर्व देशांत व्याप्त असलेलें अतिसूक्ष्म आहे; ह्मणून, इंद्रियादिकांनीं जाणण्यास अशक्य आहे. सर्वत्र व्याप्त असल्यामुळें जरी तें दूर आहे तरी, समीपच आहे असें समजावें.

अविभक्तं च भूतेषु विभक्तमिव च स्थितम् ॥
भूतभर्तृ च तज्ज्ञेयं ग्रसिष्णु प्रभविष्णु च ॥ १६ ॥

विभक्तेष्वपि भूतेषु स्थितमविभक्तमेव विभक्तमिवाज्ञानां प्रतिभाति । भूतानां भर्तृ धारणादिकर्तृ तद्ब्रह्म ज्ञेयं परैर्ज्ञातव्यं ग्रसिष्णु प्रलये सर्वभक्षकं प्रभाविष्णु सृष्टिकाले सर्वोत्पादकम् ॥ १६ ॥

तें परब्रह्म ज्ञानिजनांनीं जाणण्यास योग्य असें आहे. भिन्न भिन्न सर्व जीवांत अंतर्यामीरूपानें असून त्या जीवांचें धारणपोषण करणारें आहे व प्रलयकाळीं सर्व भूतांचा संहार करतें व सृष्टिकाळ प्राप्त झाला असतां त्या त्या जीवांच्या योग्यतेप्रमाणें त्या त्या जीवांस उत्पन्न करतें. तें ब्रह्म अनेक रूपांनीं, अनेक जीवांत असलें तरी त्या परब्रह्माच्या रूपांत परस्पर भेद नाहीं. त्याचीं रूपें सर्वही परस्पर अभिन्न आहेत. अज्ञानिजन मात्र जीवसमुदाय परस्पर भिन्न असल्यामुळें त्याच्या अंतर्यामि परमात्म्याचीं रूपेंही भिन्न आहेत असें समजतात. परमात्म्याचीं रूपें स्वतः अभिन्न असून जीवांपासून मात्र अत्यंत भिन्न आहेत. असें ज्ञान मोक्षास कारण आहे असें समजावें. ॥ १६ ॥

ज्योतिषामपि तज्ज्योतिस्तमसः परमुच्यते ॥
ज्ञानं ज्ञेयं ज्ञानगम्यं हृदि सर्वस्य धिष्ठितम् ॥ १७ ॥

ज्योतिषां सूर्यादीनामपि ज्योतिः प्रकाशशक्तिप्रदम् । तमसः अव्यक्तान्मृत्योरज्ञानाद्वा परं ज्ञानं प्रकाशस्वरूपं ज्ञेयं स्वेन प्रकाश्यम् । उक्तंच । स्ववेत्तावेदनं च स्वं स्वेन वेदश्च केशवः । परस्य वेत्ता वित्तिश्च वेद्यश्च स्यात्परैः क्वचिदितिवचनात् । ज्ञानगम्यं ज्ञानेन मुक्तौ प्राप्यं सर्वस्य जगतोत्हृदि विशेषेण स्थितं अन्यत्र विरुद्धत्वेनप्रतीयमाना धर्माः भगवत्यविरोधेन वर्तंते । उक्तंच । अनंताव्ययशक्तित्वात्तदन्यत्र विरोधिनः । संति सर्वगुणास्तत्र न च तत्र विरोधिनइति ॥ १७ ॥

तें परब्रह्म प्रकाशयुक्त अशा सूर्यादिकांस प्रकाशशक्ति देणारें, तमोनामक अव्यक्त तत्वाहून श्रेष्ठ, अथवा मृत्यु नामक अज्ञानापासून दूर, त्याच्या अनुग्रहानेंच जाणण्यास योग्य, ज्याचें अपरोक्षज्ञान (होणें) हें मोक्षप्राप्तीस मुख्य साधन आहे, सर्व जगदंतर्यामीं नियामक रूपानें असणारें, याप्रमाणें परब्रह्मस्वरूपी जो परमात्मा त्याचे ठिकाणीं, श्रुतिस्मृतींनीं अनेक विलक्षण गुण प्रतिपादन केले आहेत, त्यांत साधारण (बुद्धीचे) जनांस आपाततः विरोध दिसला तरी, अघटित घडविण्याची शक्ति असलेल्या परमात्म्यास, अशक्य असें कांहींच नसल्यामुळें, तसा विरोध मानूं नये. ॥ १७॥

इति क्षेत्रं तथा ज्ञानं ज्ञेयं चोक्तं समासतः ॥
मद्भक्त एतद्विज्ञाय मद्भावायोपपद्यते ॥ १८ ॥

उक्तमुपसंहृत्य तज्ज्ञानं स्तौति । इतीति । मद्भावाय मयिभावाय ॥ १८ ॥

महाभूतांपासून आरंभ करून धृतिपर्यंत विकारांसहित क्षेत्र सांगितलें, 'अमानित्वा' येथपासून आरंभ करून "तत्वज्ञानार्थे दर्शनं" येथपर्यंत [...] 'ं ब्रह्म' येथपासून आरंभ करून 'हृदिसर्वत्र-
[...]ाधनानें समजण्यास योग्य, क्षेत्रप्रेरक परमात्म्याचें
[...] जो माझा भक्त, हें क्षेत्र किंवा क्षेत्रादिकांचें

स्वरूप, योग्य रीतीनें जाणतो, तो माझ्या देहांत भिन्नत्वानें राहून, सुखोपभोगास योग्य अशी सायुज्यमुक्ति प्राप्त करून घेतो. ॥ १८ ॥

प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि ॥
विकारांश्च गुणांश्चैव विद्धि प्रकृतिसम्भवान् ॥ १९ ॥

यतश्चयदिति प्रतिज्ञातं वक्तुं प्रकृतिविकारपुरुषान् संक्षिप्याह । प्रकृतिमित्यादिना । प्रकृतिशब्देन चेतनाचेतनप्रकृत्योः पुरुषशब्देन जीवपरयोर्ग्रहणायोभावपीत्युक्तम् द्वे प्रकृती द्वौ पुरुषौ चानादी विद्धि विकारांश्च गुणांश्च प्रकृतिसंभवान् प्रकृत्युपादानकान् विद्धि । सत्वादिगुणानां विकारत्वेप्यन्येषामधिकविकारत्वाविवक्षया पृथगुक्तिः ॥१९॥

प्रतिज्ञात वस्तु सांगण्याकरितां प्रकृतिविकार व पुरुष, यांचें संक्षेपानें वर्णन करितातः—प्रकृति ह्मणजे जडप्रकृति आणि चित्प्रकृति, महालक्ष्मी व पुरुष ह्मणजे अल्पज्ञत्वादिगुणांनींयुक्त असा जीव व सर्वज्ञत्वादिगुणयुक्त असा परमात्मा; याप्रमाणें दोन प्रकृति व दोन पुरुष, हे अनादि, नित्य आणि निरतिशय भेदयुक्त आहेत असें समजावें; इच्छादि गुण किंवा विकार हे, जडप्रकृतिरूप उपादान कारणापासून उत्पन्न झालेले व सत्वादि गुणही विकारानेंच उत्पन्न झालेले आहेत; तथापि (ते) स्पष्टपणें समजावे ह्मणून या ठिकाणीं ते प्रत्येक घेतले आहेत. ॥ १९ ॥

कार्यकारणकर्तृत्वे हेतुः प्रकृतिरुच्यते ॥
पुरुषः सुखदुःखानां भोक्तृत्वे हेतुरुच्यते ॥ २० ॥

कार्यं शरीरं शरीरंकार्यमुच्यतइत्यभिधानात् कारणानींद्रियाणि कर्तृत्वं क्रियाविकारः हेतुः कारणं भोक्तृत्वं भोगोनुभवात्मकः यद्यपि सर्वे विकाराः प्रकृतिसंभवाः तस्याएव परिणामित्वात् तथापि भोक्तारश्चेतनाएव अचेतनस्य भोक्तृत्वासंभवादित्यर्थः अथवा भगवतः सर्वकर्तृत्वेपि चित्प्रकृतिर्भोक्तृत्वप्रदाने स्वप्रवृत्तिमपेक्ष्य कार्यकारणकर्तृत्वेऽधिकप्रवृत्तिमती पुरुषोविष्णुः सर्वकर्तापि जीवंप्रति भोक्तृत्वदाने देव्याअल्पप्रवृत्तित्वात्स्वयमेव सुखादिभोक्तृत्वे हेतुरिति विभागेनोभयोः

कर्तृत्वव्यपदेशोयुज्यते अतएवोच्यतइत्यर्थद्वयेप्युक्तम्। उक्तंच। स्वदेहें-द्रियहेतुत्वं यज्जीवस्य स्वकर्मभिः। आवृत्य विष्णुतत्वं तद्धेतुश्चित्प्रकृतिर्मता। जीवस्य सुखदुःखानां भोगशक्तिप्रदःसदा। परमः पुरुषोविष्णुः सर्वकर्तापि सन् सदा। विशेषकर्ता केषांचिदुक्तोयद्वद्विकुंठय। उच्यते सर्वपालोपि विशेषेण स्वकर्मणेति ॥ २० ॥

शरीर आणि इंद्रियांचे विषय यांच्या ठिकाणीं जडप्रकृति कारण मानिली आहे व सुखदुःखादि भोगण्यास जीव कारण (मानिला) आहे. सर्व विकार जरी जडप्रकृतिपासून उत्पन्न होतात तरी, त्यांचे भोक्ते जीवच होत; कारण जडास भोक्तृत्वशक्ति नाहीं. अथवा, भगवान् श्रीकृष्ण नारायण हा सर्व कर्ता असला तरी, चित्प्रकृति ही, भोक्तृत्व देण्याविषयीं परमात्म्याचे मनाप्रमाणें अनुकूल होऊन, कार्यकारण व कर्तृत्व यांविषयीं प्रवृत्त होते. पुरुषशब्दवाच्य विष्णु हा सर्व कर्ता असला तरी, आपल्या आज्ञेप्रमाणें जीवांस सुखदुःख देणाऱ्या लक्ष्मीस आपणच प्रेरणा करून, (जीवांस) लक्ष्मीच्याद्वारें सुखदुःखादि देतो; याकरितां तो परमात्मा सर्व कार्यकर्ता असला तरी, येथें सुखदुःख देणारा असा अर्थ घेतला आहे ॥ २० ॥

पुरुषः प्रकृतिस्थो हि भुंक्ते प्रकृतिजान्गुणान् ॥
कारणं गुणसङ्गोऽस्य सदसद्योनिजन्मसु ॥ २१ ॥

यज्जीवानां कार्यकारणसंबंधे सुखदुःखादिभोगे च लक्ष्मीनारायणौ कारणमित्युक्तं तदसत् देहादिसंबंधस्य सुखदुःखादिभोगस्य च मिथ्यात्वादित्यतआह। पुरुषइति। पुरुषोजीवः प्रकृतिकार्ये देहादौ स्थितः प्रकृतिजान् गुणान् दुःखादीन् भुंक्तेहीत्यनुभवसिद्धत्वाद्बाधकाभावाच्च असत्यत्वं न युज्यतइति भावः। पुरुषशब्देनोभयोः प्रकृतत्वेपि योग्यतया जीवएव परामृश्यते। उक्तंच। बहूनां सह निर्देश एकयाभिधयैव तु। तथैवाभिधया तेषां परामृश्यैकमुच्यतइति। ननु स्वतःशुद्धस्य जीवस्य प्रकृतिस्थत्वे किं कारणमित्यतआह। कारणमिति। अस्य जीवस्य सदसद्योनिजन्मसु सत्वादिगुणसंगः कारणम् ॥ २१ ॥

जीवांस कार्यकारणसंबंधाविषयीं व सुखदुःखादि भोग देण्याविषयींही श्रीलक्ष्मीनारायणच मुख्य कारण आहे असें सांगितलें; पण तसें संभवत नाहीं; कारण देहादिसंबंध किंवा सुखदुःखादि भोग हा जीवांस मिथ्याच आहे, अशी शंका येते तिचा परिहार करितातः—जडप्रकृति कार्य देहांत रहात असलेला जीव, प्रकृतिसंबंधानें सुखदुःखादि अनुभवितो; त्या अनुभवास उत्तरकालीं बाधकज्ञान होत नसल्यामुळें तो असत्य ह्मणतां येत नाहीं. या जीवास, सुखदुःखादि अथवा सद्योनिभूत अशीं देवशरीरें प्राप्त होण्यास व असद्योनिभूत नरतिर्यगादि शरीरें प्राप्त होण्यास सत्वादिगुणांचा संगच कारण होय. " पुरुष " या शब्दानें परमात्मा व जीव हे दोन्हीही घेतां येतात, परंतु या ठिकाणीं शरीरसंबंधीं दुःखभोग सांगितल्यामुळें, पुरुष शब्दानें " जीव " असाच अर्थ घेतला पाहिजे. कारण परमात्मा हा, नित्य, शुद्धानंदसुखमूर्ति, स्वतंत्र, दुःखादिक सर्व दोष ज्याला नाहींत असा असल्यामुळें, " पुरुष " शब्दानें परमात्मा असा अर्थ घेतला असतां, त्यास सुखदुःखादि दोष येतील, त्यामुळें पुष्कळ सच्छास्त्रांचा विरोध येईल याकरितां, पुरुष ह्मणजे जीव असाच अर्थ घेणें योग्य आहे. ॥ २१ ॥

उपद्रष्टानुमन्ता च भर्ता भोक्ता महेश्वरः ॥
परमात्मेति चाप्युक्तो देहेऽस्मिन्पुरुषः परः ॥ २२ ॥

ननु जीवस्य शरीरसंबंधे सत्वादिगुणसंगोनिमित्तमात्रं जडत्वेनास्वतंत्रत्वात् स्वतंत्रकारणंतु किमित्यपेक्षायामाह । उपद्रष्टेत्यादि । अनुमंतृत्वे हेतुः सर्वेभ्यः उपरिस्थितोद्रष्टा उपद्रष्टा भर्ता सर्वकारकः भोक्ता सकलकर्मफलसारभुक् महेश्वरोऽचिंत्यशक्तिः परमात्मा सर्वचेतनेभ्यउत्तमः इतिहेतोरनुमंता सपरः पुरुषः अस्मिन्सर्वस्मिन्देहे स्थित्वा नियमयतीति क्षेत्रज्ञंचापिमां विद्धीत्युक्तः तेनाहमेवानुमंतेति दर्शयति । उक्तंच । सर्वेभ्यउपरिद्रष्टा यउपद्रष्टृनामकः । स्वातंत्र्यात्स्वानुकूल्येन मर्त्यं प्रेरयति स्म यत् । अनुमंतेति कथितः स्वयं प्रभुरजोहरिः । महाशक्तियुतोविष्णुर्महेश्वरइतीरितः । परमत्वात्तु तस्यैव ह्यनुमंतृत्वमुच्यते सएव सर्व देहेषु देहिनोन्योव्यवस्थितइति । एतेन यतश्चयदिति प्रतिज्ञातं चोपपादितं भवति ॥ २२ ॥

जीवास शरीरसंबंध आणि सुखदुःखादि प्राप्त होण्यास सत्वादि गुणांचा संग हें निमित्तमात्र आहे. कारण, तो (सत्वादि गुणसंबंध) जड असल्या-मुळें अस्वतंत्र आहे. ह्मणून जीवास सुखदुःख देणारा स्वतंत्र कोण तें सांग-तात—सर्वांहून श्रेष्ठ असून पहाणारा, सर्वांचें धारण करणारा, सर्वसारभोक्ता, अचिंत्य ऐश्वर्यानें युक्त, सर्व जीवजडादिकांपेक्षां श्रेष्ठ; जीवांपासून भिन्न असून, षड्गुणैश्वर्यसंपन्न असा परमात्मा या देहांत एकंदर जीवांपेक्षां अधिक द्रष्टृत्वादि विशेषणांनीयुक्त असल्यामुळें संशयरहित बुद्धियुक्त तो परमात्मा स्वतंत्र आहे; तोच सर्व जीवांनां सत्वादिगुणनिमित्त करून त्यांच्या त्यांच्या योग्यतेप्रमाणें सुखदुःख देतो, हें तात्पर्य होय. ॥ २२ ॥

य एवं वेत्ति पुरुषं प्रकृतिं च गुणैः सह ॥
सर्वथा वर्तमानोऽपि न स भूयोऽभिजायते ॥ २३ ॥

प्रकृतिं पुरुषंचैवेत्याद्युक्तार्थेबुभुत्सातिशयोत्पादनाय तज्ज्ञानफल-माह । य एवमिति । एवं द्विविधं पुरुषं द्विविधां च प्रकृतिं तद्गुणैः सह सम्यक् ज्ञात्वा पश्यति सप्रमादादन्यायेन वर्तमानोपि नियतमोक्ष इत्यर्थः ॥ २३ ॥

“ प्रकृतिं पुरुषंचैव ” या श्लोकाचा अर्थ योग्य रीतीनें समजावा अशी इच्छा अधिकाऱ्यास उत्पन्न व्हावी ह्मणून, त्यापासून (प्राप्त) होणाऱ्या ज्ञानाचें फळ सांगतातः—जो मनुष्य स्वतंत्र अशा परमात्म्याला किंवा अस्वतंत्र अशा जीवरूप पुरुषाला, त्याचप्रमाणें चित्प्रकृति महालक्ष्मी, किंवा जडप्रकृति-रूप प्रकृतीला, त्यांस त्यांच्या पूर्वोक्त गुणांप्रमाणें जाणतो, तो प्रमादामुळें विधिनिषेधाकडे लक्ष न देतां अन्यायमार्गानें वागला तरी, निश्चयानें, भग-वंताचें अपरोक्षज्ञान संपादन करून वैकुंठास जातो. ॥ २३ ॥

ध्यानेनात्मनि पश्यन्ति केचिदात्मानमात्मना ॥
अन्ये सांख्येन योगेन कर्मयोगेन चापरे ॥ २४ ॥

परमपुरुषादिदर्शने किं साधनमित्यतआह । ध्यानेनेति । केचिदात्मना बुद्ध्यात्मनि हृदये आत्मानं परमात्मानं ध्यानेन पश्यंति

अन्ये सांख्येन योगेन वेदोक्तभगवत्स्वरूपज्ञानेन ज्ञात्वा पश्यंति अपरे कर्मयोगेन श्रुत्वा ज्ञात्वा पश्यंति तेपि च श्रवणनिरताः मृत्युमतितरंत्येव अन्यइत्याद्यशक्तानमप्युपायदर्शनार्थमवस्थाभेदमाश्रित्योक्तम् । उक्तंच । कर्मकृच्चापि तं श्रुत्वा ज्ञात्वा ध्यात्वा नुपश्यति । श्रावकोपि तथा ज्ञात्वा ध्यात्वा ज्ञान्यपि पश्यतीति । यद्वा केचिदृषयोध्यानेनात्मनि पश्यंति केचिन्नारदादयोबहिरपि पश्यंति अन्ये देवाः सांख्येन योगेन स्वप्रतिभानुसारेण तारतम्येन पश्यंति अपरे राजानः कर्मयोगेन यजंतोयज्ञभागार्थमागतं श्रवणप्रतिभाभ्यां विष्णुं स्मरंतः पश्यंति । उक्तंच । ऋषयः केचिदृषयोन्नारदाद्याबहिस्त्वपि । देवा विष्णुप्रसादेन लब्धसत्प्रतिभाबलात् । सर्वं क्रमेण विज्ञाय प्रतिभास्पष्टताक्रमात् । पश्यंति बहिरंतश्च विष्णुंध्यानमृतेपि तु । येषां ध्यानमृतेदृष्टिस्तेषांध्यानेपि दर्शनम् । स्यादेव सांख्ययोगास्तेदेवा ब्रह्माधिकोत्र च । केचित्तुक्षत्रियवरा अश्वमेधादिकर्मभिः । यजंतोभक्तिमंतश्च यज्ञभागार्थमागतम् । श्रवणप्रतिभाभ्यां च स्मरंतः पुरुषोत्तमम् । पश्यंत्यन्ये तथान्येभ्यः सर्वं श्रुत्वानुमन्य च । उपास्यैवतु पश्यंति नान्यथातु कथंचन २४

यापुढें परमपुरुषाचें दर्शन होण्यास साधन कोणतें तें सांगतातः— कित्येक लोक आपल्या हृदयांत मनानें परमात्म्याचें ध्यान करून, त्याला पहातात. कित्येक वेदांत सांगितलेल्या ज्ञानानें ध्यान करून त्याला पहातात; कित्येक कर्मयोगानें किंवा श्रवणानें किंवा ध्यान करून त्याला पहातात. तेही श्रवणांतच निरत होऊन, संसाररूप मृत्यूपासून मुक्त होतात. कित्येक ऋषि, ध्यान करून, जीव बिंबरूपानें परमात्म्यास जाणतात; कित्येक नारदादिक प्रतिमादि बहिस्थळांत प्रतिमेच्या अंतर्यामीं आहे असें समजतात. कित्येक देव, सांख्ययोगानें आपापल्या ज्ञानाप्रमाणें—तारतम्यानें त्या परमात्म्यास पहातात; कित्येक राजे, कर्मयोगाचें (यज्ञयागादिक) आचरण करून, यज्ञभागाचा स्वीकार करून भक्तजनांस धन्य करण्यास प्रकट झालेल्या भगवद्रूपाचें माहात्म्य ऐकून त्या परमात्म्याला पहातात. ज्यांना ध्यानावांचून ज्ञान प्राप्त होतें, त्यांनीं ध्यान केलें असतां भगवंताचें अपरोक्ष दर्शन होतें. कृष्णार्पणबुद्धीनें केलेल्या अश्वमेधादि यज्ञानें, ज्ञान प्राप्त होऊन त्यानें कित्येक क्षत्रीयही

मुक्त होतात. तात्पर्य कोणत्याही रीतीनें भगवंताची उपासना केली असतां मुक्ति प्राप्त झाल्याशिवाय रहात नाहीं. ॥ २४ ॥

अन्ये त्वेवमजानन्तः श्रुत्वान्येभ्य उपासते ॥
तेऽपि चातितरन्त्येव मृत्युं श्रुतिपरायणाः ॥ २५ ॥

अन्ये मनुष्याः अल्पमतिभानत्वादन्येभ्यः श्रुत्वोपासतइत्यादि व्याख्येयं अन्येषां किंचिच्छ्रवणे विद्यमानेऽपि मनुष्याणामेवाल्पप्रतिभानत्वाच्छ्रुत्वान्येभ्यइति विशेषणं मनुष्याणां प्रतिभामूलप्रमाणापेक्षा प्रायोनसम्यगुत्पद्यतइत्यतउक्तम् । तेच श्रुतिपरायणाइति । तदुक्तम् । ऋषीन् राज्ञस्तथारभ्य प्रतिभाभ्यधिका क्रमात् । यावद्ब्रह्मा ब्रह्मणस्तु प्रायोनाप्रतिभासितम् । विष्णोः प्रीत्यर्थमेवास्य श्रोतव्यं प्रायशोभवेत् । अन्येषां श्रवणाज्ज्ञानं क्रमशोमानुषोत्तरं । अत्यल्पप्रतिभानत्वान्मानुषाः श्रुतवेदिनः । सर्वे ते दर्शनात्तस्मात्स्वयोग्यान्मुक्तिगामिनः । अश्रुता प्रतिभा यस्य श्रुतिस्मृत्यविरोधिनी । विश्रुतानृषु जातं च तं विद्याद्देवसत्तममिति ॥ २५ ॥

याप्रमाणें केवळ श्रवणेंकरून परमात्म्याचें स्वरूप न जाणणारे, श्रवणादिक न करणारे, सत्कर्म करणारे, असे जे पुरुष सद्गुरूंच्या मुखानें भगवंताचें चरित्रामृत श्रवण करितात, ते श्रवणपरायण होऊन नंतर मनन आणि ध्यान करून परमात्म्याला प्रत्यक्ष पाहून, मरणादि दुःखापासून मुक्त होतात. कित्येक ऋषिजन ध्यानानें किंवा बुद्धीनें आपल्या हृदयांत जीवांतर्यामीं असणाऱ्या परमात्म्यास पहातात. सद्गुरूंच्या मुखानें भगवद्गुण श्रवण करून, उपासना करणें हें मनुष्यांसच आहे. कारण, मनुष्य हा अल्पज्ञानी आहे. याप्रमाणें चतुर्मुख ब्रह्मदेवापर्यंत सर्व जीवगण आपापल्या योग्यतेप्रमाणें, श्रवणादि साधनानीं परमात्म्यास पहातात. ब्रह्मदेव हा सर्व जीवगणांत श्रेष्ठ, मोठा विष्णुभक्त (वैष्णव) आहे. ह्मणून बहुधा त्यास अज्ञान नाहींच; तथापि, तोही भगवत्प्रीत्यर्थ श्रवणादिक करितोच. त्याशिवाय जे रुद्रादिक त्यांस श्रवणमननादिक केल्यानें अधिक ज्ञान प्राप्त होतें, असें समजावें.॥२५॥

यावत्सञ्जायते किंचित्सत्त्वं स्थावरजङ्गमम् ॥
क्षेत्रक्षेत्रज्ञसंयोगात्तद्विद्धि भरतर्षभ ॥ २६ ॥

पुनश्च साम्यादिधर्मयुक्तं प्रकृत्यादिरूपमाह । यावदित्यादिना । यावत्स्थावरजंगमात्मकं सत्वं जीवजातं संजायते तत् क्षेत्रक्षेत्रज्ञयोश्चित्प्रकृतिपरमात्मनोः संयोगात् जायते प्रादुर्भवतीति विद्धि । सत्वं जीवः कचित्प्रोक्तः कचित्सत्वं जनार्दनः । सत्वं नाम गुणः कापि कचित्साधुत्वमुच्यत इत्यभिधानात जीववाची सत्वशब्दः ॥ २६ ॥

पुनः साम्यादिधर्मयुक्त प्रकृत्यादिकांचें स्वरूप सांगतातः—हे भरतकुलश्रेष्ठा अर्जुना, स्थावरजंगमात्मक जो जीवसमुदाय उत्पन्न होतो, तो चित्प्रकृति महालक्ष्मी व परमात्मा श्रीहरी या उभयतांच्या संबंधानें उत्पन्न होतो, असें समज. " सत्व " शब्दाचे अर्थ अनेक आहेत, सत्व ह्मणजे जीव, जनार्दन, आणि सत्व नामक (तीन गुणांतला) एक गुण; सत्व ह्मणजे साधुत्व; येथें (या श्लोकांत) सत्व याचा अर्थ जीव असाच घेतला पाहिजे, नाहीं तर पूर्वापर विरोध येतो; आणि देहप्राप्ति ही (जीवाशिवाय) दुसऱ्यास संभवत नाहीं. ॥ २६ ॥

समं सर्वेषु भूतेषु तिष्ठन्तं परमेश्वरम् ॥
विनश्यत्स्वविनश्यन्तं यः पश्यति स पश्यति ॥ २७ ॥

परमेश्वरस्य सर्वशरीरस्थत्वमुक्तं तत्राधिष्ठानतारतम्यात्तस्य तारतम्यं दुःखिसहावस्थानात् दुःखं च स्यादित्यत आह । सममिति । सर्वेषु विलक्षणेषु दुःखसंयोगादिरूपेण विनश्यत्सु भूतेषु जीवेषु स्थितं समं तारतम्यरहितं अविनश्यंतं दुःखसंयोगादिरहितं परमेश्वरं यः पश्यति । सएव पश्यति ज्ञानीत्यर्थः ॥ २७ ॥

कारण परमात्मा सर्व प्राण्याचे अंतर्यामी रहातो असें ह्मटलें तर, जीव हे परस्परभिन्न व तारतम्यानें श्रेष्ठ कनिष्ठ असे असल्यामुळें, त्यांच्या अंतर्यामी रहाणाऱ्या भगवत्स्वरूपालाही भेद व तारतम्य हीं असलीं पाहिजेत; व दुःख भोगणाऱ्या जीवगणांसह देहांत असलेल्या त्या परमात्म्याचे रूपासही दुःख आहे कीं काय ? अशी शंका येईल तिचा परिहार करितातः—सर्व जीवांत प्रेरकत्वानें असलेलीं परमात्म्याचीं रूपें आनंदादि गुणांनीं सम आहेत, आणि दुःखयुक्त व देह नाशवंत अशा जीवांत प्रेरकत्वानें तो परमात्मा असला तरी, त्यास देहनाश आणि दुःखप्राप्ति हीं नाहींत, असें जो मनुष्य जाणतो,

त्यासच परमात्मस्वरूप आणि जीवस्वरूप जाणणारा ज्ञानी, असें ह्मणावें. यावर अशी शंका येते कीं, जीव आणि परमात्मा हे एकाच अधिष्ठानांत (ठिकाणांत) असतात ह्मणून ज्याप्रमाणें जीवास देहनाश आणि दुःखप्राप्ति होते, त्याप्रमाणें परमात्म्यासही होणें योग्य आहे. ज्याप्रमाणें एकाच घरांत दोन मनुष्यें असतां, तें घर आग लागून जळून गेलें तर त्या दोघांपैकीं एक जळून गेला व एक जिवंत राहिला हें असंभवनीय होय, त्याचप्रमाणें, परमात्मा आणि जीव हे एकाच देहांत असून, परमात्म्याला नाश नाहीं व तो नित्य सुखी असतो; आणि जीवाला देहाचा नाश व दुःख होतें, हें ह्मणणें कसें संभवतें? या शंकेचें समाधान असें आहे कीं, एकाच घरांत दोन मनुष्यें असतां तें घर जळालें, तरी ज्याला अग्निस्तंभनशक्ति आहे तो जळणार नाहीं; व ज्याला ती शक्ति नाहीं तो मात्र जळेल. त्याप्रमाणें या ठिकाणीं परमात्मा हा सर्वज्ञ, सर्वशक्ति, स्वतंत्रतादि अखिल गुणांनींयुक्त आहे ह्मणून, त्याला दुःख देणारी किंवा त्याचा नाश करणारी अशी कोणती वस्तु आहे? जीव हा अल्पज्ञ, अल्पशक्ति, अस्वतंत्र असा आहे ह्मणून, आपल्या योग्यतेप्रमाणें परमात्मा जशी प्रेरणा करील तसें, सुखदुःखादिक तें भोगतो आणि लौकिकांतही आपल्या अपराधाचें नियमित दुःख भोगण्यास कारागृहांत पडणारे अनेक जीव असून त्यांचें नियमन करणारा, (नियंता) आपल्या अंगच्या विद्यादि कौशल्यानें ज्याला अधिकार (राजाकडून) प्राप्त झाला आहे, असा एक पुरुष त्याच कारागृहांत असतो; ते दोघेही (कैदी आणि नियंता अधिकारी) एकाच ठिकाणीं (कारागृहांत) रहातात ह्मणून तो अधिकारी पुरुषही, त्या बंदीवानाप्रमाणेंच दुःखी आहे असें समजतात काय? नाहीं, अशा अनेक उदाहरणांनीं, परमात्मा हा दुःखादि कलंकरहित आणि जीव हे दुःखी, बद्ध, अवर इत्यादि सर्व दोषांनीं युक्त असल्याचें उघड प्रत्यक्षानुमानागमांत दिसत असल्यामुळें, त्या परमात्म्याला व जीवाला समानत्व आहे असें सांगून कोणता अज्ञानी त्या ईश्वरास कलंक लावूं शकेल? ॥ २७ ॥

समं पश्यन्हि सर्वत्र समवस्थितमीश्वरम् ॥
न हिनस्त्यात्मनात्मानं ततो याति परां गतिम् ॥ २८ ॥

तत्र ज्ञानफलमाह । सममिति । सर्वजीवेष्ववस्थितं सर्वगुणैः

समं अचिंत्यशक्तिं भगवंतं पश्यन्नात्मना बुद्ध्या स्वात्मानं न हिनस्ति नरके न पातयति ततोऽज्ञानात्परां गतिं मुक्तिं याति। उक्तंच। दुःखयोगादिरूपेण जीवेषु विनशत्स्वपि । दुःखयोगादिरहितः सर्वजीवेष्ववस्थितः। गुणैः सर्वैः समोनित्यं न हीनो हीनगोपिसन्। इतिपश्यति योविष्णुं सएव न तमोव्रजेदिति। जीवानां नाशलक्षणं तु द्वितीयाध्यायउक्तं ॥ २८ ॥

याप्रमाणें परमात्म्याचें स्वरूप जाणलें असतां काय फळ मिळतें तें सांगतात:-सर्व प्राणिमात्रांचे ठिकाणीं नियामकरूपानें असणारीं परत्म्याचीं स्वरूपें, ज्यांना अचिंत्यशक्तीनें दोषादिक नाहींत अशीं, सद्गुणांनीं पूर्ण, ज्यांच्या रूपांत थोडाही भेद नाहीं अशीं समजतो, तो पुरुष आपल्या बुद्धीनेंच आपल्यास नरकांत पाडून घेत नाहीं; (आपला नाश करीत नाहीं.) आणि परमात्म्यास सर्वोत्तमत्व व त्याचे जे रामकृष्णादि अवतार किंवा जीवप्रेरक, परमात्म्याचीं सर्व रूपें अचिंत्यशक्तीनेंयुक्त व परमात्म्यासारखीं आहेत असें समजतो तो, श्रेष्ठगति असा जो वैकुंठ त्या वैकुंठांत जाऊन नित्य सुखी असा परमात्म्याचा सेवक होतो. ॥ २८ ॥

प्रकृत्यैव च कर्माणि क्रियमाणानि सर्वशः॥
यः पश्यति तथात्मानमकर्तारं स पश्यति ॥ २९ ॥

उपद्रष्टेत्यनेन परमात्मनः स्वातंत्र्यमुक्तं तज्ज्ञानफलमाह। प्रकृत्येति। च शब्दानुकृष्टेन प्रकृतेन परमात्मना कर्ताप्रकृत्या च निमित्तभूतया क्रियमाणानि सर्वाणि कर्माणि स्वात्मानमकर्तारं यः पश्यति सः परमेश्वरं पश्यतीत्यर्थः । अथवेश्वरः कर्मानपेक्षएव सदसद्योनिजन्मसु कारणं चेत्तर्हि तस्य वैषम्यादिकं स्यात् कर्मापेक्षत्वे च स्वातंत्र्यं न स्यात् तथा तस्यापि कर्तृमद्भावाच्चास्वातंत्र्यमित्यत आह। प्रकृत्येति। प्रकृत्या प्रारभ्य स्वयमेव कर्मादिकं प्रबोध्य प्रकृतेनेश्वरेण क्रियमाणानि कर्माणि तथात्मानं परमेश्वरमकर्तारं कर्तृरहितं यः पश्यति सपश्यति कर्तृराहित्यात्स्वातंत्र्यं पूर्वकर्मापेक्षया कर्तृत्वेनावैषम्यादिकं वेदा प्रामाण्यानापादकत्वाच्च सदप्येतादृशं वैषम्यादिकमदोषः। उक्तंच। न विष्णोर्विषमत्वं तु योग्यतापेक्षया

क्वचित् । योग्यतायास्तन्नियत्याविषमत्वंभवेत्तवेति । वैषम्यंचैव नैर्घृण्यं वेदाप्रामाण्यकारणम् । नांगीकार्यमतोऽन्यत्तु न वैषम्यादिनामकमिति २९

" उपद्रष्टाऽनुमंताच " या श्लोकानें पूर्वीं सांगितलेलें परमात्म्याच्या स्वातंत्र्याचें ज्ञान झालें असतां काय फळ मिळतें तें सांगतातः–परमात्माच प्रकृतिद्वारां आपल्या प्राक्तनकर्माप्रमाणें सगळीं कर्मं करवितो, असें जो मनुष्य समजतो तोच सदसद्विचार पहाणारा ज्ञानी समजावा; अथवा प्रकृतिद्वारां सर्व जीवांस परमात्माच सुखदुःखादि देतो त्या परमात्म्यास सुखदुःख देणारा किंवा त्याला उत्पन्न करणारा अथवा त्याचा नाश करणारा कोणीही नाहीं, असें जो जाणतो, तोच ज्ञानी होय; अथवा सर्व जीवांना ज्यांचें त्यांचें कर्म पाहून ईश्वर त्यांनां सुखदुःखादि देत नसून स्वेच्छेनें (आपल्या मर्जीप्रमाणें) वाटेल ती–भलतीच–शिक्षा देतो, असें ह्मटलें तर, कित्येकांस सुखी आणि कित्येकांस दुःखी केल्यानें तो परमात्मा विषम स्वभावाचा व निर्दय असा ठरतो; आणि तो जीवांचें बरेंवाईट कर्म पाहून त्याप्रमाणें त्यानां फळ देतो, असें ह्मटलें, तर तो स्वतंत्र कसा ? या प्रकारचे हे वेदप्रतिपादित भगवद्गुणाच्या विरुद्ध आक्षेप मनांत आणीत नसून, आपल्या अनादि कर्माप्रमाणें ईश्वर फळ देतो, असा वेदांचा निश्चयपूर्वक अर्थ समजून, त्या परमात्म्याला वैषम्य व निर्दयपणा इत्यादि वेदास अप्रामाण्यकारक दोष, जो लावित नाहीं, तोच सदसद्विवेक पहाणारा ज्ञानी होय, असें समजावें. ॥ २९ ॥

यदा भूतपृथग्भावमेकस्थमनुपश्यति ॥
तत एव च विस्तारं ब्रह्म संपद्यते तदा ॥ ३० ॥

न केवलं भगवतः सर्वप्रेरकत्वादिज्ञानमात्रेणालं किंतु तस्य सर्वाधारत्वाद्यपि ज्ञातव्यमित्याह । यदेति । यदा भूतानां पृथग्भावं पृथग्भूतानीति यावत् एकस्थं एकस्मिन्नेव विष्णौ स्थितं ततएव विष्णोर्विश्वस्य विस्तारमुत्पत्तिं पश्यति तदा ब्रह्म संपद्यते प्राप्नोति । उक्तंच । एकविष्ण्वाश्रयाणांच जीवानां भेदमेव यः । ततः परस्परं चैव तारतम्येन पश्यति । विष्णोरेव च विस्तारं जगतः सविमुच्यतइति ३०

परंतु परमात्मा सर्व प्रेरक व दुःखरहित इतकेंच केवळ जाणून भागत नाहीं, तर, तो ईश्वर सर्वांचें धारण करणारा इत्यादि अनेक गुणांनीं युक्त आहे

असेंही समजलें पाहिजे. ह्मणून सांगतात:—जरी आपापल्या योग्यतेप्रमाणें भिन्न भिन्न असे तारतम्यानें श्रेष्ठ कनिष्ठ असलेले अनेक जीवांचे समुदाय हे, विश्वव्यापी जो एक विष्णूच, त्याच्या आश्रयानें आहेत व त्या सर्वांला आधार असणाऱ्या विष्णूच्याच सत्तेनें या जगाचा अनेक प्रकारांनीं विस्तार उत्पन्न होतो, असें जाणतो, तो अनंतगुणपरिपूर्ण असा जो विष्णू, त्याच्या लोकाची ह्मणजे वैकुंठाची प्राप्ति करून घेतो. ॥ ३० ॥

अनादित्वान्निर्गुणत्वात्परमात्मायमव्ययः ॥
शरीरस्थोऽपि कौन्तेय न करोति न लिप्यते ॥ ३१ ॥

नच शरीरसंबंधेन विष्णोर्व्ययादिरित्याह । अनादित्वादिति । यद्यपि भावरूपं तत्सादिगुणात्मकं च अतादृशत्वादव्ययः परमात्मा लौकिकक्रियादिराहित्यान्नकरोति न लिप्यते यद्वा परमात्मनः सर्वचिदात्मकत्वात्कथं भूतानां ततः पृथग्भावइत्यतआह । अनादित्वादिति । शरीरगत दुःखादिभोगलक्षणादभिमानाच्छरीरस्थोजीवः शरीरतोऽप्युत्पत्तिराहित्यात्सर्वात्मना त्रिगुणसंबंधाभावाच्छरीरतोऽपि व्ययाभावाच्चायं परमात्मा शरीरस्थोजीवो न भवति किमुत जडं न भवतीत्यपि शब्दार्थः किंच परमात्मा सर्वं करोति न लिप्यते जीवस्तु न करोति लिप्यतएवेत्यर्थः । उक्तंच । शरीरस्थस्तु संसारी शरीराभिमतेर्मतः । विष्णुःशरीरगोऽप्येष न शरीरस्थउच्यते । शरीराभिमतिर्यस्मान्नैवास्यास्ति कदाचन । तद्भावानां तु दुःखानां भोगोऽभिमतिरुच्यते । तदभावान्नाभिमानी भगवान्पुरुषोत्तमः कुर्वाणोपि यतः सर्वं पुण्यपापैर्न लिप्यते । जन्ममृत्यादिरहितः सत्वादिगुणवर्जितः। विष्णुस्तद्विपरीतस्तु जीवोऽन्तस्थोऽपृथक्सदेति ॥ ३१ ॥

आतां परमात्म्याच्या शरीरादिकास नाश नाहीं, असें सांगतात:—हे **अर्जुना**, परमात्म्याला उत्पत्ति नाहीं आणि त्याला सत्वादिगुणांचा संबंध नाहीं, असा असल्यामुळें तो या जीवशरीरांत असला तरी, त्याला नाश नाहीं. तो लौकिकक्रियादिकांनीं रहित असल्यामुळें, पुण्य आणि पाप यांचा संबंधही त्यास नाहीं. यावरून, त्यास शरीराभिमानी, सुखदुःख भोगणारा जीव, असें ह्मणतां येत नाहीं. तो नित्य, ज्ञानी असल्यामुळें, ज्ञानादिक क्रिया ज्यास

नाहींत असा जडही नाहीं. त्यानें सृष्टी वगैरे कर्में केलीं तरी, त्या (कर्मा) च्या फळाची त्याला इच्छा नसल्यामुळें, त्या कर्मांनीं तो लिप्त (बद्ध) होत नाहीं. जीव हा, कर्मफळाची इच्छा करणारा व शरीराचा अभिमान धरणारा असल्यामुळें, तो पुण्यपापांनीं बद्ध होतो. याप्रमाणें अनेक कारणांनीं जीव आणि परमात्मा हे नित्य भिन्न आहेत. जीव हे (त्यांच्या) अनादि योग्यतेनें श्रेष्ठ कनिष्ठ असल्यामुळें परस्पर नित्य निराळे आहेत. जड हें, सदोदित ज्ञानरहित असल्यामुळें तें ईश्वर आणि जीव यांपासून निरंतर भिन्न आहे. तें भगवंताच्या इच्छेप्रमाणें परमाणुरूपांनीं अथवा पर्वतादिरूपांनीं अनेक भेदांनी निरंतर युक्त असतें; याप्रमाणें वेदादिकांत उघड (सांगितलें) असल्यानें सर्व ऐक्यतारूप संकर जाणणें हें ज्ञानिजनांस शोभणार नाहीं. ॥ ३१ ॥

यथा सर्वगतं सौक्ष्म्यादाकाशं नोपलिप्यते ॥
सर्वत्रावस्थितो देहे तथात्मा नोपलिप्यते ॥ ३२ ॥

परमात्मनो लेपाभावं दृष्टांतेनोपपादयति । यथेति । सर्वगतं पंकादि सर्वपदार्थेषु स्थितमाकाशं सौक्ष्म्यादसंगत्वान्नोपलिप्यते । तथा सर्वत्र नीचोच्चदेहेऽवस्थित आत्मा परमात्मा देहधर्मैर्न लिप्यते ३२

परमात्मा हा पुण्यपापादिकांनीं लिप्त होत नाहीं, हें ह्मणणें दृष्टांतानें दृढ करितातः-ज्याप्रमाणें सर्वव्यापि आकाश सूक्ष्मरूपानें असंग असल्यामुळें, पंकादि अनेक वाईट पदार्थांतही (दिसत) असलें तरी, त्या पंकादिकांनीं लिप्त होत नाहीं; (त्याला त्या चिखलाचा वगैरे मळ लागत नाहीं) त्याप्रमाणें उत्तम, अधम व मध्यम अशा प्रकारचे देहधारण करणाऱ्या जीवांत प्रेरकरूपानें सर्वत्र असणारा परमात्मा, असंग (संगरहित) असल्यामुळें, त्या जीवांच्या किंवा देहांच्या पुण्यपापादिकांच्या संबंधानें तो कधींही लिप्त होत नाहीं. ।३२।

यथा प्रकाशयत्येकः कृत्स्नं लोकमिमं रविः ॥
क्षेत्रं क्षेत्री तथा कृत्स्नं प्रकाशयति भारत ॥ ३३ ॥

यदर्थं क्षेत्रादिस्वरूपं निरूपितं तत्क्षेत्रज्ञस्वरूपं दृष्टांतेन दर्शयति३३

ज्या परमात्म्याचें ज्ञान व्हावें याकरितां, या पंचमहाभूतात्मक क्षेत्राचें वर्णन केलें आहे, त्या क्षेत्रज्ञ-परमात्म्याचें-स्वरूप, दृष्टांतानें सांगतातः-

हे भरतकुलश्रेष्ठा अर्जुना, ज्याप्रमाणें एकटाच सूर्य आपल्या प्रभेनें हा सर्व लोक प्रकाशमान करितो, त्याप्रमाणें क्षेत्रज्ञ नामक परमात्मा या पंचमहाभूतात्मक क्षेत्रांस प्रकाशवंत करितो. सूर्य हा स्वतंत्र नाहीं तसा क्षेत्रज्ञ नामक परमात्माही अस्वतंत्र आहे, असें समजूं नये. मंदमती जनांचे बुद्धीस समजावें ह्मणून, हा दृष्टांत सांगितला आहे. सूर्यांत आणि परमात्म्यांत अनंतपटीनें फरक आहे. ३३

क्षेत्रक्षेत्रज्ञयोरेवमन्तरं ज्ञानचक्षुषा ॥
भूतप्रकृतिमोक्षं च ये विदुर्यान्ति ते परम् ॥ ३४ ॥

इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां प्रकृतिपुरुष निर्देशयोगो नाम त्रयोदशोऽध्यायः ॥ १३ ॥

अध्यायार्थमुपसंहरति । क्षेत्रक्षेत्रज्ञयोरिति । एवमुक्तप्रकारेण क्षेत्रक्षेत्रज्ञयोरंतरं भेदं ज्ञानचक्षुषा विवेकदृष्ट्या ये विदुः तथा भूतेभ्यः पृथिव्यादिभ्यः प्रकृतेश्च मोक्षो येन भूतानां जीवानामचेतनप्रकृतेः सकाशान्मोक्षोयेनेति वा तदमानित्वादिकं ये विदुः ते परं ब्रह्म यांति ३४

इति श्रीमद्भगवद्गीताविवृतौ विद्याधिराजभट्टोपाध्याय विरचितायाम् श्रीमध्वमतानुवर्तिनी व्याख्योपेतायाम् त्रयोदशोऽध्यायः ॥ १३ ॥

या अध्यायांतील अर्थाचा उपसंहार करितातः—हे अर्जुना, पूर्वी सांगितल्याप्रमाणें ज्ञानदृष्टीनें पंचमहाभूतात्मक क्षेत्रांला आणि तदभिमानी जीवांला, त्याप्रमाणेंच त्यांचा प्रेरक जो परमात्मा त्याला, परस्पर भेद आहे असें जे जाणतात—ते पंचमहाभूतांपासून किंवा जड प्रकृतिरूप शरीरबंधापासून जीवाला मुक्त करण्याचीं अमानित्वादि साधनें जे जाणतात—ते या भवबंधापासून मुक्त होतात. ह्मणून तूंही संसारबंधाला कारण असलेला जो अभिमान त्याचा त्याग करून, मला संतोष देणारें व क्षत्रियाला उचित असें युद्धरूप कर्म तें कर; असें तात्पर्य. ॥ ३४ ॥

येथें श्रीमदिन्दिराकान्ततीर्थ श्रीपादविरचित प्राकृत टीकेचा तेरावा अध्याय समाप्त झाला.

अथ चतुर्दशोऽध्यायः

श्री भगवानुवाच ।

परं भूयः प्रवक्ष्यामि ज्ञानानां ज्ञानमुत्तमम् ॥
यज्ज्ञात्वा मुनयः सर्वे परां सिद्धिमितो गताः ॥१॥

श्रीगुरुभ्यो नमः । साधनं प्राधान्येनोत्तरैरध्यायैरुच्यते । तत्र बंधनप्रकारपरिज्ञानएव तन्मोक्षसाधनानुष्ठानं युज्यते बंधश्च त्रिगुणात्मकः अतोयावत्संजायतइत्युक्तविवरणपूर्वकं त्रिगुणविकारस्थितिः तदत्ययोपायश्च अस्मिन्नध्याये प्रदर्श्यते वक्ष्यमाणार्थं प्रतिज्ञाय स्तौति परमितिश्लोकद्वयेन । परं कर्माद्यपेक्षयोत्कृष्टं ज्ञानानां मध्ये उत्तमं ज्ञानं भूयः प्रकर्षेण वक्ष्यामि यज्ज्ञात्वा मुनयः मननशीलाः इतः संसारात् परां सिद्धिं गताः ॥ १ ॥

आतां पुढील अध्यायांत संसारापासून मुक्त होण्याचीं साधनें कोणतीं तीं सांगतातः—प्रथमतः बंध हा त्रिगुणात्मक व “ यावत्संजायते किंचित् ” या श्लोकातील अर्थ विवरणपूर्वक विकारस्थिति आणि त्याच्या नाशाचा उपाय या अध्यायांत दाखवितात. वक्ष्यमाणार्थ प्रतिज्ञा करून, त्याच्या फलाची स्तुति श्रीकृष्ण भगवान् करितातः—हे अर्जुना, सर्व कर्मादिकांहून श्रेष्ठ व ज्ञानांत उत्तम, असें ज्ञान तुला सांगतों; तें ज्ञान समजूनच मनन करणारे अनेक ऋषिसमुदाय संसारबंधनापासून मुक्त होऊन, परम सिद्धिरूप जी मुक्ति त्या मुक्तीस गेले आहेत. असें तें मीं सांगितलेलें उत्तमोत्तम ज्ञान तूं ऐक. १

इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः ॥
सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति च ॥ २ ॥

इदं ज्ञानमवलंब्य मम साधर्म्यं सारूप्यादिलक्षणमाश्रिताः ॥२॥

मी जें आतां ज्ञान सांगणार आहें; त्या ज्ञानाची प्राप्ति झाल्यानें कित्येकांस माझें साधर्म्य ह्मणजे चतुर्भुजरूप व जननमरणराहित्य असे समान धर्म प्राप्त झालेले आहेत, ह्मणूनच ते सृष्टिकाळीं उत्पन्न होत नाहींत

व प्रळयकालींही दुःख पावत नाहींत. तात्पर्य त्यांना पुनः जननमरण हीं नाहींत. ॥ २ ॥

मम योनिर्महद्ब्रह्म तस्मिन्गर्भं दधाम्यहम् ॥
सम्भवः सर्वभूतानां ततो भवति भारत ॥ ३ ॥

प्रतिज्ञातमर्थमाह । ममेति । महद्ब्रह्म चित्प्रकृतिः । महती ब्रह्मणी द्वे तु प्रकृतिश्च महेश्वरः इत्युक्तेः मम योनिर्भार्या । योनिर्भार्या तथा स्थानं योनिः कारणमेवचेत्यभिधानात् तस्मिन्नहं गर्भं दधामि ततः सर्वजीवानां देहसंबंधलक्षणउद्भवोभवति ॥ ३ ॥

प्रतिज्ञात अर्थ सांगतात:–हे भरतकुलोत्पन्ना अर्जुना, चित्प्रकृति अशी जी महालक्ष्मी ती माझी भार्या होय; तिचेठायीं मी गर्भ ठेवितों, आणि त्या गर्भापासून ब्रह्मरुद्रादि जीवगणांची उत्पत्ति होते. ॥ ३ ॥

सर्वयोनिषु कौन्तेय मूर्तयः सम्भवन्ति याः ॥
तासां ब्रह्म महद्योनिरहं बीजप्रदः पिता ॥ ४ ॥

न केवलमादिसर्वएवानयोः कारणत्वं किंतु सर्वदेत्याह । सर्वयोनिषु इति । मनुष्यतिर्यगादिसर्वयोनिषु याः मूर्तयः कार्यव्यक्तापन्नाः संभवंति तासां महद्ब्रह्म लक्ष्मीर्योनिः क्षेत्ररूपं कारणं अहं बीजप्रदः गर्भाधानकर्ता पिता ॥ ४ ॥

केवळ प्रथमोत्पत्तीलाच आम्हीं (मी व लक्ष्मी) कारण नसून, सर्वकाळ जगाची उत्पत्ति होण्याला कारण आहों असें सांगतात:–देव, मनुष्य, तिर्यगादि योनींच्याठायीं जे देह उत्पन्न होतात त्यांस, चित्प्रकृति अशी महालक्ष्मी जगदंबा–माता होय, आणि मीं बीजदाता पिता होय. ॥ ४ ॥

सत्वं रजस्तम इति गुणाः प्रकृतिसम्भवाः ॥
निबध्नंति महाबाहो देहे देहिनमव्ययम् ॥ ५ ॥

गुणत्रयकृतबंधनप्रकारं दर्शयति । सत्त्वमिति । अत्रगुणत्रयाभिमानिन्योलक्ष्म्याद्यास्तिस्रोमूर्तयोजीवंबध्नंतीतिबोद्धव्यं । श्री भू दुर्गा महती तु माया सा लोकसूतिर्जगतोबंधिका चेतिश्रुतेः ॥ ५ ॥

गुणत्रयांनीं केलेल्या बंधनाचा प्रकार सांगतातः—हे महाबाहो अर्जुना, सत्व, रज, तम हे प्रकृतिपासून उत्पन्न झालेले तीन गुण, प्रकृतीचें कार्य जो देह, त्याचेठायीं—त्या देहांत—रहाणाऱ्या नाशरहित अशा जीवाला संसारबंधनानें बांधून टाकितात. या ठिकाणीं जीवास बंधन करणाऱ्या, श्री, भू, आणि दुर्गा, अशा महालक्ष्मीच्या तीन मूर्ति जाणाव्या. ॥ ५ ॥

तत्र सत्त्वं निर्मलत्वात्प्रकाशकमनामयम् ॥
सुखसङ्गेन बध्नाति ज्ञानसङ्गेन चानघ ॥ ६ ॥

सर्वान् बध्नंति सर्वाश्च तथापि तु विशेषतः श्रीर्देवबंधिका नृणां भूर्दैत्यानामथापरेत्युक्त न्यायेन बंधकत्वं क्रमेणाह । तत्रेत्यादिना । तत्र तेषु गुणेषु मध्ये स्वच्छत्वात्प्रकाशकं निरुपद्रवं सत्त्वं सुखज्ञानशक्तिजननेन देवान् बध्नाति ॥ ६ ॥

वर सांगितलेल्या लक्ष्मीच्या तीन्ही मूर्ति, सर्व प्राण्यांस बंधन करितात, परंतु बहुतकरून श्रीदेवी ही देवांस, भूदेवी मनुष्यांस आणि दुर्गादेवी दैत्यांस बंधन करितात, ह्मणून समजावें. हे निष्पापा अर्जुना, या सत्वादि गुणामध्यें. सत्वगुण हा निर्मळ असून तो शुद्ध स्फटिकाप्रमाणें ज्ञानाचा प्रकाशक आहे; आणि तो निरुपद्रवी व शांतही आहे. सत्वगुणाभिमानिनी श्रीदेवी, सत्वगुण कार्यभूत ज्ञानशक्तीनें व सुखशक्तीनें देवांस बद्ध करिते. ॥ ६ ॥

रजो रागात्मकं विद्धि तृष्णासङ्गसमुद्भवम् ॥
तन्निबध्नाति कौन्तेय कर्मसङ्गेन देहिनम् ॥ ७ ॥

अनुरंजनरूपं विद्धि तत्कर्मसंगेन मानुषं बध्नाति ॥ ७ ॥

हे कुंतीपुत्रा अर्जुना, रजोगुण हा अनुरंजन स्वरूपाचा असून अप्राप्त आणि प्राप्त वस्तूंच्या ठिकाणीं प्रीति उत्पन्न करणारा असा आहे. रजोगुणाभिमानिनी भूदेवी ही, देहाभिमानी असा जो मनुष्य त्यास, स्वर्गादि अनित्य फळ देणाऱ्या यज्ञयागादिकांविषयीं आसक्ति उत्पन्न करिते. ॥ ७ ॥

तमस्त्वज्ञानजं विद्धि मोहनं सर्वदेहिनाम् ॥
प्रमादालस्यनिद्राभिस्तन्निबध्नाति भारत ॥ ८ ॥

अज्ञानं जायते यतस्तदज्ञानजं तमोमोहनं विद्धि तत्प्रमादादिभिरसुरं बध्नाति ॥ ८ ॥

हे भारता, तमोगुण हा, अज्ञानोत्पत्तीस कारण असून, तो सर्व प्राण्यांस मोह उत्पन्न करणारा आहे असें समज; तमोगुणाभिमानिनी दुर्गादेवी, त्या तमोगुणकार्यभूत, प्रमाद, निरुद्योग, निद्रादिकांनीं दैत्यांस बंधन करिते, ॥ ८ ॥

सत्वं सुखे सञ्जयति रजः कर्मणि भारत ॥
ज्ञानमावृत्य तु तमः प्रमादे संजयत्युत ॥ ९ ॥

सत्वादीनां बंधकत्वं सुखादिसंगापादनेनैवेति नियमं दृढयति। सत्वमिति। संजयति सुखयुक्तंकरोति ॥ ९ ॥

सत्वादिक गुण हे सुखादिक संपादन करूनच बद्ध करितात, असें निश्चयानें सांगतात. हे भारता अर्जुना, सत्वगुण हा सुखाची आसक्ति उत्पन्न करितो; रजोगुण कर्में करण्याविषयीं प्रवृत्ति करितो; आणि तमोगुण हा ज्ञान झांकून टाकून स्तब्धता (गैरसावधपणा) उत्पन्न करितो, ह्मणजे आळस, झोंप वगैरे गुणांनीं युक्त करितो. ॥ ९ ॥

रजस्तमश्चाभिभूय सत्त्वं भवति भारत ॥
रजः सत्वं तमश्चैव तमः सत्वं रजस्तथा ॥ १० ॥

ननु त्रयाणां गुणानां समत्वात्कथं कदाचित्कस्यचिदेव गुणस्य कार्यं दृश्यत इत्यत आह। रजइति। ईश्वरेच्छया सत्वं कदाचिद्रजःस्तमसी अभिभूय स्वयमुत्कटं भवति कदाचिद्रजः सत्वतमसी अभिभूयोल्बणं भवति तमः सत्वरजसी अभिभूय प्रादुर्भवतीत्यर्थः ॥ १० ॥

हे तीन्ही गुण सारखेच आहेत. कधीं कधीं तर एखाद्या मनुष्यांत एकाच गुणाचीं कार्यें कशीं दिसतात? याविषयीं सांगतात:—त्या त्या जीवाच्या भावी फळाला अनुसरून, भगवंताच्या इच्छेनें कधीं कधीं सत्वगुण हा रज आणि तम या गुणांस जिंकून, आपण बलिष्ठ होऊन सुख आणि ज्ञान याची इच्छा उत्पन्न करितो. कधीं कधीं रजोगुण हा सत्व आणि तम यांस जिंकून

(स्वतः बलिष्ठ होऊन) तृष्णादि कार्यांचे ठिकाणीं प्रवृत्त करितो. कधीं कधीं तमोगुण हा सत्व आणि रजोगुण यांस जिंकून, (स्वतः बलिष्ठ होऊन) प्रमाद व आळस यांचे ठिकाणीं इच्छा उत्पन्न करितो. या सर्वांचा मुख्य कर्ता परमात्मा, व तदनुयायी गुणाभिमानी चित्प्रकृति महालक्ष्मी आणि त्या त्या जीवांचें अदृष्टच कारण होय. ॥ १० ॥

सर्वद्वारेषु देहेऽस्मिन्प्रकाश उपजायते ॥
ज्ञानं यदा तदा विद्याद्विवृद्धं सत्त्वमित्युत ॥ ११ ॥

केन लिंगेन गुणस्य कस्य वृद्धिरनुमेयेत्यपेक्षायामाह । सर्वद्वारेष्वित्यादिना । यदा श्रोत्रादिद्वारेषु शब्दादिज्ञानात्मकः प्रकाशउपजायते उपशब्दात्सुखादि ज्ञायते तदा तत्कारणं सत्वं विवृद्धमिति विद्यात् ॥ ११ ॥

कोणत्या वेळीं कोणत्या गुणाचें श्रेष्ठत्व झालें, हें कसें समजावें तें सांगतात:-हे अर्जुना, ज्या काळीं या देहांत श्रोत्रादिक ज्ञानेंद्रियांस ज्ञानाचा प्रकाश व सुखादिक सद्गुण उत्पन्न होतात, त्या काळीं प्रकाशरूप चिन्ह ज्याचें आहे, असा सत्वगुण बलिष्ठ झाला असें समजावें. ॥ ११ ॥

लोभः प्रवृत्तिरारम्भः कर्मणामशमः स्पृहा ॥
रजस्येतानि जायन्ते विवृद्धे भरतर्षभ ॥ १२ ॥

लोभो धनत्यागेच्छाभावः प्रवृत्तिविषयोद्योगः कर्मणां काम्यानामारंभः अशमचित्तस्यानुपरतिः स्पृहाअप्राप्तेऽभिलाषः एतानि रजसि विवृद्धे जायंते एतैर्लिंगैरजोविवृद्धिं जानीयात् ॥ १२ ॥

भरतकुलश्रेष्ठा अर्जुना, ज्या समयीं लोभ (धनाचा व्यय न करावयाची इच्छा) दुष्ट विषयांच्या ठिकाणीं प्रवृत्ति होणें, काम्यकर्मांचा आरंभ, इंद्रियांचेठायीं चित्त न धांवणें, (स्वस्थ बसणें,) अप्राप्य अशा वस्तूची इच्छा करणें, हीं सर्व चिन्हें झालीं असतां, रजोगुण अभिवृद्ध झाला आहे असें समजावें. ॥ १२ ॥

अप्रकाशोऽप्रवृत्तिश्च प्रमादो मोह एव च ॥
तमस्येतानि जायन्ते विवृद्धे कुरुनन्दन ॥ १३ ॥

अप्रकाशः श्रोत्रादिषु शब्दादिज्ञानाभावः अप्रवृत्तिरनुद्यमः प्रमादोऽनवधानं मोहोविपर्ययः एतानि तमसि वृद्धे जायंते एतैर्लिंगैस्तमोवृद्धिंजानीयात् ॥ १३ ॥

हे कुरुनंदना, श्रोत्रादि इंद्रियांस शब्दादिकांचें ज्ञान न होणें, निरुद्योगीपणा, गैरसावधपणा, सत्य अशा या जगास मिथ्या मानणें, हीं सर्व चिन्हें, तमोगुण अभिवृद्ध झाला असतां होतात. ॥ १३ ॥

यदा सत्वे प्रवृद्धे तु प्रलयं याति देहभृत् ॥
तदोत्तमविदां लोकानमलान्प्रतिपद्यते ॥ १४ ॥

तत्तद्गुणवृद्ध्यवस्थायां मृतानां गतिभेदमाह । यदासत्वइत्यादिना । सत्वे प्रवृद्धे सति यदा यदि देहभृत् प्रलयं मरणं याति तदा तर्हि उत्तमाविदां सर्वोत्तमं विष्णुंजानतां निर्दोषाल्लोकान् देहान् प्रतिपद्यते सात्विकदेहान् प्रविश्य ततोजायते ॥ १४ ॥

प्राण्यास मृत्युसमयीं (अंतकाळीं) कोणत्या गुणांचें आधिक्य झालें असतां कोणत्या लोकाची प्राप्ति होते तें सांगतातः—सत्वगुणाचें आधिक्य झालेलें असतां देहधारी जीवानें देहाचा त्याग केला तर तो परमात्म्याला सर्वोत्तमत्व जाणणाऱ्या उत्तम कुळांत जन्म पावतो ह्मणजे सात्विक देह त्यास प्राप्त होतो. ॥ १४ ॥

रजसि प्रलयं गत्वा कर्मसङ्गिषु जायते ॥
तथा प्रलीनस्तमसि मूढयोनिषु जायते ॥ १५ ॥

रजसि प्रवृद्धे प्रलयं गत्वा फलार्थं कर्म कुर्वतां कुलेषुजायते । तथा तमसि प्रवृद्धेतु प्रलीनोमूढयोनिषु श्वसूकरादिषु जायते ॥ १५ ॥

रजोगुणाची अभिवृद्धि झाली असतां मरण आलें तर तो यज्ञादि कर्मनिष्ठ अशा कुळांत जन्म घेतो; आणि तमोगुणाची अभिवृद्धि झाली असतां मरण आलें तर तो कुत्रा, डुकर वगैरे (तिर्यक् योनींत) जन्म घेतो. ॥ १५ ॥

कर्मणः सुकृतस्याहुः सात्विकं निर्मलं फलम् ॥
रजसस्तु फलं दुःखमज्ञानं तमसः फलम् ॥ १६ ॥

सात्विकादिकर्मणां फलमाह । कर्मणइति । विद्वत्कुलप्रसूतेन सुष्टुकृतस्य कर्मणः सात्विकं निर्मलं दुःखगंधरहितफलमाहुः रजसो-राजसस्य कर्मणोदुःखं दुःखमिश्रसुखमाहुः । दुर्दुःखमिति संप्रोक्तं खं नामसुखमुच्यते इत्यभिधानात् अन्यथा दुःखस्यातिकष्टत्वात्तमोधिकत्वं रजसो न स्यात् तमसस्तामसस्य कर्मणः अज्ञानं अज्ञानतत्कार्यरूपं-फलमाहुः ॥ १६ ॥

सात्विकादि कर्मांचें फळ सांगतात:—सात्विक कुळांत जन्म घेऊन, सात्विक कर्में करून, त्यांपासून उत्पन्न होणारें पुण्य—म्हणजे ज्याला दुःखाचा गंधही नाहीं असें सुख, प्राप्त होतें. असे कपिलादिक जे भगवंताचे अवतार ते सांगतात. कर्मनिरत लोकांत (कुळांत) जन्म घेणारा, राजस कर्में करून ज्यांत दुःख मिसळलेलें आहे, असें फळ प्राप्त करून घेतो. आणि पश्वादिकांच्या योनींत जन्मलेला तामस कर्में करून अज्ञानापासून उत्पन्न होणारें महद्दुःखरूप फळ भोगतो. ॥ १६ ॥

सत्वात्सञ्जायते ज्ञानं रजसो लोभ एव च ॥
प्रमादमोहौ तमसो भवतोऽज्ञानमेव च ॥ १७ ॥

निर्मलादिफलं किमित्यत आह । सत्वादिति । सत्वात् ज्ञानं परमात्मविषयं रजसः लोभः स्वर्गादिविषयासक्तिः तमसः प्रमादमोहौ भवतः अज्ञानं च भवति ॥ १७ ॥

निर्मलादिक फळ कोणतें तें सांगतात:—सत्वगुणापासून, संसारनिवृत्तीला साधन असें जें परमात्मज्ञान तें उत्पन्न होतें. रजोगुणापासून लोभ व स्वर्गादि-लोकांविषयीं इच्छा आणि तमोगुणापासून प्रमाद (गैरसावधपणा) व मोह हे उत्पन्न होतात व त्यापासून अज्ञान उत्पन्न होतें. ॥ १७ ॥

ऊर्ध्वं गच्छन्ति सत्वस्था मध्ये तिष्ठन्ति राजसाः ॥
जघन्यगुणवृत्तिस्था अधो गच्छन्ति तामसाः ॥१८॥

एतत्साक्षात्फलं न ज्ञानादीनां स्वरूपेणाफलत्वात्तेषामपि फल-माह । ऊर्ध्वमिति । सत्वस्थाः सत्वशीलाः ज्ञानेनोर्ध्वं जनादिलोकं

गच्छंति राजसाः काम्यकर्माणो मध्ये स्वर्गादौ तिष्ठंति जघन्योनीचो गुणस्तमस्तस्यवृत्तमज्ञानादि तत्स्थास्तमःशीलाः अधोनिरयं गच्छंति १८

यज्ञादिकांपासून उत्पन्न होणारें फळ सांगतातः—सात्विक (सत्वगुणविशिष्ट) लोक जनोलोकादि ऊर्ध्व (वरच्या) लोकांत जातात; राजस लोक, ज्याला पुनरावृत्ति आहे अशा मध्य—स्वर्गादि लोकांत जातात; कनिष्ठ जो तमोगुण त्याचीं कर्मं आचरणारे, अज्ञानानें युक्त असे तामस लोक तामिस्रादि नरकांत जातात. ॥ १८ ॥

नान्यं गुणेभ्यः कर्तारं यदा द्रष्टानुपश्यति ॥
गुणेभ्यश्च परं वेत्ति मद्भावं सोऽधिगच्छति ॥ १९ ॥

त्रयोगुणाः विविच्योक्तास्तेषां जगद्बंधने हेतुत्वं चोक्तं ततश्च तेषामेव स्वातंत्र्यं न तु ततोऽन्यः स्वतंत्रः कश्चिदिति शंका स्यात्तां निराकरोति । नान्यमिति । द्रष्टा जीवोयदा गुणेभ्यः अन्यं कर्तारं परिणामिनं नानुपश्यति गुणेभ्यश्चापरं स्वतंत्रं परमात्मानं वेत्ति सः मयिभावमधिगच्छति अथवा एतेभ्यः सत्वादिगुणेभ्योऽन्यं कर्तारमीशं यदा पश्यति तदैवायं ना पुरुषः अन्यथा पशुसमः न केवलं कर्तारं विष्णुमन्यत्वेन पश्यन् पुरुषः किंतु गुणेभ्यः परं उत्तमत्वेन च कथं सएव पुमान् यस्मान्मद्भावं सोऽधिगच्छति । उक्तंच । एताभ्योऽन्यं परं चैव विष्णुं ज्ञात्वा विमुच्यते । सामर्थ्यातिशयादासां नैताभ्योविद्यते परम् । इति यावद्विजानाति तावत्तं नृपशुं विदुः । तस्मादेभ्योऽधिकगुणोविष्णुर्ज्ञेयः सदैवचेति ॥ १९ ॥

गुणत्रयांचा विचार सांगून, त्यास जगद्बंधकत्व सांगितलें, तर तेंच (गुणत्रय) स्वतंत्रपणानें जगाला बंधन करितात तर, त्यांवांचून इतर स्वतंत्र कर्ता असा ईश्वर नाहींच, अशी शंका मंदमतीजनांस येईल, तिचें निराकरण करितातः—जेव्हां हा जीव, (द्रष्टा) सत्व, रज, तमोगुणांशिवाय या जगास परिणामी कारण नाहीं असें समजतो व या गुणत्रयापेक्षां श्रेष्ठ असा जो परमात्मा त्यास जाणतो तेव्हां तो माझ्याठिकाणीं भिन्न राहून सायुज्य मुक्तीतें पावतो. अथवा या गुणत्रयांहून दुसरा स्वतंत्र कर्ता ईश्वर आहे ह्मणून

जो जाणतो तो " ना " ह्मणजे पुरुष जाणावा; त्याप्रमाणें हें ज्ञान ज्यास नाहीं तो शृंग नसलेला असा नरपशूच समजावा. केवळ स्वतंत्र कर्ता परमात्मा आहे असें जाणल्यानेंच पुरुष होतो असें नाहीं; तर तो परमात्मा अनंत सद्गुणांनीं मोठा श्रेष्ठ आहे, असेंही समजलें पाहिजे. हेंच ज्ञान सायुज्यमुक्ति मिळण्यास कारण आहे. ॥ १९ ॥

गुणानेतानतीत्य त्रीन्देही देहसमुद्भवान् ॥
जन्ममृत्युजरादुःखैर्विमुक्तोऽमृतमश्नुते ॥ २० ॥

एवं सुखदुःखादिबंधनस्य गुणत्रयनिबंधनत्वात्तदत्यये सत्येव बंधहानिर्नान्यथेत्याह । गुणानिति । देही देहसमुद्भवान् तत्तद्गुण परिणामदेहेषु तथा तथा प्रकाशीभुतान् एतांस्त्रीन् गुणानतीत्य जन्मादिभिः विमुक्तोऽमृतं परं ब्रह्माश्नुते ॥ २० ॥

सुखदुःखें हीं गुणत्रयांपासून उत्पन्न होत असल्यामुळें, त्या गुणत्रयांपासून मुक्त झाल्यावांचून भवबंधनांतून सुटत नाहीं ह्मणून सांगतात:—देहाभिमानी असा जीव या सात्विकादि देहांचेठायीं असणारे जे तिन्ही गुण, त्यांचें अतिक्रमण करून गेला ह्मणजे, गुणत्रयांपासून उत्पन्न होणाऱ्या जन्ममृत्युजरादि दुःखापासून मुक्त होऊन मोक्षास जातो. ॥ २० ॥

अर्जुन उवाच ।

कैर्लिङ्गैस्त्रीन्गुणानेतानतीतो भवति प्रभो ॥
किमाचारः कथं चैतांस्त्रीन्गुणानतिवर्तते ॥ २१ ॥

गुणातीत एवमुच्यते इत्युक्ते गुणातीतः कैर्लिंगैर्युक्तोभवति कीदृशाचारवान् केनोपायेन गुणानत्येतीति पृच्छन्नर्जुनउवाच ॥ २१ ॥

गुणातीतत्व हें कोणत्या साधनांनीं प्राप्त होतें, व तें प्राप्त होण्यास कोणता धर्म आचरावा लागतो आणि कोणता उपाय केला पाहिजे, याप्रमाणें प्रश्न करणारा अर्जुन ह्मणतो—हे भवभंजना, समर्था श्रीकृष्णा, देहाभिमानी असा हा जीव कोणत्या कर्मांनीं या गुणत्रयाचें अतिक्रमण करूं शकेल ? आणि मनुष्यानें गुणातीत व्हावयास कोणत्या धर्माचें आचरण करावें ? व कोणत्या उपायानें गुणत्रयाचें अतिक्रमण करून जातो, तें मला सांग. ॥ २१ ॥

श्रीभगवानुवाच ।

प्रकाशं च प्रवृत्तिं च मोहमेव च पाण्डव ॥
न द्वेष्टि संप्रवृत्तानि न निवृत्तानि कांक्षति ॥ २२ ॥

कैरिति जानताप्यर्जुनेन विशेषजिज्ञासया पृष्टं लक्षणादिकम् । भगवानुवाच । प्रकाशमित्यादिना । प्रकाशं ज्ञानं प्रवृत्तिमुद्योगं मोहमज्ञानं सत्वादिकार्याणि प्रकाशादीनि स्वयं प्राप्तानि दुःखबुद्ध्या न द्वेष्टि निवृत्तानि च सुखबुद्ध्या न कांक्षतीत्यर्थः । अत्रायं विभागः सत्वादयोगुणाः द्विविधाः स्थूलाः सूक्ष्माश्च तत्र स्थूलेभ्यो लौकिकाः प्रकाशप्रवृत्तिमोहाः जायंते सूक्ष्मेभ्यस्तु परमात्मविषयाः तत्राद्येषु गुणातीतस्य द्वेषाकांक्षे प्रायो नस्तः नतु सर्वथा प्रारब्धवशात् कदाचित्संभवतः द्वितीयेषु कांक्षादिकंविद्यतएवेति । तथा च श्रुतिः रजस्तमः सत्वगुणान् प्रवृत्तान् प्रायोनचद्वेष्टि नचापि कांक्षेत् तथापि सूक्ष्मं सत्वगुणंच कांक्षेत् यदि प्रविष्टं सुतमश्च जह्यादिति । अथवा पुरुषान्तरे स्थितं प्रकाशादि साधु न द्वेष्टि तत्र मोहादि साधुनेच्छतीत्यर्थः २२

सर्व उपाय जाणणारा **अर्जुन** जरी आहे तरी विशेष ज्ञान प्राप्त व्हावें ह्मणून प्रश्न केला असतां भगवान् **श्रीकृष्ण** गुणातीताचीं लक्षणें सांगतातः— हे पंडुपुत्रा **अर्जुना**, जो अधिकारी सत्वगुण कार्यज्ञान आणि रजोगुणकार्यविषयसेवा, त्याचप्रमाणें तमोगुणकार्य अज्ञान हीं स्वयं आपण प्राप्त झालीं असतां हीं दुःखसाधनें आहेत अशा बुद्धीनें त्यांचा द्वेष करीत नाहीं व सुखसाधनाची इच्छा करीत नाहीं. ' सत्वादिगुण दोन प्रकारचे आहेत; एक स्थूल आणि दुसरा सूक्ष्म; स्थूल गुणापासून लौकिक—प्रकाश—प्रवृत्ति, मोह हे उत्पन्न होतात; आणि सूक्ष्म सत्वादिगुणापासून परमात्म-विषय-प्रकाश-प्रवृत्ति, मोह आदिकरून उत्पन्न होतात; त्यापैकीं लौकिक प्रकाशादिकांचे ठायीं, गुणातीतास द्वेषाची इच्छा होत नाहीं, परंतु प्रारब्धकर्माप्रमाणें एखादे वेळीं, त्यांत द्वेषाची इच्छाही उत्पन्न होते. गुणातीतास परमात्मविषयक प्रवृत्तींत इच्छा होते त्याप्रमाणेंच परमात्मविषयक मोहादिकांनीं द्वेषाचीही इच्छा होते, असें

जाणावें. अथवा दुसऱ्याचे ठायीं असलेले परमात्म-प्रकाशादि गुण पाहून त्यांस अज्ञान (प्राप्त) व्हावें, अशी इच्छा साधु करीत नाहींत. ॥ २२ ॥

उदासीनवदासीनो गुणैर्यो न विचाल्यते ॥
गुणा वर्तन्त इत्येव योवऽतिष्ठति नेङ्गते ॥ २३ ॥

उदासीनवदित्यादि आचारप्रदर्शनं उदासीनवदासीनो नतूदासीनो वैष्णवकर्मानुष्ठानात् गुणैः सत्वादिभिर्नविचाल्यते गुणाएवेश्वरेच्छया प्रवर्तते ॥ २३ ॥

श्रद्धा तीन प्रकारची झाली तर जीवांस काय आलें तें सांगतातः–हे भरतकुलोत्पन्ना **अर्जुना**, जो मनुष्य ज्या श्रद्धेनें युक्त असतो, तो त्या नांवानें प्रसिद्ध होतो. ह्मणजे सात्विकश्रद्धायुक्त तो सात्विक; राजसश्रद्धायुक्त तो राजस, आणि तामसश्रद्धायुक्त तो तामस जाणावा. या जीवाला (तिहींपैकीं) कोणती तरी श्रद्धा असतेच; श्रद्धा दोन प्रकारची आहे, मनोवृत्तिभूत आणि जीवरूपभूत; यांत, सात्विक जीवांस एकाद्या वेळीं राजस आणि तामस श्रद्धा उत्पन्न होतात; राजस जीवांस सात्विकतामस व तामस जीवांस सात्विकराजस श्रद्धा उत्पन्न होतात; सात्विक जीवांच्या अंतःकरणांत सात्विकच श्रद्धा असते. राजस जीवांचे अंतःकरणांत राजस श्रद्धाच असते, आणि तामस जीवांचे

अंत:करणांत तामस श्रद्धाच असते; ह्मणून, ज्यांच्या त्यांच्या श्रद्धेमुळें भिन्न असलेले हे जीव उत्तम, मध्यम व कनिष्ठ या भेदानें नित्य भिन्नच असतात. ॥३॥

यजन्ते सात्त्विका देवान्यक्षरक्षांसि राजसाः ॥
प्रेतान्भूतगणांश्चान्ये यजन्ते तामसा जनाः ॥ ४ ॥

यो यच्छ्रद्धइत्यस्य विवरणाय तां श्रृण्विति प्रतिज्ञातमाह । यजंतइति । सात्विकश्रद्धाः शास्त्रविधिमजानंतोपि देवान् ब्रह्मादिविष्णुरूपाणि यजंते । उक्तंच । त्यक्तापि शास्त्रविहितं मिथ्याज्ञानविवर्जिताः । भक्त्या विष्णुं यजंतो ये निषिद्धाचरणोज्झिताः । तेपि यान्ति हरिं शास्त्रविधानस्थातु किंपुनरिति । राजसतामसश्रद्धास्त्वजानंतएव यजंते इत्यादि व्याख्येयं । राजसतामसा अपि यद्यपि देवयाजिनः तथापि यक्षादीनांयजनोक्तत्वात्तेषामेव यष्टारोभवंतीति यक्षादीन् यजंत इत्युक्तम् । तदुक्तम् । दीनत्वाद्देवनामान स्त्वन्ये ब्रह्मादिनामकाः । अवैष्णवकृतोयज्ञोदीनैर्देवैश्च भुंजतइति ॥ ४ ॥

" योयच्छ्रद्धः " याचें स्पष्टीकरण करण्याच्या हेतूनें, मागील प्रतिज्ञात अर्थाचें स्पष्टीकरण करितात:—सात्विक लोक हे, परमात्मा श्रीहरी सर्वोत्तम आहे असें समजून, त्याची भक्ति करितात; रमा आणि ब्रह्मरुद्रादिदेव हे परमात्म्याचे भक्त आहेत असें समजून तारतम्यानें त्याचेठायीं ते (सात्विक) भक्ति करितात. राजस असतात ते, देव या नांवाचे यक्ष किंवा राक्षस, यांस इंद्रादि नामांनीं यजन (होम हवन) करितात. आणि जे, राजस असतात ते विष्णु हा सर्वोत्तम आहे याविषयीं संशययुक्त असतात. राजस भक्तांनीं देवतांच्या उद्देशानें यज्ञ केले तरी, त्या यज्ञाचें पुण्य यक्ष राक्षस हरण करितात. अशांस (राजसांस) सांकल्पिक स्वर्गफल प्राप्त होतें. तामस लोक असतात ते भूतगणांच्या उद्देशानें यजन करितात; हे (तामस) ब्रह्मरुद्रादि देवश्रेष्ठांस, परात्पर सर्वोत्तम असा जो श्रीहरी त्याच्यासारखे समजतात. अथवा परमात्मा हा, त्यांपेक्षां नीच आहे असेंही समजतात. त्याचप्रमाणें ते जीव व परमेश्वर हे अभिन्न (एकच) आहेत असेंही ह्मणतात. या तामस भक्तांनीं शिवस्कंदादिकांच्या उद्देशानें यागादिक कर्म केलें तरी त्या यज्ञाच्या पुण्याचा

भाग, भूतप्रेतादिक हरण करतात. त्यांस (तामसांस) भूतादिकांची योनि प्राप्त होते. ॥ ४ ॥

अशास्त्रविहितं घोरं तप्यन्ते ये तपो जनाः ॥
दम्भाहङ्कारसंयुक्ताः कामरागबलान्विताः ॥ ५ ॥

सात्विकादीनां याजकानां मोक्षः सांकल्पिक स्वर्गोभूतादित्वं फलं क्रमादित्युक्तानि फलानि । तत्र तामसादीनां भूतादित्वमवांतरफलमेव मुख्यंतु तमेवेत्याशयेनाह । अशास्त्रविहितमित्यादिना यत्तपः कुर्वंतीत्युपलक्षणार्थं यज्ञादिकमपि कुर्वंति । कामरागबलान्विताः । इच्छाशक्त्याग्रहयुक्ताः ॥ ५ ॥

जे लोक सात्विक शास्त्रांत न सांगितलेलें, (अशास्त्रविहित) सर्व प्राणिमात्रांस भयंकर (वाटणारें)—घोर—असें तपाचरण; ढोंग आणि मीपणा यांनीं युक्त असें कर्म आग्रहानें करितात. ॥ ५ ॥

कर्शयन्तः शरीरस्थं भूतग्राममचेतसः ॥
मां चैवान्तःशरीरस्थं तान्विद्ध्यासुरनिश्चयान् ॥ ६ ॥

शरीरस्थं भूतग्रामं लक्ष्म्यादिदेवतासमुदायं । अंतर्नियामकत्वेन स्थितं मां च कर्शयंतः । अल्पत्वेन पश्यंतः । अचेतसोऽविवेकिनः तान् आसुरोनिश्चयोयेषां ते आसुरनिश्चयाः तान्नित्यनरकयोग्यान् विद्धि । तदुक्तम् । अकृशानपि लक्ष्म्यादीन्देवान्विष्णुपरायणान् । विष्णुं च सर्वदेहस्थं कृशत्वेन विजानते । तेषामल्पगुणत्वेन कल्पनात्ते तमोध्रुवं । यांति ज्ञेयाश्च ते दैत्याः पिशाचावाथ राक्षसाइति ॥ ५ ॥

व या शरीरांत असणारे लक्ष्मी आदिकरून देवसमुदाय अल्पगुणयुक्त आहेत असें समजतात व सर्व प्रेरकत्वानें असणारा मी, त्या मलाही (ते घोर तपाचरण करणारे) अल्प आहे असेंही समजतात. ते अविवेकी—आसुरनिश्चयी—नित्य नरकांतच रहाण्यास योग्य असें समज. ॥ ६ ॥

आहारस्त्वपि सर्वस्य त्रिविधो भवति प्रियः ॥
यज्ञस्तपस्तथा दानं तेषां भेदमिमं शृणु ॥ ७ ॥

श्रद्धाभेदात्सात्विकादिजीवस्वरूपं ज्ञातव्यमित्युक्तं । आहारादिभेदादपि ज्ञातव्यमित्याशयेनाह । आहारस्त्वपीत्यादिना । आहारः- अन्नादिः सात्विकादिभेदेन त्रिविधः । त्रिविधानां प्रियः यथा यज्ञादीनि त्रिविधानि तेषामाहारादीनां वक्ष्यमाणभेदं शृणु ॥ ७ ॥

सात्विकादिभेदानें जीवांचें स्वरूप कसें समजावें तें सांगितलें. आतां आहारादिभेदानें त्यांचें स्वरूप कसें ओळखावें तें सांगतातः-सर्व जीवांस सात्विकादिभेदाप्रमाणें तीन प्रकारचा आहार आवडतो, त्याचप्रमाणें यज्ञ, तप आणि दान हींहीं सात्विकादिभेदानें तीनप्रकारचीं आहेत, त्यांपैकीं आहारांचा प्रकार पुढें सांगतों, ऐक; ॥ ७ ॥

आयुःसत्त्वबलारोग्यसुखप्रीतिविवर्धनाः ॥
रस्याःस्निग्धाः स्थिराहृद्या आहाराः सात्त्विकप्रियाः ।८।

तत्राहारभेदं तावदाह । आयुरित्यादिना । आयुर्जीवनं सत्वं साधुत्वं । सात्विकान्नभोजनाच्चित्तशुद्धिः । बलं शक्तिः, आरोग्यं रोगराहित्यं, सुखं सकृदुपभोगेऽपि दीर्घकालीनमुपभोगकालीनं सुखं प्रीतिः, एतेषां विवर्धनाः रस्याः रससंयुताः स्निग्धाः स्नेहवंतः स्थिराः बहुकालं गुणप्रदाः घृतादयः हृद्याः सेवनानंतरमपि पुनर्भूयादिति मनोहरंतः । हृद्यं पश्चान्मनोहारि प्रियं तत्कालसौख्यदम् । सुखदं दीर्घसुखदं रस्यमभ्याससौख्यदमित्यभिधानात् एते आहाराः सात्विकानां प्रियाः आयुरादिविवर्धना इतिवचनात् तद्विपरीतत्वे रस्यादीनामपि राजसत्वमेव ॥ ८ ॥

आयुष्य, अंतःकरणशुद्धि, शक्ति, आरोग्य, सुख ह्मणजे एकदा उपभोग घेतला तरी दीर्घकालपर्यंत असणारें, सुखोपभोगकालीं मात्र असणारी प्रीति या सर्वांस वाढविणारे, रसयुक्त, घृतादिस्नेहयुक्त (स्निग्ध) पदार्थ, पुष्कळ कालपर्यंत सुख देणारे, ज्यांचे सेवनानंतरही पुनः सेवनाची इच्छा उत्पन्न करणारे, हे सर्व आहार सात्विकांस प्रिय आहेत. ॥ ८ ॥

कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनः ॥
आहारा राजसस्येष्टा दुःखशोकामयप्रदाः ॥ ९ ॥

कटुर्मरीचादिः । अम्लोजंबीरनीरादिः । लवणोष्णौ प्रसिद्धौ । अतिशब्दः सर्वत्र संबध्यते तीक्ष्णः सर्षपादिः रूक्षः स्वतएव निरसः विदाही संतापकरः एते आहाराराजसस्येष्टाः प्रियाः दुःखं संतापः शोकोदौर्मनस्यं आमयोरोगस्तत्प्रदाः कट्वादीनामपि आरोग्यरसाद्यर्थत्वेन सात्विकत्वमेव दुःखशोकामयप्रदाइत्युक्तेः ॥ ९ ॥

फार तिखट मिरची इत्यादि, आंबट, खारट, जळजळीत (अतिउष्ण) फार तीक्ष्णरसयुक्त, कोरडे (रसरहित), फार दाह करणारे, हे सर्व आहार राजसांस आवडतात; हे आहार दुःखादिकांस कारण होतील, तरच ते राजस होतात; परंतु आरोग्यास व आयुष्याभिवृद्धीस कारण होतील तर ते सात्विक समजावे. ॥ ९ ॥

यातयामं गतरसं पूति पर्युषितं च यत् ॥
उच्छिष्टमपि चामेध्यं भोजनं तामसप्रियम् ॥१०॥

योवा कोवा यस्यरसस्तदपगमे यातयामं । यामांतरितपाकंतु यातयाममितीर्यते । कचिच्चगतसारंस्यान्नियम्यं यातमस्य यदितिवचनात् । पूर्वं स्वादुपश्चादन्यथाजातं गतरसं । पूति दुर्गंधि पर्युषितं दिनांतरपकं । उच्छिष्टमन्यभुक्तावशिष्टं । अमेध्यं स्वभावतः अभक्ष्यं भुज्यत इति भोजनं अन्नादि तामसानां प्रियं स्वादुत्वादेः पुरुषभेदेनाव्यवस्थावस्थायामपि शुद्धभागवतानां तु स्वभावापेक्षयैवतु । स्वादुत्वादिविजानीयात्पदार्थानां नचान्यथेतिवचनाद्विवेकः ॥ १० ॥

ज्यापदार्थांतील रस गेला आहे किंवा जे शिजविल्यावर एक प्रहर होऊन गेला आहे, त्यांस यातयाम ह्मणतात; प्रथम रसयुक्त असून ज्यांतला रस (स्वाद) गेला आहे, व दुर्गंधयुक्त, पूर्व दिवशीं केलेले शिळे; आणि दुसऱ्यानें खाऊन शिल्लक राहिलेले उष्टे व स्वभावतःच अपवित्र असे अन्नादिक पदार्थ तामसांस प्रिय असतात. ॥ १० ॥

अफलाकांक्षिभिर्यज्ञो विधिदृष्टो य इज्यते ॥
यष्टव्यमेवेति मनः समाधाय स सात्त्विकः ॥११॥

यज्ञभेदमाह । अफलाकांक्षिभिरित्यादिना विधिदृष्टः शास्त्रज्ञानपूर्वकं ॥ ११ ॥

यज्ञाचे भेद सांगतात:-फळाची इच्छा न धरितां एकाग्रमनानें शास्त्रोक्त विधानपूर्वक जो यज्ञ करितात, तो सात्विक यज्ञ होय. ॥ ११ ॥

अभिसन्धाय तु फलं दम्भार्थमपि चैव यत् ॥
इज्यते भरतश्रेष्ठ तं यज्ञं विद्धि राजसम् ॥ १२ ॥

दंभार्थं महत्वख्यापनाय ॥ १२ ॥

हे भरतश्रेष्ठा अर्जुना, फळाची इच्छा धरून, आपलें माहात्म्य-मोठेपणा-वाढावा ह्मणून, केलेला जो यज्ञ तो राजस यज्ञ जाणावा, ॥१२॥

विधिहीनमसृष्टान्नं मंत्रहीनमदक्षिणम् ॥
श्रद्धाविरहितं यज्ञं तामसं परिचक्षते ॥ १३ ॥

असृष्टान्नं अन्नत्यागशून्यं मंत्रोच्चारण तदर्थज्ञानरहितं परिचक्षते कथयंति ॥ १३ ॥

शास्त्रोक्तविधीचें ज्ञान नसून केलेला, (अशास्त्र) अन्नदानरहित, मंत्राच्या अर्थाचें ज्ञान नसतां, यथोक्त दक्षिणादि न देतां, श्रद्धेवांचून केलेला जो यज्ञ, त्यास तामस यज्ञ असें ह्मणतात. ॥ १३ ॥

देवद्विजगुरुप्राज्ञपूजनं शौचमार्जवम् ॥
ब्रह्मचर्यमहिंसा च शारीरं तप उच्यते ॥ १४ ॥

तपसः सात्विकादि भेदं दर्शयितुं शरीरादिभेदेन त्रैविध्यं तावदाह । देवद्विजेत्यादिना शारीरं शरीरसंपाद्यं ॥ १४ ॥

या नंतर सात्विकादिभेदानें तपश्चर्येचे भेद दाखविण्याकरितां शरीरादिक तपाचे भेद सांगतात:—देव, ब्राह्मण, गुरु आणि बुद्धिमान् (तत्ववेत्ते) यांची पूजा शुद्धांतःकरणानें—वांकडेपणा सोडून—करणें, ब्रह्मचर्य ह्मणजे जितेंद्रिय असणें, हिंसा न करणें, यांस शारीरतप असें ह्मणतात. ॥ १४ ॥

अनुद्वेगकरं वाक्यं सत्यं प्रियहितं च यत् ॥
स्वाध्यायाभ्यसनं चैव वाङ्मयं तप उच्यते ॥ १५ ॥

अनुद्वेगकरं अभयंकरं श्रवणसमयेप्रियं हितं परिणामे सुखकरं १५

दुसऱ्यास भय न वाटेल असें बोलणें, खरें बोलणें, श्रवणसमयीं व परिणामीं हितावह असें बोलणें, वेदाभ्यास करणें, यांस वाचिक तप ह्मणतात. १६

मनःप्रसादः सौम्यत्वं मौनमात्मविनिग्रहः ॥
भावसंशुद्धिरित्येतत्तपो मानसमुच्यते ॥ १६ ॥

मनःप्रसादोबुद्धिवैशद्यं सौम्यत्वमक्रौर्यं । अक्रूरः सौम्यउच्यत इत्यभिधानात् । मौनं मननशीलत्वं नत्वभाषणं । तस्य मानसत्वाभावात् । आत्मविनिग्रहः परमात्मनि मनोवृत्तेरवस्थानं । भावसंशुद्धिरितरविषयचिंताराहित्यं ॥ १६ ॥

रागादिक सोडून मनास प्रसन्न ठेवणें, अथवा बुद्धीची विशदता, क्रूरपणा नसणें, (शांत असणें) परमात्म्याच्या गुणांचें चिंतन करणें, विषयांपासून मन फिरविणें, कपट नसणें, यांस मानस तप असें ह्मणतात. ॥१६॥

श्रद्धया परया तप्तं तपस्तत्रिविधं नरैः ॥
अफलाकांक्षिभिर्युक्तैः सात्त्विकं परिचक्षते ॥ १७ ॥

इदानीं सात्विकादिभेदेन त्रैविध्यं प्रतिज्ञापूर्वकमाह । श्रद्धयेत्यादिना । युक्तैः भगवदर्पणादियोगयुक्तैः । तप्तं तपः । पाकः पक्वइतिवत् युक्तैरेतत्सात्विकयज्ञादिष्वप्यनुषंजनीयं ॥ १७ ॥

आतां सात्विकादि भेदानें तपश्चर्येचे भेद सांगतातः—कर्मफलाची इच्छा न करितां योगयुक्त मनुष्यांनीं मोठ्या भक्तीनें केलेलें, कायिकादि भेदानें तीन प्रकारचें जें तप, तें सात्विक तप जाणावें. कृष्णार्पण बुद्धीनें युक्त, अशीं योग्यांनीं केलेलीं यज्ञदानादिक हीं सात्विक होत. ॥ १७ ॥

सत्कारमानपूजार्थं तपो दम्भेन चैव यत् ॥
क्रियते तदिह प्रोक्तं राजसं चलमध्रुवम् ॥ १८ ॥

मनसादरः सत्कारः वाचाप्रशंसा मानः शारीरोनमस्कारादिः पूजा । चलं पातभयेन चलनहेतुः । अध्रुवं क्षयिष्णु ॥ १८ ॥

जगांत आपली स्तुती व्हावी, आपल्यास मोठा मान मिळावा अशा

उद्देशानें, केवळ दांभिकपणानेंच, चंचल, अस्थिर असें जें तप करणें तें राजस समजावें. ॥ १८ ॥

मूढग्राहेणात्मनो यत्पीडया क्रियते तपः ॥
परस्योत्सादनार्थं वा तत्तामसमुदाहृतम् ॥ १९ ॥

मूढग्राहेण अविवेकदुराग्रहेण । आत्मनः पीडया शक्त्यादिकमनपेक्ष्य उत्सादनार्थम् ॥ १९ ॥

मूर्खपणानें दुराग्रह धरून, शरीरास दुःख देणारें अथवा दुसऱ्यांचा नाश करावा अशा इच्छेनें केलेलें जें तप (जारणमारणादि) तें तामस जाणावें. ॥ १९ ॥

दातव्यमिति यद्दानं दीयतेऽनुपकारिणे ॥
देशे काले च पात्रे च तद्दानं सात्त्विकं स्मृतम् ।२०।

दानभेदमाह । दातव्यमित्यादिना । पुण्यदेशे काले पात्रे च प्रत्यासन्नेसति तस्मैअनुपकारिणे पात्राय दीयते यद्दानं तत् सात्विकं २०

आतां दानाचे भेद सांगतातः–कुरुक्षेत्रादि पुण्यक्षेत्रीं, सूर्यग्रहणादि पर्वकाळीं, वेदाध्ययन केलेल्या, दान दिल्यानंतर त्याकडून त्याचा मोबदला मिळणार नाहीं अशा सत्पात्र ब्राह्मणास, अवश्य कर्तव्य असें समजून जें दान देण्यांत येतें तें, आणि स्वर्गैश्वर्यादि अनित्य संपत्तीची इच्छा न करितां जें दान देण्यांत येतें तें, सात्विक असें समजावें. ॥ २० ॥

यत्तु प्रत्युपकारार्थं फलमुद्दिश्य वा पुनः ॥
दीयते च परिक्लिष्टं तद्दानं राजसं स्मृतम् ॥ २१ ॥

परिक्लिष्टं चित्तक्लेशयुक्तं अशुभद्रव्यं वा ॥ २१ ॥

प्रत्युपकाराकरितां–आपल्यावर केलेल्या उपकाराची फेड व्हावी ह्मणून दिलेलें, अथवा फळाच्या इच्छेनें दिलेलें, किंवा द्रव्य खर्च होतो असे मनांत क्लेश धरून दिलेलें, अथवा अन्यायानें मिळविलेल्या द्रव्याचें, जें दान दिलें जातें, तें राजस समजावें. ॥ २१ ॥

अदेशकाले यद्दानमपात्रेभ्यश्च दीयते ॥
असत्कृतमवज्ञातं तत्तामसमुदाहृतम् ॥ २२ ॥

अदेशकाले अशुचौ देशे कालेच। असत्कृतं नमस्कारादिसत्काररहितम्। अवज्ञातं तिरस्कारयुक्तम् ॥ २२ ॥

अयोग्य ठिकाणीं व अयोग्यवेळीं, अयोग्य–अपात्रांस, उन्मत्तपणानें अवज्ञापूर्वक, नमस्कर वगैरे न करितां, तिरस्कारानें, कंटाळून–त्रासून–जें दान दिलें जातें, तें तामस असें समजावें. ॥ २२ ॥

ॐ तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः ॥
ब्राह्मणास्तेन वेदाश्च यज्ञाश्च विहिताः पुरा ॥ २३ ॥

सात्विकानां यज्ञादीनामसाधारणेत्थं भावविधानार्थमाह। ॐतत्सदित्यादिना। ब्रह्मणः परमात्मनः निर्दिश्यतेऽनेनेतिनिर्देशोनाम ॐतत्सदितित्रिविधः ॐ तं प्रविष्टं जगद्यत्र जगतिच स्वयमोतमित्योमित्युच्यते तदिति नित्यपरोक्षमुच्यते ब्रह्मच प्रत्यक्षानुमानागम्यम्। वेदैकवेद्यमिति तदित्युच्यते निर्दोषसर्वशुभत्वात् सदित्युच्यते। तथाच श्रुतिः। ॐतंजगद्यत्र स्वयंचपूर्णोवेदोक्तरूपोऽनुपचारतश्च। सर्वैः शुभैश्चाभियुतोनचान्यैरोंतत्सदित्येनमतोवदंतीति। एतैर्नामभिरात्मपूजयाप्राणिनां शुभार्थं तेन ब्रह्मणा ब्राह्मणादयोविहिताः। वेदानांविधानं नाम व्यंजनमेव। तेषामपौरुषेयत्वात्तस्यच प्रमितत्वात्। परमेश्वरस्य वेदव्यंजनं नाध्यापकवत् किंतु वेदेनियोगादीनां सद्भावाच्छब्दादीनां च नियोक्तृत्वासंभवादनादिसिद्धेनैव शब्दार्थसंबंधेनेश्वरस्यैव नियोक्तृत्वात्स्वातंत्र्यमप्यस्तीति ज्ञापयितुं विहितात्युक्तं ब्रह्मणः स्वप्रतिमात्वेन यज्ञादीनां विहितत्वात्तेषामप्योंतत्सदितिनामत्रयमस्ति ॥ २३ ॥

सात्विकादि यज्ञांस असाधारणत्व दाखविण्याकरितां सांगतातः—परमात्म्यास, ॐ, तत् आणि सत् अशीं तीन नांवें ज्ञान्यांनीं सांगितलीं आहेत; हें जगत् प्रलयकाळीं परमात्म्यांत प्रविष्ट होऊन, भिन्न असतें. त्याचप्रमाणें परमात्माही, जगाचें धारण व पोषण करण्याच्या निमित्तानें, या जगांत जीवा-

र्यंतर्यामी होऊन प्रविष्ट असतो; आणि तो अनंतसद्गुणपरिपूर्ण असा असल्यामुळें त्याला " ॐ " असें नांव आहे. ज्याचें स्वरूप वेदैकगम्य असून, तें नित्य परोक्षज्ञानविषयक असल्यामुळें त्या परमात्म्यास " तत् " असें नांव आहे. सर्व मंगळमूर्ति तो परमात्मा असल्यानें त्यास " सत् " असेंही नांव आहे. हीं ॐकारादि नांवें यज्ञादिकांचीं वाचक आहेत असें समजावें. ॐकारादि नांवानें मुख्य वृत्त्याप्रतिपाद्य परमात्म्याची, या नांवानीं त्याची पूजा केली असतां, प्राण्यांस शुभप्राप्ति व्हावी अशा हेतूनें सृष्टीच्या उत्पत्तिकाळीं, ब्राह्मण, यज्ञ, दान, तपाचरण व वेदादिक हीं परस्पर संबंध ठेवून उत्पन्न केलीं जातात. वेद हे परमात्म्यापासून अनादिसिद्ध प्रगट झालेले आहेत, असें समजावें. परमात्म्यापासून यज्ञादिक उत्पन्न झाले आहेत ह्मणून त्यास " ॐ " असें नांव आहे. त्याप्रमाणेंच तत्प्रतिमास्थानभूत यज्ञादिकांसही " ॐ " असें नांव आहे, असें समजावें. ॥ २३ ॥

तस्मादोमित्युदाहृत्य यज्ञदानतपःक्रियाः ॥
प्रवर्तन्ते विधानोक्ताः सततं ब्रह्मवादिनाम् ॥ २४ ॥

तस्मादोमित्युदाहृत्य ॐकारमुच्चार्य ब्रह्मवादिनां यज्ञादिक्रियाः वेदोक्तप्रकारेण प्रवर्तंते ॥ २४ ॥

ॐकारशब्द परमात्म्याचा वाचक आहे ह्मणून, ॐ असें ह्मणून (उच्चारून) ब्रह्मनिष्ठांच्या, वेदविधानोक्त यज्ञ, दान, तपादि क्रिया निरंतर चालू असतात; ॐतत्सत् अशा या अर्धर्चेनें परमात्म्यास आणि यज्ञादिकांस एकच नांव आहे असें सांगितलें; आणि या नामसाम्यानें यज्ञादिक हे परमात्म्याचे प्रतिमास्थानीं होत असें सुचविलें; ॐकारादि यज्ञादिकांचेठायीं आणि परमात्म्याचेठायीं प्रतिपादन करून, ॐकाराचा उच्चार करणें हा आचार सांगितला. ह्यावरून ॐकारार्थरूप परमात्म्याचें स्मरणपूर्वक ॐकाराचा उच्चार करून, ब्राह्मणादिकांनीं यज्ञादि कर्म करावें. ॥ २ ॥

तदित्यनभिसन्धाय फलं यज्ञतपः क्रियाः ॥
दानक्रियाश्च विविधाः क्रियन्ते मोक्षकांक्षिभिः ॥२५॥

किंच तत्फलं मेस्यादित्यनभिसंधाय यज्ञादयः क्रियंते ॥ २५ ॥

तत् असें ह्मणून केलेल्या यज्ञादिकांच्या फलांची इच्छा न करितां, तो परमात्मा अपरोक्षज्ञान देणारा होवो, अशी इच्छा धरून, मुमुक्षुजन नानाप्रकारचीं यज्ञ, दान आणि तप हीं करितात. यावरून केवळ ब्रह्माचें अपरोक्ष-ज्ञान प्राप्त व्हावें ह्मणून, यज्ञादिक करावें, असा अभिप्राय दर्शविला आहे. २५

सद्भावे साधुभावे च सदित्येतत्प्रयुज्यते ॥
प्रशस्ते कर्मणि तथा सच्छब्दः पार्थ युज्यते ॥ २६ ॥

किंच सद्भावेऽस्तित्वे साधुभावे साधुत्वे शुभे कर्मणि च सच्छब्दः प्रयुज्यते ततश्च सच्छब्दार्थ ब्रह्मज्ञानपूर्वकत्वं लभ्यते ॥२६॥

हे पृथापुत्रा अर्जुना, जगदुत्पत्तींत श्रेष्ठार्थवाचक असें "सत्" हें पद होय. तसेंच प्रशस्त कर्मांचेठायीं–शुभकर्माचेठायीं, "सत्" असा शब्द उच्चारितात. "सत्" हा शब्द सर्व जगद्विलक्षण, परात्परतर परमात्मा श्रीनारायण याचा वाचक आहे. यावरून ब्रह्मज्ञानपूर्वक यज्ञादि कर्म करावें, हें याचें तात्पर्य. ॥ २६ ॥

यज्ञे तपसि दाने च स्थितिः सदिति चोच्यते ॥
कर्म चैव तदर्थीयं सदित्येवाभिधीयते ॥ २७ ॥

यज्ञादौस्थितिर्निष्ठा सच्छब्देनोच्यते ततश्च सापि यज्ञादेरंगं सच्छब्दस्यार्थो विष्णुस्तद्विषयं तदर्थीयमिति ब्रह्मविषयत्वमुच्यते ॥२७॥

यज्ञ, तप व दान यांविषयीं जी निष्ठा ती सत् या शब्दानें सांगतात– ज्या परमात्म्यास उक्त शब्दत्रय (ॐ तत् सत्) वाचक आहेत, त्या परमात्म्याचे संतोषाकरितां, केलेलें जें यज्ञादिक कर्म त्यास सत्कर्म असें ह्मणतात. या श्लोकानें ब्रह्मविषय निष्ठापूर्वक यज्ञादि कर्म ज्ञान्यांनीं करावें असें सांगितलेलें आहे, हें तात्पर्य. ॥ २७ ॥

अश्रद्धया हुतं दत्तं तपस्तप्तं कृतं च यत् ॥
असदित्युच्यते पार्थ न च तत्प्रेत्य नो इह ॥२८॥

इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां श्रद्धात्रयविभागयोगो नाम सप्तदशोऽध्यायः ॥ १७ ॥

अश्रद्धयेत्यनेन भक्तिरपि अंगमित्युच्यते। यतोऽश्रद्धयाकृतं प्रेत्य लोकांतरे न फलवत्। इहापि नो फलवत्। ततश्चोंकारार्थज्ञानपूर्वकं फलमनभिसंधाय च ब्रह्मज्ञानभक्तिपूर्वकं ब्रह्मविषयत्वेन निष्ठया वेदोक्तप्रकारेण ब्राह्मणैः सहयज्ञादिकरणे प्रतिमाप्रतिष्ठापनात् ब्रह्मैव प्रतिष्ठापितं भवति तथाच श्रुतिः ॐयज्ञाद्यानिष्फलं कर्म तत्स्यात् सद्वै तदर्थं कर्म वदंति वेदाः। तच्छब्दानां सन्निधेर्ब्रह्मप्रीतेस्तद्रूपत्वात् जनितं ब्रह्म तस्येति। अत एवं क्रियमाणं यज्ञादिकं सात्विकं अन्यद्राजसं तामसंचेत्युक्तप्रकारेण यज्ञादिकं कर्तव्यं विष्णुश्रद्धारहितत्वेन राजसस्याप्यसदंतर्भावात्पृथगनुक्तिः। फलं तारतम्येन। उक्तंच। सात्विकं मुक्तिदं कर्म राजसंस्मृतिदुःखदम्। तामसं पातदं ज्ञेयं तत्कुर्यात्कर्मवैष्णवमिति ॥ २८ ॥

इति श्रीमद्भगवद्गीताविवृतौ विद्याधिराजभट्टोपाध्याय विरचितायाम् श्रीमध्वमतानुवर्तिनी व्याख्योपेतायाम् सप्तदशोऽध्यायः ॥ १७ ॥

हे अर्जुना, भक्तिवांचून केलेलें हवन, दिलेलें दान, आणि केलेलें तप व आणखीही कांहीं कर्म केलें तें त्यास असत् (योग्य प्रकारें न केलेलें) असें ह्मणतात. तें कर्म मरणानंतर परलोकीं उपयोगीं पडत नाहीं व या लोकींही त्याचें फल मिळत नाहीं. अश्रद्धेनें केलेलें कर्म राजस आणि तामस होय. याकरितां परमात्म्याविषयीं भक्ति असून यज्ञादि सत्कर्म सज्जनानीं करावें. अतएव तूंही मला अर्पण करण्याच्या हेतूनें युद्धरूप यज्ञकर्म करण्यास अवकाश लावूं नकोस. ॥ २८ ॥

येथें श्रीमदिन्दिराकान्ततीर्थ श्रीपादविरचित प्राकृत टीकेचा सतरावा अध्याय समाप्त झाला.

अथ अष्टादशोऽध्यायः

अर्जुन उवाच

संन्यासस्य महाबाहो तत्त्वमिच्छामि वेदितुम् ॥
त्यागस्य च हृषीकेश पृथक्केशिनिषूदन ॥ १ ॥

श्रीगुरुभ्यो नमः। सर्वेष्वध्यायेषु विप्रकीर्णतयोक्तं पुरुषार्थसाधनं मंदानां बुद्ध्यारोहार्थं संक्षेपेणास्मिन्नध्यायेउच्यते। चतुर्दशाद्यनुक्तत्रैगुण्यंचोच्यते तत्र तावन्मोक्षसाधनत्वेन निर्दिष्टयोस्त्यागसंन्यासयोः पृथक् स्वरूपनिर्णयायार्जुन उवाच। संन्यासस्येति ॥ १ ॥

मागील सर्व अध्यायांत सांगितलेलें परमपुरुषार्थ—मोक्षास—साधन—होणारें, असें परमात्म्याचें ज्ञान, मंदमती परंतु मोक्षाची इच्छा करणारे अशांस समजावें ह्मणून, या शेवटल्या अध्यायांत तें संक्षेपानें सांगतात:—प्रथमतः चवदाव्या अध्यायांत न सांगितलेले त्रैगुण्य सांगतात. मोक्ष—साधनास योग्य त्याग व संन्यास त्याचें स्वरूप काय, हें निरनिराळें ऐकण्याविषयींची इच्छा करणारा अर्जुन प्रश्न करितो.—हे सर्वेंद्रियांचें नियमन करणाऱ्या, बाहुशालि भगवंता, केशिसंहारका श्रीकृष्णा, त्याग व संन्यास या प्रत्येकाचें स्वरूप जाणण्याची मी इच्छा करितों ॥ १ ॥

श्रीभगवानुवाच।

काम्यानां कर्मणां न्यासं संन्यासं कवयो विदुः ॥
सर्वकर्मफलत्यागं प्राहुस्त्यागं विचक्षणाः ॥ २ ॥

अत्र परिहारं भगवानुवाच। काम्यानामिति। अनियतकाम्यानां स्वर्गादिफलानिच्छया विशेषणत्यागेन त्यागोनियतकाम्यानां स्वरूपाकरणेन त्यागः संन्यासः। सर्वेषां काम्यकर्मणां करणाकरणविवक्षया फलत्यागएव त्यागइत्यर्थः। तथाहि श्रुतिः आनिच्छया कर्मणावापि काम्यन्यासोन्यासः फलत्यागस्तुत्यागइति जनकाश्वपत्यादिभिर्मुमुक्षुभिरश्वमेधादीनामनुद्दिष्टफलानामनुष्ठानान्न काम्यानां

स्वरूपपरित्यागएव नित्यनैमित्तिकफलस्यांतःकरणशुद्धेः सर्वापेक्षितत्वेन तत्त्यागो न युक्तः नच सर्वेषामित्यादीनामर्थवादिकंफलमस्ति नच विश्वजिदादिवत्कल्पनाप्रमाणाभावादिति ॥ २ ॥

याप्रमाणें अर्जुनाचा प्रश्न ऐकून भगवान् श्रीकृष्ण सांगतातः—काम्यकर्मांचा त्यागच कर्म संन्यास असें समजावें. काम्यकर्में दोन प्रकारचीं आहेत; एक नित्यकाम्य व दुसरें अनित्यकाम्य; त्यांत नित्यकाम्याचा त्याग ह्मणजे कर्मांचा स्वरूपतः त्याग करणें (मुळींच कर्म न करणें) यालाच संन्यास असें ह्मणतात. अनित्यकाम्याचा त्याग ह्मणजे स्वर्गादि फळांच्या इच्छेचा त्याग करणें याला त्याग असें ह्मणतात; सर्व काम्यकर्म करणें अथवा न करणें याविवक्षेनें कर्मफळाच्या इच्छेचा त्याग करणें, यालाच ज्ञानीजन कर्मत्याग असें ह्मणतात. सर्व कर्मांचा स्वरूपतः त्याग व अनित्यकर्मांच्या फळाच्या इच्छेचा त्याग यालाच संन्यास असें ह्मणतात. याप्रमाणें त्याग व संन्यास शब्दाचा अर्थ केल्यामुळें कर्मसंन्यास आणि कर्मत्याग यांत विरोध नाहीं, असें समजावें. ॥ २ ॥

त्याज्यं दोषवदित्येके कर्म प्राहुर्मनीषिणः ॥
यज्ञदानतपःकर्म न त्याज्यमिति चापरे ॥ ३ ॥

सर्वकर्मफलत्यागमिति स्वोक्तत्यागस्वरूपावधारणाय प्रातीतिकीं विद्वन्मतविप्रतिपत्तिमुद्भावयति । त्याज्यमिति । काम्यानां बंधकत्वेन दुष्टत्वात्फलसंगत्यागएव प्रथमपक्षेऽपि त्यागोविवक्षितः । अन्यथा मनीषिणइति विशेषणवैय्यर्थ्यात् । अतोमतयोरविरोधएव विप्रतिपत्तिस्त्वापाततः प्रतीतिमपेक्ष्योद्भावितेत्यदोषः ॥ ३ ॥

आपण सांगितलेला फळत्यागरूप कर्मत्याग दृढ करण्याकरितां, इतर विद्वज्जनांनीं काय काय ह्मटलें आहे तें सांगतातः—कित्येक ज्ञाते लोक, यागादिक हे स्वर्गादि अनित्यफळ देणारे असल्यामुळें ते, सुखदुःख देणारे—बंधनकारक—दोषयुक्त आहेत; असें समजून, कर्म करूंच नये असें ह्मणतात. दुसरे कांहीं (विद्वज्जन) यज्ञ, दान, तपश्चर्या इत्यादि कर्मांचा त्याग करूं नये, असें ह्मणतात. पहिल्या पक्षाच्या ज्ञात्यांनींही स्वरूपतः कर्मत्याग करावा

असें सांगितलें नसून, कर्मफळाचा त्याग करावा, असें सांगितलें आहे; दुसऱ्या पक्षांतल्या ज्ञात्यांच्या ह्मणण्याप्रमाणें पाहिलें तरी फळाच्या इच्छेचा त्याग करून, कर्माचरण करावें असाच अर्थ दिसतो. यावरून दोन्ही पक्षांतील ज्ञात्यांच्या ह्मणण्याचा अर्थ एकच आहे; परंतु, तीं वाक्यें निरनिराळे अभिप्राय प्रतिपादक आहेत, असा आभास मात्र होतो, असें समजावें. ॥३॥

निश्चयं शृणु मे तत्र त्यागे भरतसत्तम ॥
त्यागो हि पुरुषव्याघ्र त्रिविधः संप्रकीर्तितः ॥४॥

अविरोध प्रकारं प्रतिज्ञापूर्वकं व्युत्पादयति । निश्चयमित्यादिना॥ तत्र विप्रतिपन्ने त्यागे विषये मे मत्तः नियमं शृणु । त्यागोहि फल-त्यागो मदीयमिति कर्मणि ममतात्यागः । भगवति कर्तृत्वाद्यनुसंधाने-नात्मनः कर्तव्याभिमानत्याग इति त्रिविधः संप्रकीर्तितः ॥ ४ ॥

पुनः पूर्वोक्त अविरोधच प्रतिज्ञापूर्वक सांगतातः—हे पुरुषश्रेष्ठा, माझ्या-कडून त्यागाविषयीं नियम ऐक; त्याग तीन प्रकारचा आहे; यज्ञादिक कर्मे करून, त्यांच्या फळाचा त्याग करणें हा एक; केलेल्या कर्माविषयीं मी केलें असा अभिमानत्याग करणें हा दुसरा; आणि सर्वनियंता जो भगवान् तो सर्व करवितो असें समजून, यज्ञादिक करावयाचीं कर्मे करून, त्यांविषयीं कर्तृत्वाभिमान सोडणें हा तिसरा त्याग होय. अथवा सात्विक, राजस आणि तामस, या भेदानें हा त्याग तीन प्रकारचा आहे, असें ज्ञानीजन सांगतात. ॥ ४ ॥

यज्ञदानतपःकर्म न त्याज्यं कार्यमेव तत् ॥
यज्ञो दानं तपश्चैव पावनानि मनीषिणाम् ॥५॥

अतस्तदन्यत्यागोनास्त्येव तवकोनिश्चयोजातइत्यपेक्षायामाह । यज्ञेति । तत्तस्माद्यज्ञादिकर्म न त्याज्यं किंतु कार्यमेव स्वरूपत्यागस्य त्यागशब्दार्थत्वाभावात् किंच मनीषिणां विदुषां यज्ञादीनि पावनानि नत्वविदुषामिव बंधकानि अतोवर्णाश्रमिभिः सर्वैरपि स्वोचितं यज्ञा-दिकं कार्यमेवेत्यर्थः । उक्तंच । वाचिकोमानसो यज्ञो न्यासिनांतु विशेषतः । वनस्थस्याक्रतुर्यज्ञः क्रत्वादिर्गृहिणोऽखिलः । शुश्रूषाद्या-त्मकोयज्ञो विहितोब्रह्मचारिणः । विद्याभयादिदानंच सर्वेषामपि

संमतम् । गृहिणोविच्चदानंतु वनस्थस्यान्नपूर्वकम् । सर्वैः कार्यं तपोघोरमिति सर्वेऽत्रकर्मिणइति । शूद्राणामपि विष्णुनामस्वाध्यायः । सत्योपवासादि च सर्वेषां तपश्चास्ति ॥ ५ ॥

पूर्वी सांगितलेला त्याग तीन प्रकारचा असल्यामुळें, आपल्या मनांत त्यांतला कोणता त्याग निश्चित आहे, हें अर्जुनास समजणार नाहीं ह्मणून सांगतात:–यज्ञदानतपश्चर्यादिकांच्या फळाची इच्छा सोडून; तीं अवश्य करणें, हेंच योग्य आहे; स्वरूपतः कर्मांचा त्याग करूं नये. यज्ञादिकांचा त्याग न करण्याचें कारण असें कीं, तीं यज्ञ, दान व तपें ज्ञानी जनांचें अंतःकरण शुद्ध होण्यास कारण आहेत; द्रव्ययज्ञ, विद्यादान, सत्यवचन इत्यादिक तपश्चरणें हीं गृहस्थ, ब्रह्मचारी, वानप्रस्थ व संन्यासी, या चारही आश्रमांतील लोकांना योग्यच आहेत. वर्णबाह्यांस विष्णुनामस्मरण हा यज्ञ, सुवर्ण दान देणें, खरें बोलणें, आणि उपवासादि (व्रतें) करणें ही तपश्चर्या योग्य आहे. वाचिक आणि मानसिक यज्ञ हे संन्याशांस उक्त होत; वानप्रस्थांस अक्रतुयज्ञ उक्त होय; गृहस्थांस क्रत्वादि सर्व यज्ञ उक्त होत; आणि ब्रह्मचाऱ्यांस गुरूची सेवा करणें हा यज्ञ उक्त होय. विद्यादान, अभयदान, सत्यवचन, उपवासादिक हीं, सर्व वर्णांनीं आणि सर्व आश्रमस्थांनीं आचरावयाचींच आहेत; गृहस्थांनीं द्रव्यदानपूर्वक यज्ञ करावे; वानप्रस्थांनीं अन्नदानपूर्वक यज्ञ करावे; असें आहे. यावरून, आपापल्यास योग्य अशा विधीनें सर्वांनीं हीं (कर्में) आचरण केलींच पाहिजेत. ॥ ५ ॥

एतान्यपि तु कर्माणि सङ्गं त्यक्त्वा फलानि च ॥
कर्तव्यानीति मे पार्थ निश्चितं मतमुत्तमम् ॥ ६ ॥

ननु केवलकाम्यानां फलानपेक्षयाकरणे फलांतराभावात्प्रयासएवस्यादित्यत आह । एतान्यपीति । तमेवंवेदानुवचनेन ब्राह्मणाविविदिषंति । यज्ञेन दानेन तपसा नाशकेनेति श्रुतेः कर्तृत्वं संगं परित्यज्य निष्कामतयानुष्ठितानां कर्मणां ज्ञानार्थत्वाज्ज्ञानिभिरनुष्ठितानामानंदातिशयार्थत्वान्न प्रयासइतिभावः ॥ ६ ॥

पण फळाची इच्छा सोडून, केवळ काम्यकर्मेंच केलीं तर, त्या कर्मांना

दुसरें कांहीं फळ नसल्यामुळें, हा केवळ महत्प्रयास होय याविषयीं सांगतात:– हे भरतकुलोत्पन्ना **अर्जुना**, यज्ञादिक कर्मे हीं अंत:करणशुद्धीस कारण असल्यामुळें, तीं करावीं असें मी सांगितलें; तीं कर्मे, मी कारितों हा कर्तृत्वाभिमान सोडून, फळाची इच्छा न करितां करावीं, असा माझा सिद्धांत आहे. सकाम कर्मे असंग होऊन केलीं तर, तीं अंत:करणशुद्धीस कारण होतात. ज्ञान्यांनीं निष्काम कर्मे केल्यानें, मुक्तींत त्यांस आनंदाभिवृद्धि होत असल्याकारणानें, तीं करण्यास कांहींच प्रयास नाहीं, हें तात्पर्य. ॥ ६ ॥

नियतस्य तु संन्यासः कर्मणो नोपपद्यते ॥
मोहात्तस्य परित्यागस्तामसः परिकीर्तितः ॥ ७ ॥

कर्मस्वरूपत्यागो न युक्तइति प्रतिपादयंस्तामसादिभेदेन त्यागत्रैविध्यं दर्शयति । नियतस्येत्यादिना । नियतस्य वर्णाश्रमविहितस्य कर्मणः संन्यासस्त्यागो न युज्यते । स्व यज्ञादीन्परित्यज्य निरयं यात्यसंशयमिति प्रत्यवायस्मरणात् । तदनादरेण क्रियमाणस्तस्य कर्मणः परित्यागः संगफलत्यागं विना स्वरूपत्यागः कार्यइति मिथ्याज्ञानाख्यान्मोहाच्चेत्तदातामसः परिकीर्तितः ॥ ७ ॥

स्वरूपतः कर्माचा त्याग करूं नये असें प्रतिपादन करणारे भगवान् **श्रीकृष्ण**, तामसादि भेदानें त्याग तीन प्रकारचा आहे असें सांगतात:– श्रुतिस्मृतींनीं नेमून दिलेलीं अशीं वर्णाश्रमोचित यज्ञयागादिक कर्मे सोडूं नयेत; कारण, आपापल्या वर्णाश्रमास उचित अशा यज्ञयागादिक कर्मांचा त्याग करणारास नरकप्राप्तिरूप प्रत्यवाय सांगितला आहे. त्यावर लक्ष न देतां, अज्ञानानें सर्व कर्मांचा त्याग केला तर, त्या त्यागास तामस त्याग असें ह्मणतात. ॥ ७ ॥

दुःखमित्येव यत्कर्म कायक्लेशभयात्त्यजेत् ॥
स कृत्वा राजसं त्यागं नैव त्यागफलं लभेत् ॥ ८ ॥

मोहं विना दृष्टदुःखमित्येव देहप्रयासभयाच्च कर्मत्यजेदिति यत्सत्यागोराजसः तं राजसं त्यागं कृत्वा कर्ता नैव त्यागफलं मोक्षं

लभेत् । दुःखं तु मानसं ज्ञेयमायासोबाह्य उच्यते । विशेषस्य विवक्षायामन्यथा सर्वमेवत्विेतिवचनाद्दुःखात्पृथक्कायक्लेशोऽवगंतव्यः ॥ ८ ॥

कर्माचें ज्ञान असूनही, कर्म करणें हें मनास दुःख देणारें अथवा शरीरास आयास देणारें असें समजून, यज्ञादि कर्मांचा त्याग केला तर, त्यास राजस त्याग असें ह्मणतात व तीं टाकणारास त्यागाचें फल मिळत नाहीं. ८

कार्यमित्येव यत्कर्म नियतं क्रियतेऽर्जुन ॥
सङ्गंत्यक्त्वा फलंचैव स त्यागः सात्त्विको मतः ॥९॥

कार्यमित्येव नियतंकर्मसंगफलं त्यक्त्वा क्रियतइति यत्स त्यागः फलसंगत्यागरूपः सात्विकोमतः ॥ ९ ॥

हे अर्जुना, आपल्यास अवश्य करण्यास योग्य असें समजून, श्रुतिस्मृतींनी नेमून दिलेलीं यज्ञादिक कर्में, कर्तृत्वाचा अभिमान सोडून आणि फलाची इच्छा न धरितां करणें, हा सात्विक त्याग असून तो मला मान्य आहे. ॥ ९ ॥

न द्वेष्ट्यकुशलं कर्म कुशले नानुषज्जते ॥
त्यागी सत्त्वसमाविष्टो मेधावी छिन्नसंशयः ॥ १० ॥

पुनः सात्विकत्यागिनं विशिनष्टि । न द्वेष्टीति । अकुशलं दृष्टदुःखदं कर्म न द्वेष्टि कुशले चले कर्मफले नानुषज्जते मेधावी सम्यग्विष्णुतत्वविच्छिन्नसंशयः । भगवन्माहात्म्ये कर्मकरणे वा संशयरहितः सत्वसमाविष्टः सत्वगुणे च सम्यग्व्याप्तः त्यागी ब्रह्मणि सर्वकर्माणि त्यक्तवान् ज्ञानपूर्वकं कर्मकर्तव्यमेवेति बुद्ध्या फलानभिलाषेण क्लेशात्मकमपि विहितं कर्मकुर्वन् सात्विक त्यागीत्युक्तं भवति ॥ १० ॥

यास्तव सात्विक त्याग करण्याची प्रशंसा करितातः—सत्वगुणी मनुष्य, थंडीचे दिवसांत प्रातःस्नान करणें इत्यादिक देहास त्रासदायक व दुःखकारक असें ह्मणून कर्माचा द्वेष करीत नाहीं, पुण्याचें फल जें स्वर्गसुख त्याविषयीं आसक्त नसणारा, असें होण्यास कारण परमात्म्याचें स्वरूप योग्य रीतीनें जाणलेला, त्याच्या विचित्र माहात्म्याविषयीं संशय रहित झालेला, या दोन कारणांमुळें त्यास द्वेषराहित्य घडतें, हें तात्पर्य. ॥ १० ॥

नहि देहभृता शक्यं त्यक्तुं कर्माण्यशेषतः ॥
यस्तु कर्मफलत्यागी स त्यागीत्यभिधीयते ॥ ११ ॥

ननु सर्वकर्मत्यागोविहितकर्मत्यागोवाऽत्र त्यागशब्दार्थः कइत्य-त्रआह । नहीति । देहधारिणा सर्वकर्मणां त्यक्तुमशक्यत्वात् कोऽपि कर्मत्यागी न स्यात् शक्यत्यागेच विहितत्यागात् प्रत्यवायीस्यात् न त्यागी अतोयस्तु कर्मफलत्यागी सएवत्यागीत्युच्यते नान्यइत्यर्थः ११

पूर्वी सांगितल्याप्रमाणें त्याग शब्दाचा अर्थ सर्व कर्मफलत्याग असा होतो किंवा योग्य कर्मांचा त्याग असा होतो, याविषयीं सांगतातः–देहधारी प्राण्यांकडून, सर्व कर्मांचा परित्याग होणें ही गोष्ट असंभवनीय आहे; श्रुतिस्मृति इत्यादिकांत सांगितलेल्या विहित कर्मांचा त्याग केल्यानें दोष लागतो; यावरून जो मनुष्य योग्य कर्में करूनही त्यांच्या फलांची इच्छा आणि कर्तृत्वाभिमान सोडतो, त्यासच त्यागी–सात्विकयोगी–असें ह्मणतात. ह्मणून त्याग शब्दाचा अर्थ, सर्वकर्मपरित्याग अथवा विहितकर्मपरित्याग असा होत नसल्यामुळें त्याग ह्मणजे फलाची इच्छा न करणें, अथवा आपण अस्वतंत्र असल्या-मुळें, स्वतंत्र असा परमात्मा आपल्याकडून, आपल्या योग्यतेप्रमाणें यज्ञादिक सत्कर्में करवितो असें समजून कर्तृत्वाभिमान सोडणें, हाच त्याग शब्दाचा अर्थ होय. ॥ ११ ॥

अनिष्टमिष्टं मिश्रं च त्रिविधं कर्मणः फलम् ॥
भवत्यत्यागिनां प्रेत्य न तु संन्यासिनां क्वचित् ॥१२॥

फलसंगत्यागरूपं कर्मत्यागं स्तौति । अनिष्टमिति । अनिष्टं नर-कादि अन्येषामिष्टं स्वर्गादि नतु त्यागिनामिष्टं त्यागित्वादेव । ज्ञाना-देर्मोक्षभोग्याच्च नान्यत्स्यात्कर्मणः फलम् । त्यागिनस्तत्वसंवेत्तुरन्येषां तद्वतेफलमितिवचनात् । मिश्रं मानुषादि । इति त्रिविधं कर्मणां पुण्या-पुण्यात्मकस्य फलं प्रेत्य देहान्निर्गत्य स्थितानामत्यागिनां भवति नतु क्वचिदपि संन्यासिनां त्रिविधं फलं भवति यद्यप्यत्रात्यागिप्रतियोगि-त्वेन त्यागिनामिति वक्तव्यम् । नच त्यागिन एव संन्यासिनः । परेच्छ-

थापि ये काम्यं कर्म कुर्युर्नतु क्वचित् । न्यासिनोनाम तेऽन्येभ्यः फलत्यागिभ्यउत्तमाइति वचनाद्भेदावगतेः । तथापि कर्मफलेच्छाभाव साम्यात्त्यागिनएव संन्यासिशब्देन गृह्यंते ॥ १२ ॥

ह्मणून फलत्यागरूप कर्मत्यागाची स्तुति करितातः–अनिष्ट असे नरकादिक, इष्ट असे स्वर्गादिक आणि मिश्र (अनिष्ट व इष्ट) मनुष्यदेहप्राप्ति अशीं तीन प्रकारची फलें, पाप, पुण्य व पुण्यमिश्र पाप या तीन प्रकारच्या कर्मांनीं फलत्याग न करणाऱ्यांस देहत्यागानंतर प्राप्त होतात; कर्मफलाचा त्याग करणाऱ्या संन्याशांस तीं (फलें) कधींही प्राप्त होत नाहींत. स्वार्थाकरितां काम्यकर्म न केलें तरी, परार्थाकरितां ह्मणून केवळ काम्यकर्मत्यागी तीं करितात. परंतु संन्यासी असतात ते परार्थाकरितांही काम्यकर्म करीत नाहींत. ह्मणून येथें अत्यागी विरुद्ध जो त्यागी त्यास होत नाहीं, असें ह्मणणें योग्य असून, संन्याशास होत नाहीं, असें ह्मणण्याचें कारण त्यागीही फलाची इच्छा न करणारे व संन्यासीही फलाची इच्छा न करणारे असल्यामुळें, त्यांचें इच्छाराहित्य हें साम्य जाणून संन्यास शब्द घेतला आहे. ॥ १२ ॥

पञ्चैतानि महाबाहो कारणानि निबोध मे ॥
सांख्ये कृतान्ते प्रोक्तानि सिद्धये सर्वकर्मणाम् ॥१३॥

कर्मण्यभिमानत्यागोऽपि संन्यासइतिभावेन कर्मकारणान्याह । पंचेत्यादिना । सांख्ये कृतांते सम्यक् ज्ञानप्रतिपादके सिद्धांते शास्त्रे सर्वकर्मनिष्पत्तये पंचकारणान्युक्तानि जानीहि ॥ १३ ॥

कर्मांचा अभिमान सोडणें हाही संन्यास होय अशा अभिप्रायानें सांगतातः–हे आजानुबाहु अर्जुना, सर्व कर्मांच्या उत्पत्तीस हीं पांच कारणें मी सांगतों तीं ऐक; तीं कारणें यथार्थज्ञान उत्पन्न होण्यास कारण जे परमात्म्याचा अवतार कपिलमहामुनि त्यांनीं सांगितलेलें सांख्यशास्त्र त्यांत सांगितलीं आहेत. ॥ १३ ॥

अधिष्ठानं तथा कर्ता करणं च पृथग्विधम् ॥
विविधाश्च पृथक्चेष्टा दैवं चैवात्र पञ्चमम् ॥१४॥

अधिष्ठानं देहादि । कर्ता विष्णुः स्वतंत्रत्वात् । नानाप्रकारं करणामिंद्रियादि विविधा च परस्परं पृथग्भूता चेष्टा । करणानां तत्र व्यापारः हस्तादिक्रियादिभिः होमादि कर्माणि जायंते ध्यानादेरपि मानसीचेष्टा कारणं पूर्वतनचेष्टापि संस्कारकारणत्वेन भवति । दैवमदृष्टम् । देहोब्रह्मार्थेन्द्रियाद्याः क्रियाश्च तथादृष्टं पंचमंकर्महेतुरितिश्रुतेः। अथवा कर्तेति जीवउच्यते तस्यापि पराधीनकर्तृत्वभावात् दैवमिति प्रेरकः परमात्मा ॥ १४ ॥

देहभूम्यादिक पहिलें कारण; स्वतंत्रकर्ता परमात्मा हें दुसरें; नानाप्रकारच्या इंद्रियांच्या चेष्टा हें तिसरें; परस्पर भिन्न असे हात वगैरेनीं करावयाचे होमादिक व्यापार हें चवथें; आणि अदृष्ट (दैव) हें पांचवें कारण होय. अथवा कर्ता ह्मणजे परमेश्वरानें दिलेल्या स्वातंत्र्यानेंयुक्त जीव, कर्ता आणि दैव शब्दानें अदृष्टप्रेरक परमात्मा असा अर्थ होय. ॥ १४ ॥

शरीरवाङ्मनोभिर्यत्कर्म प्रारभते नरः ॥
न्याय्यं वा विपरीतं वा पञ्चैते तस्य हेतवः ॥१५॥

शरीरादिभिर्यत् न्यायोपेतमन्यायोपेतं वा कर्म नरः प्रारभते । तस्यैतेऽधिष्ठानादयः पंच हेतवः । ततश्च जीवस्यस्वातंत्र्याभावात् दैवमिति प्रेरकः परमात्मा ॥ १५ ॥

हे अर्जुना, मनुष्य शरीरानें, वाणीनें आणि मनानें योग्य किंवा अयोग्य असें कायिक, वाचिक आणि मानसिक असें तीन प्रकारचें कर्म आरंभितो, त्या कर्मास, हीं पूर्वीं सांगितलेलीं पांच कारणें (हेतु) असतात. १५

तत्रैवं सति कर्तारमात्मानं केवलं तु यः ॥
पश्यत्यकृतबुद्धित्वान्न स पश्यति दुर्मतिः ॥ १६ ॥

अभिमानात्यागिनं निंदति । तत्रेति । तत्रकर्माणि एवंसति पंचानांकारणत्वेसति केवलं निष्क्रियमात्मानम् । एनं केवलमात्मानं निष्क्रियत्वाद्वदंतिहि इत्युक्तेः । कर्तारं स्वतंत्रं यः पश्यति असंस्कृतबुद्धित्वाद्दुर्मतिः स न पश्यति अज्ञानीत्यर्थः ॥ १६ ॥

कर्तृत्वाभिमान न सोडणाराची निंदा करितात:—अशा प्रकारें पूर्वीं सांगितलेलीं हीं पांच कारणें कर्मास असतां, अस्वतंत्र असूनही जो मनुष्य आपणच कर्ता आहे असें समजतो, त्याच्या बुद्धीस शास्त्रोपदेशाचा संस्कार नसल्यानें, तो मूर्ख समजावा. हीं पांच कारणें कर्मास आहेत असें जो जाणतो, तो परमात्मा श्रीहरी स्वतंत्र कर्ता आहे असें समजतो. ॥ १६ ॥

यस्य नाहंकृतो भावो बुद्धिर्यस्य न लिप्यते ॥
हत्वापि स इमांल्लोकान्न हन्ति न निबध्यते ॥ १७ ॥

स्वात्मानमकर्तारं मन्यमानं स्तौति । यस्येति । यस्याहमिति एवं भूतोभावोऽभिप्रायोनास्ति । यस्य बुद्धिर्न लिप्यते । स इमान् लोकान् हत्वापि न हंति हन्मीति भावाभावान्नहंतीत्यतोरागाभावाच्च न निबध्यते । तथोक्तं । स्वातंत्रमीश्वरे वेत्ति नैवात्मनि कदाचन । ईश्वराधीनमेवात्मन् स्वातंत्र्यं तु जडान्प्रति । तारतम्येन लक्ष्म्यादेर्जीवान्प्रति च सर्वशः । यस्तदर्थं समुत्पन्नो यथा रुद्रोयथा यमः । हत्वापि सइमांल्लोकान्न हंति न निबध्यते । अज्ञस्तदर्थं जातोऽपि बध्यते दैत्यवध्द्रुवं । अपरोक्षदृङ् न जातो य स्तदर्थं मुक्तिगं सुखं । ऱ्हसेत्तस्य परोक्षज्ञः किंचिद्दोषेण लिप्यतइति यस्तुहन्मीति भावं करोति रागाच्च प्रवर्तते । सोऽहंतापि हंति इत्युच्यते लिप्यते च । उक्तंच । स्वातंत्र्यं मन्यमानस्य रागाद्धर्मं च कुर्वतः । तन्निमित्तस्तु दोषः स्याद्गुणश्च स्यात्स्वकर्मज इति ॥ १७ ॥

आपण अस्वतंत्र असें जाणून कर्तृत्वाभिमान सोडणाराची स्तुति करितात:—ज्या मनुष्याला, मी हें कर्म करितों असा अभिमान नाहीं व ज्याची बुद्धि फलेच्छेनें दूषित होत नाहीं, तो कर्मफलाची इच्छा सोडल्यामुळें, त्या पापानें बद्ध होत नाहीं. कर्मफलानें बंधप्राप्ति न होणें हें लोकसंहाराकरितां उत्पन्न झालेले व ज्यानां परमात्मा स्वतंत्र आहे असें ज्ञान असलेले जे रुद्र यमादिदेव त्यांसच आहे असें जाणावें. ईश्वर स्वतंत्र आहे असें जाणून, आपण अस्वतंत्र आहों असें जाणणें, आणि आपणास कर्म करण्यापुरतें थोडेंसें जें स्वातंत्र्य आहे तें परमात्म्यानें दिलेलें असून, जडापेक्षां आपण थोडेसे जास्त स्वतंत्र आहों; आणि परमात्मा पूर्ण स्वतंत्र असून, चित्प्रकृति

लक्ष्मी त्याच्या स्वाधीन आहे, आणि ती ब्रह्मदेव, रुद्र इत्यादि जीवांपेक्षां अनंत अंशानें जास्त स्वतंत्र आहे. त्याचप्रमाणें ब्रह्मरुद्रादि सर्व जीवगण लक्ष्मीपेक्षां अनंत अंशानें कमी व स्वतंत्र आहेत तें स्वातंत्र्य त्यांना परमात्म्यानें दिलेलें आहे ह्मणून, मुक्तींत आणि संसारांत, उच्चनीच तारतम्य हें ज्यांच्या त्यांच्या योग्यतेप्रमाणें सदोदित आहे, असें समजावें. परमात्म्यानें यम आणि रुद्र हे देव, संहार करण्याकरितां उत्पन्न केले असून, त्यांच्याकडून तो कालरूपी संकर्षणमूर्ति श्रीहरी, संहार करवितो, याप्रमाणें ते यम व रुद्रदेव हे सदोदित निश्चयानें जाणत असून, आपल्या स्वातंत्र्याविषयींचा भ्रम त्यांनीं सोडल्यामुळें ते बद्ध होत नाहींत; अज्ञ मनुष्य हाही, परमात्म्यानें प्रेरणा केल्यामुळेंच लोक नाश वगैरे करितो, असें असलें तरी, मी स्वतंत्र आहे अशा भ्रमांत असल्यामुळें तो बद्ध होतो. अपरोक्षज्ञानी यास परमात्म्यानें संहार करण्यास उत्पन्न केलें नसून, तो तें कर्म करील तर, तो मुक्तींत गेल्यावर त्याच्या सुखाचा किंचित् ऱ्हास होईल. परोक्षज्ञान्यास परमात्म्यानें संहार करण्यास उत्पन्न केलें नसून, तो जर तें कर्तव्य करील तर, तो किंचित् दोषानें लिप्त होईल. मी स्वतंत्र आहें असें समजून स्नेहानें जो कर्म करितो, तो बद्ध होतो हें या ह्मणण्याचें तात्पर्य होय. ॥ १७ ॥

ज्ञानं ज्ञेयं परिज्ञाता त्रिविधा कर्मचोदना ॥
करणं कर्म कर्तेति त्रिविधः कर्मसंग्रहः ॥ १८ ॥

यदि जीवो न कर्ता तर्हि तदुद्देशेन प्रवृत्तश्रौतस्मार्तविधिवैय्यर्थ्यप्रसंग इत्यत आह । ज्ञानमिति । ज्ञानंविधिविषयं । ज्ञेयंचेच्छाप्रयत्नलक्षणं । अधिष्ठानादिलक्षणं पुरुषार्थलक्षणं च परिज्ञातासर्वज्ञ ईश्वरः सर्वप्रेरक इतित्रिविधः कर्मविधिरितिनिमित्तनिमित्तिनोरभेदोपचारात् त्रिविधेत्युच्यते अयमाशयः । ना पराधिनकर्तृत्वं विधिविषयत्वे प्रयोजकं येन जीवं प्रति कर्मविधिवैय्यर्थ्यं स्यात् तथासति ईश्वरस्यापि विधिविषयत्वापातात् किंतु यस्य स्वसंबंधितया विधिज्ञानं कर्म तत्फलं चोद्दिश्येच्छा तदनुगुणश्च प्रयत्नोऽधिष्ठानादिसन्निधानं कर्मसंबंधः फलभाक्त्वंचास्ति तंप्रति कर्मविधयः प्रवर्तंते । अस्ति चेदं समस्तं

परमेश्वरप्रसादायत्तं जीवइति कथं तं प्रति न कर्मविधयः तत्प्रेरणादेवे-श्वरस्य स्वातंत्र्येऽपि विधिद्वारेणैव ज्ञानेच्छाप्रवृत्तिजनकत्वमवसीयते नचाज्ञानपूर्वानुष्ठाने फलमिति । अथवा दैवंचेति ईश्वरस्य कर्मसु प्रेरकत्वमुक्तं । तत्प्रेरणास्वरूपं निरूपयति । ज्ञानमिति । कर्मचोदना कर्मसुप्रेरणा ज्ञानंज्ञेयंपरिज्ञातेति त्रिविधा ज्ञान ज्ञेय ज्ञातृ स्वरूप भगवत्स्वरूपभूतेत्यर्थः । उक्तंच । संप्रेरयितुरीशस्य कर्मस्वखिलचेतनात् । ज्ञातृज्ञेयज्ञानरूपा प्रेरणा सा सएवतु । स्वरूपेणैव नित्या सा विशेषा-त्मतया भवेत् । विशेषोऽपि स्वरूपेण नित्यश्च स्याद्विशेषतः । स्वनिर्वा-हकता यस्मान्नानवस्था विशिष्टवदित्यादि । पूर्वोक्त कर्मकारणानि संक्षिप्याह । करणमिति । कर्मचेष्टा द्वितीयकर्मशब्देन तत्कारणानि लक्ष्यंते । संग्रहः पंचकारणानां संक्षेपः । अधिष्ठानस्य करणेऽतर्भावा-द्दैवशब्दोदितेश्वरस्यैव मुख्यकर्तृत्वात्स्वतंत्रास्वतंत्रकर्त्रोः कर्तृशब्देनोक्तेः कर्मकारणानां त्रैविध्यमित्यर्थः ॥ १८ ॥

जीवास स्वतंत्रतेनें कर्तृत्व नाहींच, असें होईल तर, केवळ जीवा-करितांच प्रवृत्त झालेले विधिनिषेधात्मक श्रौतस्मार्तविधि व्यर्थ होण्याचा प्रसंग येईल, ह्मणून, त्याविषयीं सांगतातः—ज्ञान ह्मणजे कर्मविधिविषयक, ज्ञेय ह्मणजे कर्मफळ पुरुषार्थरूप अथवा इच्छा—प्रयत्न—लक्षण, आणि ज्ञाता ह्मणजे सर्वज्ञ सर्वप्रेरक ईश्वर होय; याप्रमाणें ज्ञान, ज्ञेय, आणि ज्ञाता, या भेदानें कर्मविधि तीन प्रकारचा आहे. निमित्त आणि निमित्ति यांस अभेदोपचारानें त्रिविधा असें सांगितलें आहे. कर्ता जीव हा अस्वतंत्र असल्यामुळें, विधि-निषेधरूप शास्त्रास विषय होत नाहीं, असें नाहीं. तसें असतें तर, जीव हा अस्वतंत्र असल्यामुळें, कर्मविधीस वैय्यर्थ्य प्राप्त होत होतें, ह्मणजे स्वातंत्र्य हें विधिनिषेधात्मक शास्त्रास प्रयोजक नाहीं, असा याचा अभिप्राय होय. जर त्याला स्वातंत्र्याचेंच प्रयोजन असतें तर ईश्वर हा स्वतंत्र असल्यामुळें त्यासही विधिनिषेध आहे असें ह्मणणें भाग पडेल. पण तसें संभवत नाहीं. " अदुःखमितरत्सर्वंजीवाएव तु दुःखिनः । तेषां दुःखप्रहाणाय श्रुतिरेषा प्रवर्तते । " यावरून जीवांला दुःखापासून मुक्त करण्याकरितांच श्रुतिगण प्रवर्तलेले असतात. ज्याला हें कर्म आपणास करणें योग्य आहे, असें विधि-

ज्ञान आहे व कर्म आहे आणि त्या कर्मफलाची इच्छाही आहे व त्याला अनुसरून प्रयत्न आहे; पण अधिष्ठान व सन्निधान कर्मसंबंध व कर्मफल उपभोग करण्याचा अधिकार हे इतके धर्म कुठें असतात. त्याच्या उद्देशानें कर्मविधि प्रवृत्त होतात. हे सर्व धर्म जीवांस ईश्वरांनीं दिले आहेत मग विधिनिषेध शास्त्रास जीव कसा विषय होणार नाहीं? परमात्मा सर्व जीवांला कर्म करण्याविषयीं प्रवृत्ति करविण्यास स्वतंत्र जरी आहे, तथापि आपल्या सत्यसंकल्पानुसार विधिनिषेधात्मक शास्त्रद्वारांच कर्मज्ञान, इच्छा व प्रवृत्ति उत्पन्न करितो. यावरून अज्ञानानें कर्मानुष्ठान केलें असतां, त्या कर्माचें फळ मिळत नाहीं हें निश्चित आहे; अथवा ईश्वर कर्मांचा प्रवर्तक आहे असें ह्मणून त्याच्या प्रेरणेचीं स्वरूपें सांगतात:—परमात्म्याकडून कर्मादिकांत जीवांस जी प्रेरणा होते, ती ज्ञान, ज्ञेय आणि ज्ञातृस्वभावानें तीन प्रकारची आहे. याप्रमाणें परमात्मा हा, ज्ञानादि तीन स्वरूपांनीं असतो; यावरून त्या परमात्म्याहून अभिन्न अशीं जीवांना प्रेरणा करणारीं ज्ञानादि तीन स्वरूपें अवश्य जाणलीं पाहिजेत. पूर्वोक्त कर्म करणें संक्षेपानें सांगतात:—कर्मविषयक व्यापार, कर्म व कर्ता, याप्रमाणें जीवप्रेरक कर्मविधि तीन प्रकारचा जाणावा; हा पूर्वीं सांगितलेल्या पांच कारणांचा संक्षेप होय. अधिष्ठान, भूमि आणि देहादिक हे करण शब्दांत अंतर्भूत आहेत. त्याचप्रमाणें स्वतंत्र कर्ता ईश्वर आणि अस्वतंत्र कर्ता जीव असें याठिकाणीं कर्तृ शब्दानें सांगितले आहेत. पूर्वीं कर्मकारणें पांच सांगून याठिकाणीं तीन सांगितलीं आहेत, परंतु त्यांत विरोध नाहीं असें जाणावें. ॥ १८ ॥

ज्ञानं कर्म च कर्ता च त्रिधैव गुणभेदतः ॥
प्रोच्यते गुणसंख्याने यथावच्छृणु तान्यपि ॥ १९ ॥

सात्विकज्ञानादिसाधनानुष्ठानाय प्रतिज्ञापूर्वकं पुनर्गुणभेदानाह । ज्ञानमित्यादिना । गुणाः संख्यायंतेऽस्मिन्निति गुणसंख्यानं तस्मिन्सांख्यशास्त्रे ॥ १९ ॥

सात्विकज्ञानादि साधनानुष्ठान प्रतिज्ञापूर्वक पुनः गुणभेद सांगतात:— गुणांची गणना ज्यांत सांगितली आहे, अशा सांख्यशास्त्रांत, ज्ञान, कर्म

आणि कर्ता हे, सत्वादिगुणभेदानें तीन प्रकारचे सांगितले आहेत; ते तीनही प्रकार ज्ञान, कर्म, व कर्ता; हे मी तुला सविस्तर सांगतों ऐक. ॥ १९ ॥

सर्वभूतेषु येनैकं भावमव्ययमीक्षते ॥
अविभक्तं विभक्तेषु तज्ज्ञानं विद्धि सात्त्विकम् ॥२०॥

आदौ प्रतिज्ञातं ज्ञानत्रैविद्ध्यमाह। सर्वभूतेष्वित्यादिना। भवंति सर्वदाविद्यंतइति भूतानि जीवाः भवंत्युत्पद्यंतइतिव्युत्पत्या जडानिच विभक्तेषु जडेश्वराभ्यां जीवेश्वराभ्यां परस्परं च यथायोग्यं भिन्नेषु यथा तारतम्यविभागवत्सुखदुःखविकारादिनाशवत्सु च सर्वभूतेषु जीवेषु जडेषु अविभक्तं परस्परं भेदशून्यं तारतम्यलक्षविभागरहितं च भूतेषु इत्यधिकरणनिर्देशादेव जीवजडाभ्यां भेदः सिद्धः। अव्ययं दुःखविकारादिनाशरहितं एकं सर्वोत्तमं भावं विष्णुं येन ज्ञानेन ईक्षते तज्ज्ञानं सात्विकं विद्धि ॥ २० ॥

प्रथमतः ज्ञानाचे तीन प्रकार सांगतातः-प्रकृत्यादि जड व ईश्वर यांपासून व परस्पर भिन्न भिन्न, परस्पर तारतम्ययुक्त, नित्य व दुःखसंबंध असलेले असे जे मुक्त व अमुक्त जीवगण त्याप्रमाणें जीव व ईश्वर यांपासून भिन्न व नाश पावणारे असे जड अशा जडजीवांचेठायीं प्रेरणा करण्याकरितां असलेलीं परमात्म्याचीं प्रेरकरूपें, अंतर्यामिरूपें तीं परस्पर भेद व तारतम्य यांनीं रहित आहेत. दुःख व विकारादि दोषरहित आहेत असें ज्या ज्ञानानें जाणतो तें ज्ञान सात्विक होय. "भूतेषु" या सप्तमीचा अर्थ अधिकरण घेतल्यामुळें "कुंडे बदराणि" या वाक्याप्रमाणें, ह्मणजे कुंडपात्रांत घातलेलीं बोरें, जशीं पात्रापासून भिन्नच असतात, तद्वत् सर्व जीवजडाचेठायीं अंतर्यामी असलेला परमात्मा श्रीनारायण हा, जीवादि जगापासून निरतिशय भेदयुक्तच आहे. ॥ २० ॥

पृथक्त्वेन तु यज्ज्ञानं नानाभावान्पृथग्विधान् ॥
वेत्ति सर्वेषु भूतेषु तज्ज्ञानं विद्धि राजसम् ॥ २१ ॥

यत्तु ज्ञानं सर्वेषु भूतेषु पृथक्त्वेन तु शब्दोऽवधारणे सर्वभूतगमीश्वरं पृथक्त्वेन सर्वोत्तमत्वेन नच विषयीकुर्वन् सर्वभूतपृथक्त्वमात्र-

विषयमित्यर्थः । एतदेवव्याचष्टे । नानाभावानिति । तत्सर्वभूत पृथक्त्वमात्रविषयं ज्ञानं राजसं ॥ २१ ॥

जें ज्ञान सर्व जीवांचे ठायीं, भेदानें परमात्मा सर्वोत्तमत्वादि गुणविशिष्ट आहे असें जाणवीत नाहीं व इतर पदार्थांस भेद दाखवितें आणि भिन्न असे नानाप्रकारचे पदार्थ विषयी करितें तें ज्ञान राजस असें समज. ॥ २१ ॥

यत्तु कृत्स्नवदेकस्मिन्कार्ये सक्तमहैतुकम् ॥
अतत्त्वार्थवदल्पं च तत्तामसमुदाहृतम् ॥ २२ ॥

यत्तु ज्ञानमेकस्मिन् कृत्स्नवत् सक्तं एकमेव वस्तु सर्ववस्त्वात्मना विषयी करोति । मुक्तत्वादिरूपेण करणीयत्वात्कार्याख्योजीवस्तस्मिन्कृत्स्नं परिपूर्णं ब्रह्म तस्मिन्निव सक्तं जीवएव ब्रह्मेति गोचरयति । तथा जीवे कृत्स्नजगद्भूतसक्तं जीवोऽखिलंजगदिति तथैकस्मिन्कार्ये कृत्स्नवत्सक्तं एकजीवज्ञानात्कृत्स्नमपिज्ञातमिति । अहैतुकं वेदानुकूलयुक्तिराहितम् । अतत्वार्थवत् यथास्थिताकाराद्विपरीताकारगोचरम् । अल्पमीषत्समीचीनम् । भ्रांतेरधिष्ठानादि विषय ज्ञानत्वस्यापि सत्वात् तत्तादृशं ज्ञानं पृथक् पृथक् जातं तामसमुदाहृतम् । तत्तद्विषययोगे च तामसराजसत्वं तामसतामसत्वं च द्रष्टव्यम् । तदुक्तम् । अस्तित्वाद्भूतनामभ्यः सर्वजीवेभ्य एव यत् । मुक्तेभ्योऽपि पृथक्त्वेन विष्णोः सर्वत्रगस्य च । ऐक्येन च स्वरूपाणां प्रादुर्भावादिकात्मनाम् । तारतम्येन जीवानां भेदेनैव परस्परम् । जडेभ्यश्चैव जीवानां जडानांच परस्परम् । तेभ्योविष्णोश्च सम्यक्त्वलक्षणज्ञानपूर्वकम् । ज्ञानं सात्विकमुद्दिष्टं यत्साक्षान्मुक्तिकारणम् । विष्णोरन्यस्ययाथार्थ्यज्ञानं राजसमुच्यते । यदि विष्णुं न जानाति यदिवा मिश्रतत्त्ववित् । अन्यथाकरणीयत्वात्कार्याख्यं जीवमेव यः । अकार्यं ब्रह्म जानाति सएवाखिलमित्यपि । एकजीवपरिज्ञानात्कृत्स्नज्ञोऽस्मीति मन्यते । युक्तिविज्ञानराहित्यात्स्वपक्षस्याप्ययुक्तितः । अयुक्तितामेव गुणं मन्यमानोऽल्पदर्शनः । अतत्त्वार्थे जगद्ब्रूते तत्त्वार्थज्ञानवर्जनात् । समुख्यस्तामसज्ञानी ह्येकैकेनापि किं पुनः । सर्वैरेतैर्विशेषैश्च युक्तः पापतमोऽधिकइति ॥ २२ ॥

जें ज्ञान कोणत्याही एका वस्तूंत सर्वात्मकत्व दाखवितें ह्मणजे एकच वस्तु सर्व वस्तुभूत आहे असें दाखवितें, जननमरणरूप संसारांत असलेले जीव मुक्त करतां येतात ह्मणून कार्यनामक अशा जीवांचेठायीं, संसारबंध-रहित, नित्यमुक्त, सद्गुणपूरित, परब्रह्मच आहे अशाविषयीं आसक्ति उत्पन्न करितें, ह्मणजे जीव हेंच ब्रह्म आहे असें दाखवितें; त्याचप्रमाणें सर्व जग हें जीवच आहे असें दाखवितें, एका जीवज्ञानानें हें सर्व जगज्ज्ञान होतें असें दाखवितें; अशा "सोहं ब्रह्मास्मि०" इत्यादिक वेदानुकूल—युक्तिरहित, अविद्यमान, सदसद्वैलक्षण्य, अनिर्वचनीयत्वादि विषय दाखविणारें, अधिष्ठान-रूप, अल्प यथार्थ ज्ञानयुक्त, असें जें ज्ञान, तें तामस होय असें ज्ञानी लोक सांगतात. या एकेकानेंही युक्त असलेलें जें ज्ञान, तेंही तामस होतें, मग तें सर्व विशेषणांनींयुक्त असें असेल तर तें महातामस असें समजून, त्याचा आश्रय करणारे लोकही महातामसी होत, हें तात्पर्य. ॥ २२ ॥

नियतं सङ्गरहितमरागद्वेषतः कृतम् ॥
अफलप्रेप्सुना कर्म यत्तत्सात्विकमुच्यते ॥ २३ ॥

गुणभेदेन कर्मत्रैविध्यमाह । नियतमित्यादिना । विष्णोः सर्वोत्तमत्वज्ञानपूर्वकं तद्भक्त्या तदर्पणबुद्ध्या क्रियमाणं स्ववर्णाश्रमोचितं कर्म नियतं कर्तृत्वसंगरहितं कीर्त्यादौ रागादकीर्त्यादौ द्वेषाच्च न कृतं दंभेनाकृतमित्यर्थः फलाकांक्षाराहित्येन कर्तव्यमित्येवकृतं यत्कर्म तत्सात्विकमुच्यते ॥ २३ ॥

गुणभेदानें तीन प्रकारचें कर्म सांगतातः—विष्णु हा सर्वोत्तम आहे असें ज्ञान असून, हरिभक्तीनें—कृष्णार्पण करण्याच्या हेतूनें—आपल्या वर्णाश्रमास योग्य असें, आसक्ति न ठेवितां, रागद्वेषादिकांचा त्याग करून, स्वभावतःच करावयाचें जें निष्काम कर्म, त्यास सात्विक असें ह्मणतात. ॥ २३ ॥

यत्तु कामेप्सुना कर्म साहङ्कारेण वा पुनः ॥
क्रियते बहुलायासं तद्राजसमुदाहृतम् ॥ २४ ॥

यत्तु फलप्रेप्सुना कर्तृत्वाभिमानयुक्तेन बहुलायासयुक्तं यत्कर्म क्रियते तद्राजसं फलाल्पत्वादायासबाहुल्यम् ॥ २४ ॥

जें कर्म फलप्राप्तीच्या इच्छेनें, माझ्यासारखा कोणीही दुसरा श्रोत्रिय नाहीं असा अभिमान धरून, ज्याचें फल अल्प व जें करण्यास आयास फार पडतात, तें राजस समजावें. ॥ २४ ॥

अनुबन्धं क्षयं हिंसामनपेक्ष्य च पौरुषम् ॥
मोहादारभ्यते कर्म यत्तत्तामसमुदाहृतम् ॥ २५ ॥

अनुबंधं कर्मानंतरं अनुबध्यमानं शुभाशुभं क्षयमर्थनाशं हिंसां परपीडां पौरुषं आत्मनः कर्मसामर्थ्यमनपेक्ष्याविमृश्यमोहादहंकर्तेति मिथ्याज्ञानाद्यत्कर्मारभ्यते तत्तामसमुच्यते ॥ २५ ॥

पुढें मिळणारें शुभाशुभ फल, द्रव्याचा नाश, परपीडा, आणि आपलें सामर्थ्य, यांकडे न पहातां, अज्ञानामुळें 'मी कर्ता' असा दुराग्रह धरून, जें कर्म करितात, तें तामस असें जाणावें. ॥ २५ ॥

मुक्तसङ्गोऽनहंवादी धृत्युत्साहसमन्वितः ॥
सिद्ध्यसिद्ध्योर्निर्विकारः कर्ता सात्विक उच्यते ॥२६॥

गुणभेदतः कर्तुस्त्रैविध्यमाह । मुक्तसंगइत्यादिना । मुक्तसंगः फलसंगरहितः अनहंवादी सर्वस्य भगवदधीनत्वनिश्चयादेव कर्तृत्वाभिमानरहितः धृतिरारब्धे कर्मण्यवर्जनीयदुःखधारणा। उत्साहउद्युक्तचेतस्त्वं ताभ्यां समन्वितः फलस्य सिद्ध्यसिद्ध्योर्निर्विकारः हर्षविषादशून्यः सकर्ता सात्विकउच्यते ॥ २६ ॥

गुणभेदानें तीन प्रकारचे कर्ते सांगतात:—फलाच्या आसक्तीनें रहित, परमात्माच कर्ता आहे असें समजून मी अस्वतंत्र आहें असें समजणारा, धैर्ययुक्त आणि ज्याचें मन आनंदित आहे असा, आरंभ केलेलें कर्म पुरें होवो अथवा अपुरें राहो, त्याविषयीं हर्ष किंवा शोक न मानणारा, असा जो त्यास सात्विक असें ह्मणतात. ॥ २६ ॥

रागी कर्मफलप्रेप्सुर्लुब्धो हिंसात्मकोऽशुचिः ॥
हर्षशोकान्वितः कर्ता राजसः परिकीर्तितः ॥ २७ ॥

रागी कीर्त्यादिकामः कर्मफलप्रेप्सुः उद्दिष्टकार्यफलार्थी । लुब्धः कर्मापेक्षितद्रव्यव्ययस्वभावरहितः हिंसात्मकः परार्हितः अशुचिः कार्यसिद्ध्यसिद्ध्योर्हर्षशोकान्वितः कर्ता राजसः परिकीर्तितः ॥२७॥

ज्याला कीर्तीची वगैरे इच्छा आहे असा, कर्मफलाची इच्छा करणारा, याग इत्यादि उचित कर्मांत द्रव्य न खर्चणारा, परहिंसा करण्यांत ज्याचें मन रत झालेलें आहे असा, चांगले आचार न पाळणारा, लाभालाभानें हर्ष शोक मानणारा, असा जो कर्ता त्यास राजस कर्ता असें ह्मणतात. ॥ २७ ॥

अयुक्तः प्राकृतः स्तब्धः शठो नैष्कृतिकोऽलसः ॥
विषादी दीर्घसूत्री च कर्ता तामस उच्यते ॥ २८ ॥

अयुक्तो भगवदर्पणादियोगरहितः । प्रकृष्टो न कृतः प्राकृतः । भगवद्भक्तिसामर्थ्यात्प्रकृष्टो न कृतोहि यः । स प्राकृतोदीर्घसूत्री पश्चात्कुर्यामिति स्मरन् इतिवचनात् । स्तब्धः आत्मसंभावनया क्वापि अनम्रः शठोगूढद्वेषेण कर्मकारी । नैष्कृतिको नीचकर्मकारी । अलसः प्राप्तकालेकर्मण्युदासीनः विषादी अवसादनशीलः । प्राप्तेपि कर्मकाले पश्चात्कुर्यामितिचिंतयन् दीर्घसूत्री । परेण यः कृतोदोषोदीर्घकालगतोऽपिवा । यस्तस्य सूचकोदोषाद्दीर्घसूत्री स उच्यते इत्यभिधानादेताद्दशोवा । एताद्दशः कर्ता तामसउच्यते । अत्रदोषतारतम्यात्तामसकर्तुस्त्रैविद्ध्यं बोद्धव्यम् । उक्तंच । अलसोदीर्घसूत्री च सत्वयुक् तामसोमतः । अयुक्तोराजसः स्तब्धः प्राकृतोनैष्कृतः शठः । एकैकेनैव दोषेण प्रोक्तस्तामसतामसः । दुर्नरत्वं च तिर्यक्त्वं तमश्चैतत्फलंक्रमादिति ॥ २८ ॥

